कायस्थ-पद्मनाभेन बुधपादाब्जरेणुना ।
कृतिरेषा विजयता स्थेयादाचन्द्रतारक ॥१३॥
[इति श्रीपद्मनाभ-कायस्थ-विरचित यशोधरचरित्र समाप्तम्]

यशोधरचरित्र (वासवसेन मुनि)

आदिभाग :—

जितारातीन् जिनान्नत्वा सिद्धान् सिद्धार्थसंपदः ।
सूरीनाचारसपन्नानुपाध्यायास्तथा यतीन् ॥१॥
जनन्या समवेतस्य यशोधर-महीभुजः ।
चरित पावन वक्ष्ये यथाशक्ति यथागमं ॥२॥
सर्वशास्त्रविदा मान्यैः सर्वशास्त्रविशारदैः ।
प्रभंजनादिभि॰ पूर्वं हरिषेण-समन्वितैः ॥३॥
यदुक्तं तत्कथ शक्यं मया बालेन भाषित ।
तथापि तत्क्रमाभोज-प्रणामार्जित-पुण्यतः ॥४॥
प्रोच्यमान समासेन संसारासातशातन ।
वदता शृण्वता यच्च तत्सतः शृणुतादरात् ॥५॥

अन्तभाग :—

मारिदत्तादयश्चान्ये आर्यासंघ तथैव च ।
सौधर्मादिकग्रैवेयपर्यंतं नाकमाश्रिताः ॥१८७॥
[1]"कृतिर्वासवसेनस्य वागडान्वयजन्मन॰ ।

---

१ यह प्रशस्ति-पद्य जैनसिद्धान्तभवन आराकी सं० १७३२ वाली एक प्रतिमें नहीं है किन्तु दूसरी सं० १५८१ की लिखी हुई उस प्रतिमे पाया जाता है जो रामसेनान्वयी भ० श्रीरत्नकीर्तिके प्रपट्टधर और भ० लखमसेन के पट्टधर भ० धर्मसेनके समयमें लिखी गई है ।

इमा याशोधराभिख्या सशोध्याधीयता बुधैः ॥१००॥"

इति यशोधरचरिते मुनिवासवसेनकृते काव्ये अभयरुचिभट्टारक-अभयमत्योः स्वर्गगमनो चडमारी-धर्मलाभो यशोमत्यादयोन्ये यथायथ नाकनिवासिनो नाम अष्टमः सर्गः समाप्तः ।

नेमिनिर्वाणकाव्य (कविवाग्भट)

आदिभाग :—

श्रीनाभिसूनोः पदपद्मयुग्मनखाः सुखानि प्रथयतु ते वः ।
समन्नमन्नाकि-शिरःकिरीट-सघट्ट-विस्रस्तमणीयित यैः ॥१॥

अन्तभाग :—

[1]भिल्लो विध्यनगे वणिग्वरगुणश्चेभ्यादिकेतुः सुरः ।
चिन्तायाति खगे महेन्द्रसुमना भूपोऽपरादिर्जितः ।
सोऽव्यादच्युतनायको नरपतिः स्वादिप्रतिष्ठोऽप्यह-
मिन्द्रो यश्च जयतके सुरवरो नेमीश्वरः पातु वः ॥८६॥
अहिछत्रपुरोत्पन्न-प्राग्वाट-कुलशालिनः ।
छाहडस्य सुतश्चक्रे प्रबन्धं वाग्भटः कवि ॥८७॥

इति श्रीनेमिनिर्वाणे महाकाव्ये महाकविश्रीवाग्भटविरचिते नेमिनिर्वाणाभिधानो नाम पचदशमः सर्गः समाप्तः ।

६. भूपाल-चतुर्विंशति-टीका (प० आशाधर)

आदिभाग :—

प्रणम्य जिनमज्ञाना सज्ञानाय प्रचक्षते ।
आशाधरो जिनस्तोत्र श्रीभूपालकवेः कृति ॥१॥

---

१ ये अन्तके दोनों पद्य निर्णयसागर बम्बई से प्रकाशित हुए ग्रन्थमें नहीं है किन्तु आरा सि० भवन तथा देहलीकी प्रतियोंमें पाये जाते हैं ।

अन्तभाग :—

उपशमइव मूर्तिः पूतकीर्तिः स तस्मा-
दजनि विज(न)यचंद्र. सच्चकोरैकचंद्रः ।
जगदमृतमगर्भाः शास्त्रसंदर्भगर्भाः
शुचिचरितसहिष्णोर्यस्य धिन्वंति वाचः ॥२६॥

विनयचन्द्रस्यार्थमित्याशाधरविरचिता भूपालचतुर्विंशतिजिनेन्द्रस्तुते-ष्टीका परिसमाप्ता । [जयपुर प्रति

७. जम्बूस्वामिचरित्र (ब्र० जिनदास)

आदिभाग :—

श्रीवर्धमानतीर्थेश वदे मुक्तिवधूवरम् ।
कारुण्यजलधिं देव देवाधिप-नमस्कृतम् ॥१॥

अन्तभाग :—

श्रीकुंदकुन्दान्वयमौलिरत्न श्रीपद्मनदी विदितः पृथिव्याम् ।
सरस्वतीगच्छ विभूषणं च बभूव भव्यालिसरोजहंसः ॥२३॥
ततोभवत्तस्य जगत्प्रसिद्धे पट्टे मनोज्ञे सकलादिकीर्ति. ।
महाकविः शुद्धचरित्रधारी निर्ग्रंथराजा जगति प्रतापी ॥२४॥

जयति सकलकीर्त्ति. पट्टपंकेजभानु-
जगति भुवनकीर्तिर्विश्वविख्यातकीर्तिः ।
बहुयतिजनयुक्तः सर्वसावद्यमुक्तः
कुसुमशरविजेता भव्यसन्मार्गनेता ॥२५॥

विबुधजननिषेव्यः सत्कृतानेककाव्यः
परमगुणनिवासः सद्व्रतालीविलासः ।
विजितकरणमारः प्राप्तसंसारपारः
स भवतु गतदोषः शर्मणे वः सतोषः ॥२६॥

पष्ठाष्टमादेस्तपसो विधाता, क्षमाभिधः श्रीनिलय धरित्र्याम् ।
जीयाज्जितानेकपरीपहारिः, सद्बोधयन् भव्यगण श्चिर सः ॥२७॥
भ्रातास्ति तस्य प्रथित' पृथिव्या, सद्ब्रह्मचारी जिनदासनामा ।
तेनेति तेने चरित पवित्र, जम्ब्वादिनाम्नो मुनिसत्तमस्य ॥२८॥
देशे विदेशे सततं विहार, वितन्वता येन कृताः सुलोकाः ।
विशुद्धसर्वज्ञ मत-प्रवीणा., परोपकारव्रततत्परेण ॥२६॥
स ब्रह्मचारी किल धर्मदासस्तस्यास्तिशिष्यः कश्चिद्वद्धसख्य' ।
सोजन्यवल्लीजलदः कृतोय, तन्त्रोगतो व्याकरणप्रवीणः ॥३०॥
कविर्महादेव इति प्रसिद्धस्तन्मित्रमास्ते द्विजवशरत्नम् ।
महीतले नूनमसौकृत(ति)श्च साहाय्यतस्तस्य सुधर्महेतोः ॥३१॥
ग्रथः कृतोऽय जिननाथभक्त्या गुणानुरागाच्च महामुनीनाम् ।
पूजाभिधानाद्रहितेन नित्य(नून)महाप्रशस्तः परमार्थबुद्धया ॥३२॥

× × × ×

एकविंशतिप्रमाणानि शतानि च चरित्रके ।
त्रिंशद्युक्तानि श्लोकाना शुभाना सति निश्चितम् ॥३७॥

इति श्रीजम्बूस्वामिचरित्रे भ० सकलकीर्तिशिष्य-ब्रह्मजिनदास-विरचिते विद्युच्चर महामुनि-सर्वार्थसिद्धिगमनो नामैकादशमः सर्गः ॥११॥

८. सुदर्शनचरित्र (विद्यानंदी-मुमुक्षु)

आदिभाग —

ज्ञानरत्नाब्धितारेश सर्वविद्याधिप प्रभु ।
आदिदेव-नमस्यामि भव्यराजीवभास्कर ॥१॥
चद्रप्रभोः द्युतिः पायात्सतामंतःप्रकाशिनी ।
नित्यं करोति चद्रस्य न कृष्णे सातततोधिका ॥२॥
कर्मारातिजये शूर वदे शाति शिवश्रिये ।
संसारवनदावाग्नौ पतज्जीवेषु तायिन ॥३॥

स्मरादीना विजेतारं त वीर प्रणमाम्यह ।
ज्ञानलक्ष्म्या हि भर्त्तार निःप्रत्यूह च शकर ॥४॥
शत्रूणा ये विजेतारश्चाभ्यतरनिवर्त्तिना ।
प्रणमामि जिनान् शेषान् सर्वपापापनुत्तये ॥५॥
सुदर्शनमुनि वदे धीर सद्ब्रह्मचारिणं ।
येन कर्मारिमाहत्य प्राप्तं सिद्धत्वमद्भ ुत ॥६॥
तनुता गुरवः सर्वे पूज्या मे शर्मसपदम् ।
सर्वविघ्नहरा वंद्यास्तुत्याः सुरनराधिपैः ॥७॥
जिनराजमुखोत्पन्ना विमला ज्ञानसपदम् ।
दायिनीं शारदा स्तोष्ये मुहुरज्ञानहानये ॥८॥
मोहाधकारतरिणिं तपस्तेजोऽनुसारिण ।
गणेश गौतम वदे सयतं जगदुत्तम ॥९॥
कवित्व-नलिनीग्राम-निबोधन-सुधाघृणि ।
वद्यैर्वंद्यमह वदे कुदकुदाभिध मुनिं ॥१०॥
यस्य यशोरवेर्नष्टा कृष्णास्या बौद्धकौशिका· ।
स्त ष्येऽकलंकसूरिं त मोह-मारग-कन्धरम् ॥११॥
क्रोधसारगकीलाल जिनसेनमहाकविं ।
कुवादिहंससारग वदेऽह तद्गुणाप्तये ॥१२॥
आवश्यकलता कन्द-प्रमारण-घनागमं ।
रत्नकीर्तिमह भक्त्या स्तौमि गच्छाधिप विभु ॥१३॥
परवादि-महाकव्याद्दारणे लक्ष्मणाग्रज ।
वागर्थमिह वंदेऽह प्रभेन्दुं सूरिसत्तम ॥१४॥
क्षमा-सर्वस्व-धरणिं बोधबीजस्य भूमिका ।
मुनीन्द्र गतसन्देह पद्मनन्दि स्तुवेऽनिशम् ॥१५॥
जीवाजीवादितत्त्वाना देशकं च गुणार्णव ।
देवेन्द्रकीर्तिं भक्त्याऽह मुनि नौमि मुनीश्वरम् ॥१६॥

विद्यानन्दि-मुनीन्द्रेण तस्य शिष्येण धीमता ।
स्वस्यान्यस्योपकाराय दिने जातु मनोहर ॥१७॥
चिन्तित मानसे श्रेयो यतिना तत्कथ भवेत् ।
शुभोपदेशतोऽस्माक पुनस्तस्य च योगतः ॥१८॥ (युग्म)
येन श्रुतेन भव्यानामघ याति भवार्जितं ।
सुदर्शनमुनेर्वृत्तवक्ष्येऽहं तत्समासतः ॥१९॥

अन्तभाग —

योगत्रयेषु निष्णातः विशालकीर्तिशुद्धधीः ।
श्रीकुंदकुदमताने बभूव मुनिसत्तम· ॥९८॥
तत्पट्टेऽजनि विख्यात पंचाचारपवित्रधीः ।
शुभकीर्तिमुनिश्रेष्ठः शुभकीतिः शुभप्रद· ॥९९॥
धर्मचन्द्रस्ततो रत्नकीर्तिः शुद्धवचोनिधि· ।
प्रभेन्दुः पद्मनन्दिश्च ख्यातः कामाहिमर्द्दनः ॥१००॥
भारतीगच्छपकेज-विकाशन-दिवाकरः ।
देवेन्द्रनामकीर्त्यंते कीर्त्यंते लोकविश्रुतः ॥१०१॥
विद्यानन्दिमुनिख्यातस्तस्य शिष्यो गुणाग्रणीः ।
सुदर्शनस्य तेनेद चरित शर्मणे कृत ॥१०२॥
तनुता साधव सर्वे चतु·सघसमुद्भवा· ।
मया कृति(त)मिद शोध्यं लोके तैर्विशदाशयैः ॥१०३॥
ये लेखयति लिखते पठति पाठयति च ।
सुदर्शनमुनेरेष चरित्र ते सुखाश्नुते ॥१०४॥
यदक्षरस्वरैर्मात्राहीन प्रमादतो इह ।
त शोध्यं शुद्धचरितैः मुनिभिः मे कृत तथा ॥१०५॥
गान्धारपुर्या जिननाथचैत्ये छत्रध्वजाभूषितरम्यदेशे ।
कृतं चरित्रं स्वपरोपकारकृते पवित्रं हि सुदर्शनस्य ॥१०६॥

निन्य नमामि तमहं जिनपार्श्वनाथं पद्मावती-धरणयक्ष-नुतं त्रिकालं ।
येनाखिल निरासित किलकर्मजालं नाल क्षमो रचयितु स्तवनं तदीय ॥१०७॥

जिनान्तिमं नागनरेंद्रवद्यं, श्रीवर्द्धमान गतरागवधं ।
अतातिगं सर्वगुणाम्बुराशिं, वंदे भवाब्ध्युत्तरणैकहेतोः ॥१०८॥

पचैते परमेष्ठिनः सुखकराः कारुण्यपूर्णाशयाः,
सार्द्धं श्रीजिनधर्म आगमयुतः सद्भव्यराशिस्तुतः ।
चैत्य श्रीजिननायकस्य सतत चैत्यालयं मेरुय(?) वै,
शश्वन्मे शरण भवाब्धितरण भूयाद्भवापन्नुदे ॥१०९॥

इति श्रीसुदर्शनचरित्रे पचनमस्कारमाहात्म्यप्रदर्शके मुमुक्षुश्रीविद्यानन्दि-विरचिते सुदर्शनमहामुनिमुक्तिगमनो नाम द्वादशमः परिच्छेदः समाप्तः ।
संवत् १७७९ वर्षे शुभं भव । [दिल्ली, धर्मपुरा, नयामन्दिर ।

९. सुदर्शनचरित्र (मुमुक्षु विद्यानन्दी)

आदिभाग :—

नत्वा पचगुरून् भक्त्या पंचमं गतिनायकान् ।
सुदर्शनमुनेश्चारुचरित्र रचयाम्यहं ॥ १ ॥
येषां स्मरणमात्रेण सर्वे विघ्ना घना यथा ।
वायुना प्रलय याति तान्स्तुवे परमेष्ठिनः ॥२॥

(इसके बाद वृषभादि चतुर्विंशतितीर्थंकरों तथा सिद्धोंका स्मरण है)

जिनेन्द्र-वदनाम्भोज-समुत्पन्ना सरस्वती ।
सस्तुवे त्रिजगन्मान्या सन्मतेव सुखप्रदा ॥१८॥
यस्याः प्रसादतो नित्यं सतां बुद्धिः प्रसर्पति ।
प्रभाते पद्मनीवोच्चैस्ता स्तुवे जिनभारतीं ॥१९॥
नमामि गुणरत्नानामाकरान्-श्रुतसागरान् ।
गौतमादिगणाधीशान् ससाराम्भोधितारकान् ॥२०॥

काष्ठासंघवरे च माथुरवरे गच्छे गणे पुष्करे
देवः श्रीजगदादिकीर्तिरभवत्ख्यातो जितात्मा महान् ॥१॥
तच्छिष्येण च मंदतान्वितधिया भट्टारकत्व यता
शुभद्दै ललितादिकीर्त्यभिधया ख्यातेन लोके ध्रुवम् ।
राजच्छ्रीजिनसेनभाषितमहाकाव्यस्य भक्त्या मया
संशोध्यैव सुपठयता वुधजनैः क्षान्ति विधायादरात् ॥२॥

१६. पंचनमस्कार-दीपक (भ० सिंहनन्दि)

आदिभाग :—

नमाम्यर्हन्त देवेशं लक्ष्मीरात्यतिकी स्वयं ।
यस्य निर्द्धूत-कर्मेन्ध-धूमस्यापि विराजते ॥१॥

अन्तभाग :—

श्रीमूलसघे वरपुष्कराख्ये गच्छे सुजातः शुभचन्द्रसूरिः ।
तस्याऽत्र पट्टेऽजनि सिंहनन्दिर्भट्टारकोऽभूद्विदुषा वरेण्यः ॥५३॥
तेनेद रचितं ग्रथं नाम्ना पचनमस्कृति-
दीपक विस्तरभिया संक्षिप्त चाल्पमेधसा ॥५४॥
अब्दैस्तत्त्वरसर्तुचद्रकलिते (१६६७) श्रीविक्रमादित्यजे
मासे कार्तिकनामनीह धवले पक्षे शरत्सभवे ।
वारे भास्वति सिद्धनामनि तथा योगेषु पूर्णातिथौ
नक्षत्रेऽश्विनिनाम्नि तत्त्वरसिकः पूर्णीकृतो ग्रथकः ॥५५॥
श्लोकं सहस्रगणित वक्तु. श्रोतुः सुखप्रदं ।
ग्रन्थस्य पंचनत्याख्यदीपकस्याऽस्य तिष्ठता ॥५६॥
इति बहुतरमपि फलविषय पंचनमस्कारग्रन्थे सक्षिप्य पूर्णीकृतं ।

१७. द्विसंधानकाव्य-टीका (पं० नेमिचन्द्र)

आदिभाग :—

श्रीमान् शिवानन्दनयीशवंद्यो भूयाद्विभूत्यै मुनिसुव्रतो वः ।
सद्धर्मसंभूतिनरेन्द्रपूज्यो भिन्नेन्द्रनीलोल्लसदगकांतिः ॥१॥
जीयान्मृगेन्द्रो विनयेन्दुनामा संवित्सदाराजितकठपीठः ।
प्रत्तीववादीभ-कपोलभित्ति प्रमाक्षरैः स्वैर्नखरैर्विदार्य ॥२॥
तस्याथ शिष्योऽजनि देवनन्दी सद्ब्रह्मचर्यव्रत-देव-नन्दी ।
पादाम्बुजद्वंद्वमनिद्यमर्च्यं तस्योत्तमागेन नमस्करोमि ॥ ३ ॥
त्रैलोक्यकीर्तेश्चरणारविंदं पारं भवार्णोधितटीं[1] प्रणम्य ।
पिपासता राघव-पाडवीया टीका करिष्ये पदकौमदी ता ॥४॥

अन्तभाग :—

इति निरवद्यविद्यामण्डनमण्डित-पण्डितमण्डली-मण्डितस्य पट्तर्क-चक्रवर्तिनः श्रीमद्विनयचन्द्रपण्डितस्य गुरोरतेवासिनो देवनन्दिनाम्नः शिष्येण सकलकलोद्भव-चारुचातुरी-चंद्रिकाचकोरेण नेमिचन्द्रेण विरचिताया द्विसंधानकवेर्धनंजयस्य राघवपाडवीयापरनाम्नः[2] काव्यस्य 'पद-कौमुदी'नाम दधानाया टीकाया श्रीरामकृष्णयुधिष्ठराभ्युदयवर्णनं[3] नामाष्टा-दशः सर्गः समाप्तः ॥१८॥

१८. ज्ञानसूर्योदय-नाटक (भ० वादिचन्द्र)

आदिभाग :—

अनाद्यनन्तरूपाय पंचवर्णात्ममूर्त्तये ।
अनंतमहिमाप्ताय सदौंकार नमोस्तु ते ॥१॥

---

१ 'पारे नयार्णोदधिसं' इति आरा सि० भ० प्रतौ पाठः ।
२ 'राघवपाडवीयाभिधानस्य' इति आरा सि० भ० प्रतौ पाठः ।
३ 'नायकाभ्युदय-रावण-जरासंध-वर्णनं' इति आ०सि०भ०प्रतौ पाठः ।

तस्मादभिन्नरूपस्य वृषभस्य जिनेशतुः ।
नत्वा तस्य पदांभोज भूषिताऽखिलभूतल ॥२॥
भूपीठभ्रातभूताना भूयष्ठानन्ददायिनीं ।
भजे भवापहा भाषां भवभ्रमणभजिनीं ॥३॥
येषा ग्रन्थस्य सदर्भो प्रोत्स्फुरीति विदा हृदि ।
ववदे तान् गुरून् भूयो भक्तिभारनमच्छिर ॥४॥

नान्द्यते सूत्रधार.—आदिष्टोस्मि ।

। ब्रह्मश्रीकमलसागर—ब्रह्मश्रीकीर्तिसागराभ्या सकलागमामवारिधि-चंद्रावताराणा सरस्वतीगच्छशृंगारहाराणा श्रीमन्मूलसघोदयाद्रिप्रकटन-प्रभाकराणा चचच्छिखि-शिखडशोभितकरकमलाना त्रिविद्यविद्याचक्रवर्तिना दिगम्बरशिरोमणीना श्रीमत्प्रभाचन्द्रसूरीश्वराणा शिष्यैरस्मद्गुरुभिश्च श्रीमद्वादिचन्द्रसूरिभिर्निर्माय ज्ञानसूर्योदय नामनाटक प्रदत्तमासीत् तत्सभ्याना पुरतोऽभिनेतव्य अस्ति चाधुना सर्वेषा कुतूहललालसं चेतः । इति प्रस्तावः ।

अन्तभाग :—

मूलसघे समासाद्य ज्ञानभूप बुधोत्तमाः ।
दुस्तर हि भवाभोधिं सुतरिं मन्यते हृदि ॥१॥
तत्पट्टामलभूषण समभवद्दैगम्बरीये मते
चचद्बर्हकरः स भाति चतुरः श्रीमत्प्रभाचन्द्रमाः ।
तत्पट्टेऽजनि वादिवृन्दतिलकः श्रीवादिचन्द्रो यति-
स्तेनाय व्यरचि प्रबोधतरणिर्भव्याब्जसंबोधनः ॥२॥
वसुवेदरसाब्जाके (१६४८) वर्षे माघे सिताष्टमी-दिवसे ।
श्रीमन्मधूकनगरे सिद्धोऽय बोधसरभः ॥३॥ १८३॥

इति सूरिश्रीवादिचन्द्र विरचिते ज्ञानसूर्योदयनाटके चतुर्थोऽध्याय.॥४॥

सपूर्णोयं ग्रन्थः । स्वस्ति ।

१६. षोडशकारणव्रतोद्यापन (केशवसेन सूरि)

आदिभाग :—

श्रीमंतं धरणीश्वरार्च्चितपदं पापापहृ हंसभं
हंसास्य हरिहृत्सदोदयमहृ स्तुत्वार्षभं देवता ।
भक्त्या षोडशकारणार्च्चनविधि विद्वज्जनोल्लासक ।
कुर्वे केशवसेनसूरिरतुलश्रीधर्म्मणे सन्मणिः ॥१॥

अन्तभाग :—

दिक्संघेऽभूद्रामसेनक्रमेण श्रीमान् विद्वद्रत्नभूषो भदंतः ।
चारित्राभो जातभानुश्चकास्ति, तत्पट्टे वै श्रीजयाद्यतकीर्तिः ॥१३॥
वेदनंदरसचंद्रवत्सरे (१६६४) मार्गमासि सितसप्तमीविधौ(तिथौ) ।
रामनामनगरे मया कृतार्च्चान्यपुण्यनिवहाय सूरिणा ॥१४॥
श्रीमत्केशवसेनसूरिगदिता पूजा पठत्येव ये
शृण्वन्ति त्वथ पाठयन्ति सुनरा नार्यश्च सद्भावतः ।
ये चात्रैव लिखाप्य पुस्तकमथ प्रायः सुपात्राय वै
दास्यत्यर्थमिनप्रतापमखिलैश्वर्यं लभतेऽन्तके ॥१५॥
इति श्रीआचार्यकेशवसेन-विरचितं षोडशकारणव्रतोद्यापनं संपूर्णं ॥

२०. चतुर्दशीव्रतोद्यापन (अक्षयराम)

आदिभाग :—

श्रीवीरं शिरसानम्य वक्ष्ये सक्षेपतस्तरा ।
चतुर्दश्युपवासानामष्टषष्ठिशतप्रमा ॥१॥

अन्तभाग :—

शास्त्राब्धेः पारगामी परममुनिरभून्मंडलाचार्य्यमुख्यः
श्रीविद्यानन्दिनामा निखिलगुणनिधिः पुण्यमूर्तिः प्रसिद्धः ।

अन्तभाग :—

वक्तु सर्वमिह क्षमः किल भवेत्कस्योत्तमा भारती ॥१५॥

इति श्रीमुमुक्षु सिद्धान्तचक्रवर्ति-श्रीकुन्दकुन्दाचार्यानुक्रमेण श्रीभट्टारक-विश्वभूषण-विरचिते श्रीमज्जिनेन्द्रपुराणान्तर्गत-भगवत्पूजाफल-व्यावर्णने श्रीकरकण्डु-सहस्रारकान्तिवर्णनो नाम चतुर्थोधिकारः सम्पूर्णः।

करकण्डुकथा सम्पूर्णा।

२७. अनन्तजिन-व्रतपूजा (भ० गुणचन्द्र)

आदिभाग :—

श्रीसर्वज्ञं नमस्कृत्य सिद्धं साधूंस्त्रिधा पुनः।
अनन्तव्रतमुख्यस्य पूजा कुर्वे यथाक्रमम् ॥१॥

अन्तभाग :—

इत्यनतविधेः पूजा व्यरचद्गुणचन्द्रकः।
श्लोकः सप्तशती पचसप्तत्यूना यतीश्वरः ॥१॥

सवत्षोडशत्रिंशत्रैष्यफलके(१६३३) पक्षेऽवदाते तिथौ
पक्त्या गुरुवासरे पुरुजिनेट्-श्रीशाकमार्गे पुरे।
श्रीमद्हुम्बडवशपद्मसविता हर्षाख्यदुर्गो वणिक्
सोय कारितवाननतजिनसत्पूजा वरे वाग्वरे ॥२॥

श्रीमूलसघेघविश्रातिनीह प्रद्योतमानेऽन्यमतानि नेशुः।
सारस्वतो गच्छ इहैव नद्यात् श्रीमद्बलात्कारगणाभियुक्ते ॥३॥

श्रीरत्नकीर्तिभगवज्जगता वरेण्यश्चारित्ररत्ननिवहस्य बभार भारम्।
तद्दीक्षितो यतिवरो यशकीर्तिकीर्तिश्चारित्रजितजनोद्दहिता सुकीर्तिः॥४॥

तच्छिष्यो गुणचन्द्रसूरिरभवच्चारित्रचेतोहर-
स्तेनेद वरपूजन जिनवरानन्तस्य युक्त्याऽरचि।
येऽत्र ज्ञानविकारिणो यतिवरास्तै शोध्यमेतद्ध्रुवं
नद्यादारविचद्रमक्षयतर संघस्य मागल्यकृत् ॥५॥

इत्याचार्यगुणचन्द्रविरचिता श्रीअनन्तनाथजिनपूजा उद्यापनसहिता समाप्ता।

२८. पद्मपुराण (भ० धर्मकीर्ति)

आदिभाग :—

शक्राली-मौलि-रत्नांशु-वारिधौत-पदाम्बुजं।
ज्ञानादिमहिमव्यासविष्टपं विष्टपाधिपं ॥१॥
मुनिसुव्रतनामानं सुव्रताराधितक्रमं ।
वंदे भक्तिभरानम्रः श्रेयसे श्रेयसि स्थितं ॥२॥

अन्तभाग :—

अथाभवन्मूलसुसंघ एव गच्छे सरस्वत्यधिके(भिधे) गणे च।
बलात्कृतौ श्रीमुनिपद्मनन्दी श्रीकुंदकुंदान्वयजप्रसूतिः ॥२४॥
देवेन्द्रकीर्तिश्च बभूव तस्य पट्टे महिष्टे सुमहानुभावः ।
त्रिलोककीर्तिस्तत तत्र(एव) दीक्षो भट्टारकस्तत्पदलक्ष्यनिष्ठः॥२५॥
सहस्रकीर्तिर्मुनिवृन्दसेव्यस्तत्पट्टपाथोधिनिशाधिनाथः।
तदीयशिष्यः पद-पद्मनन्दी बभूव नाम्ना मुनिपद्मनन्दी ॥२६॥
पट्टे तदीयेऽखिलसंघसेव्यो यशःसुकीर्तिः शुभकीर्तिसिंधुः ।
बभूव भट्टारक-सत्पदस्थो मुनिः स्मरारेः हनने प्रवीणः ॥२७॥
तत्पट्टपंकेजविकाशनेयः साम्यं विभर्त्तीह सहस्रभानोः ।
हृतस्मरार्जितदुःकषायो(?) विनष्टदुर्भावचयो महात्मा ॥२८॥
यं वीक्ष्य लोके व्रतभासुरागं तपस्विनं शास्त्रविदं मुनीशं ।
भजति मिथ्यात्वचयं न जातु क्रियापरं शीलनिधिं सुशांतं ॥२९॥
यं सेवमाना सततं सुशिष्या विज्ञात-तत्त्व-व्रत-भासुरागाः ।
भवंति नूनं जगती-प्रकाशास्तपःकृशांगा रविणो गुणौघैः ॥३०॥
यं सेवमानः समकुक्षिजातं मुनीशमासीदुद्धररत्नपालः ।
'पटुत्व-वाग्मित्व-कवित्त्व-वेत्ता' ····· 'सद्गुणरत्नपात्र ॥३१॥
एवं विधोऽसौ मुनिसंघसेव्यो भट्टारको भामितदिक्समूहः ।
संघस्य कल्याणततिः प्रदेया नाम्ना गुरुः श्रीललितादिकीर्तिः ॥३२॥

तच्छिष्यस्तत्पदस्थो व्रतनिचययुतो जैनपादाब्जभृंगो
नाम्ना धर्मादिकीर्तिर्मुनिविमलमनास्तेन चैतत्पुराणं।
स्वल्पप्रज्ञेन दृब्धं निजदुरितचय-प्रक्षयाय हिताय
भव्याना च परेषा श्रवण-सुपठने प्रोद्यतानामजस्र ॥३३॥
मूलकर्ता पुराणस्य श्रीजिनश्चोत्तरस्तथा।
गणीशो यतयोन्ये च उत्तरोत्तरकर्तृकाः ॥३४॥
इद श्रीरविषेणस्य पुराण वीक्ष्य निर्मित।
चिर स्थेयात् क्षितौ भव्यैः श्रुत चाधीतमन्वह ॥३५॥
सवत्सरे द्व्यष्टशते मनोज्ञे चैकोनसप्तत्यधिके(१६६९) सुमासे।
श्रीश्रावणे सूर्यदिने तृतीयातिथौ च देशेषु हि मालवेषु ॥३६॥

× × × ×

इति श्रीपद्मपुराणे भट्टारकश्रीधर्मकीर्तिविरचिते पद्मदेवनिर्वाणगमनं नाम चतुश्चत्वारिंशः पर्वः ॥४४॥

२६. हरिवंशपुराण (भ० धर्मकीर्ति)

आदिभाग :—

श्रीमंतं त्रिजगन्नाथ नेमिनाथं जिनाधिपम्।
अरिष्टखडने नेमिं वन्देऽनन्तगुणार्णवम् ॥१॥
पुरुदेवादि-वीरान्तान् शेषास्तीर्थंकरान्मुदा।
वन्देऽनन्तगुणालीढान्प्रातिहार्यादिभूषितान् ॥२॥
सप्तत्यग्रशतक्षेत्र्यान्सतो भूतान्भविष्यतः।
नमामि श्रीजिनान् घातिकर्मसघातघातकान् ॥३॥
सिद्धानष्टगुणोपेतान्पचाचारादिसगतान्।
आचार्यान्पाठकान्वंदे तथासाधूंस्तपोधनान् ॥४॥
जिनेन्द्र-वक्त्र-संजाता सुरासुरमुनीडिताम्।
भारतीं नौमि दुर्जाड्य-नाशिनीं विश्वदीपिकाम् ॥५॥

वन्दे वृषभसेनादीन् गौतमान्तान् गणेशिनः ।
चतुर्ज्ञानधरान्सम्यक् पूर्वाङ्ग-रचनोद्यतान् ॥६॥
कुन्दकुन्दादिकाचार्यान् कवीन्द्रान्नौमि भक्तितः ।
प्रदीपायितमेतत्र (?) यैर्मिथ्यात्वतमोवृते ॥७॥
तथा ललितकीर्त्याख्यमीडे भट्टारकं गुरुम् ।
क्रियते यत्प्रसादेन कृतिरेषा बुधोचिता ॥८॥

अन्तभाग :—

वीरेणोक्तं पुरा चैतद्गौतमाद्यैस्ततोऽखिलम् ।
श्रुतकेवलिभिस्तद्वत्ततः श्रीगुणभद्रकैः ॥६०॥
सङ्क्षेपेण च तद्वीक्ष्य प्रोक्तं तच्च मया पुनः ।
उक्तमेतच्चिरं नन्द्यात्पठितं पाठितं बुधैः ॥६१॥

नानाकथातत्त्वरहस्यपूर्णं पूजाव्रतत्याग-तपोगुणाढ्यम् ।
स्वर्गापवर्गोरुनिदानभूतं पुराणमेतत्सुचिरं प्रजीयात् ॥६२॥
श्रीमूलसंघेऽजनि कुन्दकुन्दः सूरिर्महात्माखिलतत्त्ववेदी ।
सीमंधरस्वामिपदप्रवन्दी पञ्चाह्वयो जैन-मत-प्रदीपः ॥६३॥
तदन्वयेऽभूद्यशकीर्तिनामा भट्टारको भाषितजैनमार्गः ।
तत्पट्टवान् श्रीललितादिकीर्तिर्भट्टारकोऽजायत सत्क्रियावान् ॥६४॥

जयति ललितकीर्तिर्ज्ञाततत्त्वार्थसार्थो
नय-विनय-विवेक-प्रोज्वलो भव्यबन्धुः ।
जनपदशतमुख्ये मालवेऽल यदाज्ञा
समभवदिह जैन-द्योतिका दीपिकेव ॥६५॥
तत्पट्टाम्बुजहर्ष-वर्ष-तरणिर्भट्टारको भासुरो
जैनग्रन्थविचार-केलिनिपुणः श्रीधर्मकीर्त्याह्वयः ।
तेनेदं रचितं पुराणममलं गुर्वाज्ञया किञ्चन
सङ्क्षेपेण विशुद्धिनापि सुहृदा तच्छोध्यमेतद् ध्रुवम् ॥६६॥

यशोलाभाभिमानार्थं न ग्रन्थोऽयं कृतो मया ।
स्वश्रेयसे तथान्येषामुपकाराय केवलम् ॥९७॥
एतद्ग्रन्थकृते वाञ्छे फलं कर्मक्षयं ध्रुवं ।
ततः संसारवाराब्धिः सुतरां मे भविष्यति ॥९८॥
हीनाधिकमभूत्किंचिद्यदिह विदुषांवरै-
स्तच्छोध्यं कृपया तत्र हास्यः कार्यो न मे मनाक् ॥९९॥
को हेयो विदुषामनादृतिरथ कः पोषणीयोऽपि कः ।
को मासो गदितश्च का वरनदी किं पाठनीयं पुरा ॥
निंद्या का महता तथा जिनपतेः का पूजनीया मुदा ।
ज्ञातव्यस्त्रिकवर्णनामसुगतैर्मध्याक्षरैर्ग्रंथकृत् ॥१००॥

अधमः । कार्मणः । स्वकीयः । कार्तिक । यमुना । गणित । विकृतिः । प्रतिमा । धर्मकीर्तिमुनिकृति ।

वर्षे द्व्यष्टशते चैकाग्रसप्तत्यधिके(१६७१) रवौ ।
आश्विने कृष्णपंचम्यां ग्रन्थोऽयं रचितो मया ॥१०१॥

३०. हरिवंसपुराण (प० रामचन्द्र)

आदिभाग :—

श्रीमते नेमिनाथाय केवलज्ञानमूर्तये ।
स्याद्वादवादिने नित्यं नमोस्तु भवहारिणे ॥१॥
यल्लोकेन्द्रानलं नेमिं प्रह्वीकृत्य गुणार्णवम् ।
हरिवंशपुराणस्य समासो वर्ण्यते मया ॥२॥
जिनसेन-समुद्रस्य पारं गन्तुं न पार्यते ।
भव्यैः कालप्रभावेन तदर्थं-श्रुति-सुन्दरः ॥३॥
लम्बकंचुकवंशेऽसौ जातो जन-मनोहरः ।
शोभनाङ्गी सुभगाख्यो देवकी यस्य वल्लभा ॥४॥

तदात्मजः कलावेदी विश्वगुणविभूपितः ।
रामचन्द्राभिधः श्रेष्ठी मल्हणा वनिता प्रिया ॥५॥
तत्सूनुर्जनविख्यातः शीलपूजाद्यलकृतः ।
अभिमन्युर्महादानी तत्प्रार्थनवशादसौ ॥६॥
शृण्वन्ति य इद भक्त्या भव्याः सुकृतमूर्तयः ।
प्राप्नुवन्ति महाभोगान्तपो(तो)ऽपवर्गमच्युतम् ॥७॥
चारुवाक्यप्रबोधेन कथा सकलनात्मना ।
प्रोच्यते जिनसेनेन शृण्वन्तु भुवि कोविदः ॥८॥

अन्तभाग :—

यादवान्वय-विभूषिणी-भुवा दान-पूजन-विनोद-चेतसा ।
कारितेयमभिमन्युना मुदा सान्वयश्रवणहेतुका कथा ॥३॥
यदुक्तं जिनसेनेन सूरिणा भव्यबंधुना ।
तन्मया रामचन्द्रेण संक्षेपेणैव भाषितम् ॥४॥
यावद्रत्नाकरो लोके यावन्मेरुधुरीशिता ।
तावदयं समासो हि तिष्ठता महदाशये ॥५॥

इति श्रीहरिवंशपुराणसमासे अभिमन्युश्रेष्ठिनामांकिते नेमिनाथ-परिनिर्वाणवर्णनं पंचमाऽधिकरणं समाप्तं ॥

३१. जयपुराण (ब्रह्म कामराज)

आदिभाग :

श्रीमन्तं श्री(त्रि)जगन्नाथं वृषभं नृसुरार्चितम् ।
भव-भीति-निहन्तारं वन्दे नित्यं शिवाप्तये ॥१॥

अन्तभाग :—

प्रकथ्यतेऽन्वयोऽथात्र ग्रंथकृद्ग्रंथभक्तयः ।
मूलसंघे वरे वीरपारंपर्याच्चतुर्गुणे ॥७६॥

अभूद्गणो बलात्कारः पद्मनन्द्यादिपंचसु ।
नामास्मिन् च मुनिग्रावशारदाव्वलवाचकात् ॥८०॥
आचार्यात्कुन्दकुन्दाख्यात्तस्मादनुक्रमादभूत् ।
स सकलकीर्तियोगीशो ज्ञानी भट्टारकेश्वरः ॥८१॥
येनो[द्]धृतो गतो धर्मो गुर्जरे वाग्वरादिके ।
निर्ग्रंथेन कवित्वादिगुणेनेवार्हता पुरा ॥८२॥
तस्माद्भुवनकीर्तिः श्रीज्ञानभूषणयोगिराट् ।
विजयकीर्तयोऽभूवन् भट्टारकपदेशिनः ॥८३॥
तेभ्यः श्रीशुभचन्द्रः श्रीसुमतिकीर्तिसंयमी ।
गुणकीर्त्याह्वया आसन् बलात्कारगणेश्वराः ॥८४॥
ततः श्रीगुणकीर्तेर्यः पट्ट-व्योमदिवाकरः ।
वादिना भूषणो भट्टारकोऽभूद्वादिभूषणः ॥८५॥
तत्पट्टाधीश्वरो विश्वव्यापिनिश्वेतकीर्तिधृत् ।
रामकीर्तिरभूदन्य[द्]रामो वा सुखदैर्गुणैः ॥८६॥

तस्मात्स्वगच्छपतिरस्ति स पद्मनन्दी निष्णातकोकसुखकारकपद्मनदी ।
भट्टारको जिनमताम्बर-पद्मनदी श्रीरामकीर्तिपदभूधर-पद्मनंदी ॥८७॥
यः शब्दतर्कपरमागमविद्विरागी रागी शिवे विहित-सर्वतपःसमूहः ।
भात्यत्र वस्त्रपरिवर्जन-जातरूपः काले कलौ परिहृताखिलवस्तुलोभः ॥८८॥

वस्त्राणा त्यजनत्त्तणेऽस्य यतिनो वशादिवालस्यविद्-
धृत्वाग्रे समरादिसिंहनृपतिः खड्ग पुरस्येति सः ।
प्राहाऽसिं प्रवितीर्थं मा मुनिवर त्व चाम्बराणि प्रभो
राजन्य कुरु सप्रगृह्य स तदा स्वाङ्गीकृतान्नाचलत् ॥८६॥

गिरिपुराधिपतिर्नृपपुगवस्तमभिवीक्ष्यमुदोल्लसते प्रभुः ।
गिरिधरादिमदाससमाह्वयः जलधिरम्बुचयेन विधु यथा ॥६०॥
तदुपदेशवशेन तदीयसत्प्रवरपुण्यभराकृतसाहसं ।
जयपुराणमिद तनुबुद्धिना रचितमगजनाथसुवर्णिना ॥६१॥

नाग्रध्रवंशभव-पडितजीवराज-मेधाबलात्सकलसौख्यकरकृतोय ।
जैनालयः स्थपति-बुद्धिभरादपूर्वो ग्रथानु वा जयभृतो जिनदर्शनोव्य(?)॥६२
भट्टारकस्य गुरुबन्धुरभूत्प्रसिद्धो मेधावतः सुमतिकीर्तिमुनेर्गुणाढ्यः ।
आचार्यमुख्यसकलादिमभूषणाख्यस्तच्छिष्यसूरिरभवत्सनरेन्द्रकीर्ति ॥६३
पूर्णस्य वक्तृकवितादिगुणैरदभ्रैः शिष्यो बभूव नृपमान्यनरेन्द्रकीर्तेः ।
वर्णास्मराभवपुषः सहिलाद्रकाख्यः शिष्योस्ति तस्य जयसेवककामराजः॥६४

मात्रा-सधि-विभक्ति-लिङ्ग-वचनालकार-रीत्यादिभिः
प्रोक्तं यद्रहितं सरस्वति मया ग्रथेत्र सूरीश्वरैः ।
निर्वाह्यो चिदभावतः क्षम मयि त्व तद्धिते बालके
मातेवास्फुटवाग्रते शिवकरा तारुण्यकालाद्रुते(?)॥६५॥
दुःसंध्यादिमल विनाश्य गुणिनः सवीक्ष्य यूयं बुधा
हर्षतः कविचिल्लवं कुरुत भो ग्रथद्रुह स्वात्मनि ।
शुद्ध सज्जनतागुणादुदमिवाकृतादिनैर्मल्यद
गभीरं पृथुल त्रिवर्गसलिल पकं शरद्वाशराः(?)॥६६॥

भूयात्पुराणरचनाभवपुण्यतो मे सम्यक्पदेन सहितो भवसौख्यवर्गात् ।
अन्योरथकर्मजनकाद्विमुखस्य दकूचिचारित्ररत्ननिचयो न हितस्वतोन्यः॥६७॥

अमृतवार्द्धिखभूमिसुदर्शना विजयनामनगाचलमन्दिर(?) ।
चपलरूकसमूहैः सहिता द्रुमे(?) जयतु यावदिदं भुवनत्रये ॥६८॥
शिल्पिरुत्पादयत्येव जिनबिम्ब तथा कविः ।
शास्त्र तन्मान्यतामेति मान्यं तन्मानितं जनैः ॥६९॥

राष्ट्रस्यैतत्पुराण शकमनुजपतेर्मेदपाटस्य पुर्या
पश्चात्संवत्सरस्य प्ररचितमटतः पचपचाशतो हि ।
अभ्राभ्राद्यैकसंवच्छरनिकरयुजः(१५५५) फाल्गुणे मासि पूर्णे
मुख्यायामौद्याया सुकविविनयिनो लालजिष्णोश्च वाक्यात्॥१००॥
सकलकीर्तिकृत पुरुदेवजं समवलोक्य पुराणमिय कृतिः ।
जयमुनेर्गुणपालसुतस्य च बृहदल जिनसेनकृत कृता ॥१०१॥

३५. श्रेणिकचरित्र (भ० शुभचन्द्र)

आदिभाग:—

श्रीवर्द्धमानमानंद नौमि नानागुणाकरं ।
विशुद्धध्यानदीप्तार्चिहु तकर्मसमुच्चयं ॥१॥
बाल्येपि मुनि-संदेह-निर्नाशाद्यो जिनेश्वरः ।
सन्मतित्वं समापन्नः सन्मत्याख्या समाश्रितः ॥२॥
अमराहिफणामर्द्दान्महावीरसुनामभाक् ।
बाल्ये यो बलतां प्राप्तो वीराणां वीरतां गतः ॥३॥
जरत्तृणमिवात्यंतं राज्यं प्राज्यं नरेश्वरं(च नश्वरं) ।
मत्वा त्यक्त्वाश्रितो दीक्षां यो वीरो विश्ववंदितः ॥४॥

अन्तभाग:—

जयतु जितविपक्षो मूलसंघः सुपक्षो
हरतु तिमिरभारं भारती-गच्छवारः (वाणः=प्रकाशः?) ।
नयतु सुगतमार्गे शासनं शुद्धवर्गे
जयतु च शुभचंद्रं कुंदकुंदो मुनीन्द्रः ॥१७॥
तदन्वये श्रीमुनिपद्मनंदी विभाति भव्याकर-पद्मनन्दी ।
शोभाधिशाली वरपुष्पदंत सुकांति-संभिन्न-सुपुष्पदन्तः ॥१८॥
पुराण-काव्यार्थ विदांवरत्वं विकाशयन्मुक्तिविदांवरत्वं ।
विभातु वीरः सकलाद्यकीर्तिं कृतापकेनौ(?) सकलाद्यकीर्तिः ॥१९॥
भुवनकीर्तियतिर्जयताद्यमी भुवनपूरितकीतिचयं सदा ।
भुवनविम्बजिनागमकारणो भव-नघाम्बुद वातभरः परः ॥२०॥

तत्पट्टोदयपर्वते रविरभूद्भव्याम्बुजं भासयन्
सन्नेत्रास्त्रहरं तमो विघटयन्नानाकरैर्भासुरः ।
भव्यानां सुगतश्च विग्रहमतं श्रीज्ञानभूषः सदा
चित्रं चंद्रकसंगतः शुभकरं श्रीवर्द्धमानोदयः ॥२१॥

जगति विजयकीर्तिः पुण्यमूर्तिः सुकीर्तिः
जयतु च यतिराजो भूमिपैः स्पृष्टपादः ।
नय-नलिन-हिमांशुर्ज्ञानभूषस्य पट्टे
विविध-परविवादि-क्ष्माधरे वज्रपातः ॥२२॥
तच्छिष्येण शुभेन्दुना शुभमनः श्रीज्ञानभावेन वै
पूतं पुण्यपुराणमानुषभवं संसारविध्वंसकः ।
नो कीर्त्या व्यरचि प्रमोहवशतो जैने मते केवलं
नाहंकारवशात्कवित्तमदतः श्रीपद्मनाभेर्हितं ॥२३॥
इदं चरित्रं पठतः शिवं वै श्रोतुश्च पद्मेश्वरवत्पवित्रं ।
भविष्णु संसारसुखं नृदेवं सभुज्य सम्यक्त्वफलप्रदीपं ॥२४॥
चद्राऽर्क-हेमगिरि-सागर-भू-विमान
गगानदीगमन सिद्धशिलाश्च लोके ।
तिष्ठंति यावदभितो वरमर्त्यशेवा(देवा ?)
स्तिष्ठतु कोविदमनोम्बुजमध्यभूताः ॥२५॥
इति श्रीश्रेणिकभवानुबद्ध-भविष्यत्पद्मनाभपुराणे पंचकल्याणवर्णनं नाम पचदशः पर्वः ॥१५॥

३६. पाण्डवपुराण (भ० शुभचन्द्र)

आदिभाग :—

सिद्ध सिद्धार्थसर्वस्वं सिद्धिदं सिद्धिसत्पद ।
प्रमाण-नय-संसिद्ध सर्वज्ञ नौमि सिद्धये ॥१॥
वृषभं वृषभं भार्तं वृषभाक वृषोन्नतं ।
जगत्सृष्टि-विधातारं वन्दे ब्रह्माणमादिमं ॥२॥
चन्द्राभं चन्द्रशोभाढ्यं चन्द्राच्यं चन्द्रसंस्तुतं ।
चन्द्रप्रभं सदाचन्द्रमीडे सच्चन्द्रलाञ्छनं ॥३॥

शान्ति शान्तेर्विधातार सुशात शातकिल्विषम् ।
तन्नमामि निरस्ताऽघ मृगाक षोडशं जिनम् ॥४॥
नेमिर्धर्मरथेनेमिः शास्तु सशितशासनः ।
जग(जीया)ज्जगत्त्रयीनाथो निर्जितानगसम्मद. ॥५॥
वर्धमानो महावीरो वीर' सन्मति-नामभाक् ।
स पातु भगवान् विश्व येन बाल्ये जितः स्मरः ॥६॥
गौतमो गौतमो गीष्पो गणेशो गणनायकः ।
गिरः गणनतो नित्य भातु भा-भारभूषितः ॥७॥
युधिष्ठिर कर्मशत्रु-युधिस्थिर स्थिरात्मक ।
दधे धर्मार्थससिद्ध मानसे महित मुदा ॥८॥
भीम महामुनि भीम पापारिक्षयकारणे ।
ससारासातशान्त्यर्थे दधे हृदि धृतोन्नति ॥६॥
अर्जुनस्य प्रसिद्धस्य विशुद्धस्य जितात्मनः ।
स्मरामि स्मरमुक्तस्य स्मररूपस्य सुस्मृतेः ॥१०॥
नकुलो वै सदा देवैः सेवित' शुद्धशासनः ।
सहदेवो वली कौल्यमलनाशी विभाति च ॥११॥
भद्रबाहुर्महाभद्रो महाबाहुर्महातपा· ।
स जीयात् सकल येन श्रुत ज्ञान कलौ विदा ॥१२॥
विशाखो विश्रुता शाखा सुशाखो यस्य पातु मा ।
स भूतले मिलन्मौलिहस्ताभूलोक-संस्तुत' ॥१३॥
कुन्दकुन्दो गणी येनोर्जयंतगिरिमस्तके ।
सोऽवताद्वादिता ब्राह्मी पाषाणघटिता कलौ ॥१४॥
समन्तभद्रो भद्रार्थो भातु भारतभूषणः ।
देवागमेन येनाऽत्र व्यक्तो देवागमः कृत' ॥१५॥
पूज्यपाद सदा पूज्य-पादः पूज्यैः पुनातु मा ।
व्याकरणार्णवो येन तीर्णो विस्तीर्णसद्गुण' ॥१६॥

अकलंकोऽकलंकः स कलौ कलयतु श्रुतं ।
पादेन ताडिता येन मायादेवी घटस्थिता ॥१७॥
जिनसेनो यतिर्जीयाज्जिनसेन कृतं वर ।
पुराणपुरुषाख्यार्थं पुराण येन धीमता ॥१८॥
गुणभद्रभदन्तोऽत्र भगवान् भातु भूतले ।
पुराणादौ प्रकाशार्थे येन सूर्यायितं लघु ॥१९॥
तत्पुराणार्थमालोक्य धृत्वा सारस्वतं श्रुतम् ।
मानसे पाण्डवाना हि पुराण भारत ब्रुवे ॥२०॥

× × × ×

वीरो विश्वगुणाश्रितो गुणगणा वीरं श्रिता सिद्धये ।
वीरेणैव विधीयते व्रतचयो वीराय स्वस्त्यस्तु च ॥
वीराद्वर्तत एव धर्मनिचयो वीरस्य सिद्धिर्वरा ।
वीरे याति जगत्त्रय जितमद संजायते निश्चितं ॥१५४॥

इति श्रीपाण्डवपुराणे महाभारतनाम्नि भट्टारकश्रीशुभचन्द्रप्रणीते ब्रह्मश्रीपाल-साहाय्यसापेक्षे श्रेणिकस्य जिनवन्दनोत्साहवर्णनं नाम प्रथमं पर्व ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि पद्मनन्दी तत्पट्टधारी सकलादिकीर्तिः ।
कीर्ति. कृता येन च मर्त्यलोके शास्त्रार्थकर्त्री सकला पवित्रा ॥१६७॥
भुवनकीर्तिरभूद्भुवनाधिपैर्भुवनभासनचारुमतिः स्तुतः ।
वरतपश्चरणोद्यतमानसो भवभयाहिखगेट् क्षितिवत् क्षमी ॥१६८॥
चिद्रूपवेत्ता चतुरश्चिरन्तनश्चिन्त्रद्भ्रप्रणश्चर्चितपादपद्मक ।
सूरिश्च ··न्द्रादिचयैश्चिनोतु वै चारित्रशुद्धि खलु नः प्रसिद्धिदा ॥१६९॥
विजयकीर्तियतिर्मुदितात्मको जितता(?)ऽन्यमतः सुगतैः स्तुतः ।
अवतु जैनमतः सुमतो मतो नृपतिभिर्भवतो भवतो विभुः ॥१७०॥
पट्टे तस्य गुणाम्बुधिव्रतधरो धीमान् गरीयान् व·

श्रीमच्छ्रीशुभचन्द्र एष विदितो वादीभसिंहो महान् ॥१७१॥
तेनेदं चरितं विचारसुकरं चाकारि चंचद्रुचा ।
पाडो' श्रीशुभसिद्धिसातजनकं सिद्धयै सुताना सदा ॥१७२॥
चन्द्रनाथचरितं चरितार्थं पद्मनाभचरितं शुभचन्द्रं ।
मन्मथस्य महिमानमतन्द्रो जीवकस्य चरितं च चकार ॥१७३॥
चन्दनायाः कथा येन दब्धा नान्दीश्वरी तथा ।
आशाधरकृतार्चायाः वृत्तिः सद्वृत्तशालिनी ॥१७४॥
त्रिंशच्चतुर्विंशतिपूजनं यः सद्वृद्धसिद्धार्चनमाव्यधत्त ।
सारस्वतीयार्चनमत्र शुद्धं चिंतामणीयार्चनमुच्चरिष्णुः ॥१७५॥
श्रीकर्मदाहविधिबंधुरसिद्धसेवा नानागुणौघ-गणनाथसमर्च्चनं च ।
श्रीपार्श्वनाथवरकाव्यसुपंजिकां च यः सच्चकार शुभचन्द्रयतीन्द्रचन्द्रः॥१७६॥
उद्यापनमदीपिष्ट पल्योपमविधेश्च यः ।
चारित्रशुद्धितपसश्च चतुस्त्रिंद्विंशात्मनः ॥१७७॥
संशयवदनविदारणमपशब्दसुखंडनं परं तर्कं ।
सतत्त्वनिर्णयं च वरस्वरूपसंबोधनीं वृत्तिं ॥१७८॥
अध्यात्मपद्यवृत्तिं सर्वार्थापूर्वसर्वतोभद्रम् ।
योऽकृत सद्व्याकरणं चिन्तामणिनामधेयं च ॥१७९॥
कृता येनाऽङ्गप्रज्ञप्तिः सर्वाङ्गार्थ-प्ररूपिका ।
स्तोत्राणि च पवित्राणि षड्वादाः श्रीजिनेशिना ॥१८०॥
तेन श्रीशुभचन्द्रदेवविदुषा सत्पाण्डवानां परं
दीप्यद्वंशविभूषणं शुभमनः भ्राजिष्णुशोभाकरं ।
शुंभद्भारतनाम निर्मलगुणं सच्छन्दचिन्तामणिं
पुष्यत्पुण्यपुराणमत्र सुकरं चाकारि प्रीत्या महत् ॥१८१॥
श्रीपालवर्णिना येनाकारि शास्त्रार्थसंग्रहे ।
साहाय्यं स चिरं जीयाद्वरविद्या-विभूषणः ॥१८२॥

× × × ×

श्रीमद्विक्रमभूपतेर्द्विकहते स्पष्टाष्टसख्ये शते
रम्येऽष्टाधिकवत्सरे(१६०८) सुखकरे भाद्रे द्वितीया-तिथौ।
श्रीमद्वाग्वर नीवृतीदमतुले श्रीशाकवाटे पुरे
श्रीमच्छ्रीपुरुधाम्नि च विरचितं स्थेयात्पुराण चिरं ॥१८६॥

इति श्रीपाडवपुराणे भारतनाम्नि भट्टारक-श्रीशुभचन्द्र-प्रणीते ब्रह्म-श्रीपालसाहाय्यसापेक्षे पाडवोपसर्गसहन-केवलोत्पत्ति मुक्ति-सर्वार्थसिद्धिगमन-श्रीनेमिनिर्वाणगमन-वर्णनं नाम पचविंशतितमं पर्व ॥२५॥

३७. जीवंधरचरित्र (भ० शुभचन्द्र)

आदिभाग :—

श्रीसन्मतिः सता कुर्यात्संमीहितफलं परं।
येनाप्येत महामुक्तराजस्य वरवैभवः ॥१॥
(इसके बाद सिद्धादि परमेष्ठि-स्मरणके ४ पद्य हैं।)
गौतमं धर्मपारीणं पूज्यपादं प्रबोधकं।
समंतभद्रमानंदमकलंकं गुणाकरं ॥६॥
जिनसेनं शुभासीनं ज्ञानभूष परं गुरुं।
शुभचंद्र प्रणम्योच्चैर्वक्ष्ये श्रीजीवकोद्भवं ॥७॥

इति श्रीजीवधरस्वामिचरिते काष्ठांगार-वर्णनो नाम प्रथमोल्लासः।

अन्तभाग :—

ये(ते)शो धर्मकथासुयोगसुविधिज्ञानप्रमोदागमा-
चार-श्रीशुभचद्र एष भविना ससारतः सभवं।
मार्गादर्शनकोविदं हतहितं तामस्यभार सदा
छिंद्याद्वाक्किरणैः कथञ्चिदतुलैः सर्वत्र सुख्यापिभिः ॥८५॥
श्रीमूलसघो यतिमुख्यसेव्यः श्रीभारतीगच्छविशेषशोभः।
मिथ्यामतध्वान्त-विनाशदक्षो जीयाच्चिरं श्रीशुभचन्द्रभासी ॥८६॥

श्रीमद्विक्रमभूपतेर्वसुहतद्वैतशते¹⁶⁰⁰ सप्तह⁷(के?)
वेदै⁴र्न्यूनतरे समे (१६०३ ?)शुभतरे मासे वरेण्ये शुचौ।
वारे गीष्पतिके त्रयादशतिथौ सन्नूतने पत्तने
श्रीचन्द्रप्रभधाम्नि वै विरचितं चेदं मया तोषतः ॥८७॥
आचन्द्रार्कं चिरं जीयाच्छुभचन्द्रेण भाषित।
चरितं जीवकस्याऽत्र स्वामिनः शुभकारणं ॥८८॥

इति श्रीमुमुक्षु-शुभचन्द्रविरचिते श्रीमज्जीवंधरस्वामिचरिते जीवंधर-स्वामिमोक्ष-गमनवर्णन नाम त्रयोदशो लंभः ॥१३॥

३८. चंदनाचरित (भ० शुभचन्द्र)

आदिभाग :—

चकार करुणाक्रांतः कृतिं कर्मठकर्मणः।
यस्त केवलिनं काम चेक्रियेहं कृतार्थकं ॥१॥
सिद्धध्यानाः सदासिद्धाः सिद्धिवृद्धिसमृद्धयः।
एधते स्म विशुद्धा नः शुद्धिं व्दतु धर्मिणः ॥२॥

अन्तभाग :—

जयति जितविपक्षः पालितानेकपक्षः कृतसकलसुशिक्षः प्राप्तदीप्यत्सुदक्षः।
विहितसमितिरक्षो मूलसंघाग्र्यलक्षः जिनपदकरपक्षो ध्वस्तपापाकरेक्षः ॥६३॥
स्वगुरुविजयकीर्तिः प्रस्फुरत्सोमकीर्ति-
र्भवजलधिसुतूर्तिः शास्त्रा(स्त्रवार)ब्धिपूर्तिः।
जिनपतिमतवर्तिर्विश्वदुःखारिहूर्ति-
र्जयतु जनसुभूतिर्नष्टकष्टोत्तरार्तिः ॥६४॥
शास्त्राण्यनेकान्यवगाह्य कृत्वा पुराणसल्लक्षणकानि भूरि।
सच्चंदनाचारुचरित्रमेतच्चकार च श्रीशुभचन्द्रदेवः ॥६५॥
श्रीज्ञानभूषणपदे विजयादिकीर्तिस्तत्पादपंकजमधुव्रत एव सेव्यः।
श्रीमूलसंघपदभृत् शुभचन्द्रदेवः शीलेशशीलमहिमानमिमं चकार ॥६६॥

अकृत-सुकृत-कर्ता सर्व्व-सावद्य-हर्ता
शम-दम-यम-हर्ता(भर्त्ता) शौभचन्द्रः सुभर्ता ।
चरितममलवर्ता चदनायाश्च पर्ता
जनन-जलधिभर्ता कर्मकामारिशर्ता ॥६७॥
शीलं सर्वगुणान्वितं वरगुणाः शील बुधाः कुर्व्वंते
शीलेनैव समाप्यते परगुण स्वस्त्यस्तुशीलाय वै ।
शीलात्सद्व्रतसचयः सममयाच्छीलस्य सर्वे गुणाः
शीले चित्तमहं दधे धृतिवरे हे शील मा पाहि वै ॥६८॥
श्रीचदनायाश्चरित पवित्रं ये चिन्वते चेतसि चित्स्यभावाः ।
ईक्षत एवं क्षणतः समक्ष मोक्ष तके क्षीणविपक्षपक्षाः ॥२६६॥
वाग्वरे वाग्वरे देशे वाग्वरैर्विदिते क्षितौ ।
चंदनाचरितं चक्रे शुभचंद्रो गिरौपुरे ॥२००॥
..ा शीलतो जयति चदनवालिकेयं वीरस्य संसदि समाप जय जयती ।
. र्म्मारिपक्षमखिलं च समेष्यतीद्धं मोक्ष पर परमका दशकागवेत्री ॥२०१॥

इति श्रीशीलविलासे चंदनाचरिते भट्टारक-श्रीशुभचद्र-विरचिते ..दनार्यकादिभवान्तरवर्णन नाम पचमपर्व ॥ इति चदनाचरित्र सपूर्णम्

३९. प्राकृतलक्षण-सटीक (भ० शुभचन्द्र)

आदिभाग:—

श्रीज्ञानभूषणं देव परमात्मानमव्ययं ।
प्रणम्य बालसबुद्धयै वक्ष्ये प्राकृतलक्षणं ॥१॥

अन्तभाग :—

यदुक्तं सूत्रतन्त्रेऽस्मिन् शब्दचिन्तामणौ स्फुट ।
विचार्ये बुद्धिसंसिद्धयै शुभचन्द्रेण सूरिणा ॥१॥
श्रीमूलसघे शिवसाधुसघे श्रीकुन्दकुन्दान्वयपद्मसूर्य्यः ।
निरस्तमोहः सकलादिकीर्तिर्जीयात्सदा श्रीभुवनादिकीर्त्तिः॥२॥

तत्पट्टपद्मे रविवद्विभाति विभासुरो भोगभवाग्निभेदी ।
श्रीज्ञानभूषो नरलोकलोक्यो लोकाग्रलोकोत्तमलोकनेच्छः ॥३॥
विजयकीर्तियतिर्जगता गुरुर्गरिमगीर्गदितागिगणो गणी ।
गिरति गा गुणिनो गतयेऽग्रणीः सुगुरुणा रविगु समगुः सम ॥४॥
षट्तर्कचक्षुचरणोद्धतवादिमत्तमातङ्गकुम्भमदभेदनपञ्चतुण्डः ।
श्रीमच्छुभेन्दुगणपो गुणगेय(?)कीर्तिश्चिन्तामणिं विशदशब्दमयं चकार॥५॥
शुभचन्द्रमुनीन्द्रेण लक्षणाब्धि विगाह्य वै ।
प्राकृत लक्षणं चक्रे शब्दचिन्तामणौ स्फुटं ॥६॥
शब्दचिन्तामणिं धीमान् योऽध्येति धृतिसिद्धये ।
प्राकृताना सुशब्दाना पार याति सुनिश्चितं ॥७॥
प्राकृतं लक्षण रम्य शुभचन्द्रेण भाषित ।
योऽध्येति वै सुशब्दार्थधनराजो भवेन्नर ॥८॥

इति मुमुक्षु-भट्टारक-श्रीज्ञानभूषणपट्टोदयाचलद्युमणि-सकलतार्किकचूडामणि-भट्टारकश्रीविजयकीर्त्तिपट्टप्रकटत्रैविद्यविद्याविशदभट्टारकश्रीशुभचंद्रविरचिताया स्वोपज्ञशब्दचिन्तामणिवृत्तौ तृतीयस्याऽध्यायस्य चतुर्थपादःसमाप्तः।

समाप्तेदं प्राकृतव्याकरणम् ॥

४०. अध्यात्मतरङ्गिणी (भ० शुभचन्द्र)

आदिभाग :—

जयतु जितविपक्षः पालिताशेषशिष्यो विदितनिजस्वतत्त्वश्चोदितानेकसत्त्वः ।
अमृतविधुयतीशः कुन्दकुन्दो गणेशःश्रुतसुजिनविवादःस्याद्विवादाधिवादः॥१॥

अन्तभाग —

सम्यक्संसारवल्लीवलय-विदलने मत्तमातङ्गमानी
पापातापेभकुम्भोद्गमनकराकुण्ठकण्ठीरवारिः
विद्वद्विद्याविनोदाकलितमतिरहो मोहतामस्य सार्था(?)
चिद्रूपोद्भासिचेता विदितशुभयतिर्ज्ञानभूषस्तु भूयात् ॥२॥

विजयकीर्तियतिर्जगता गुरुर्विधृतधर्मधुरोद्धृतिधारकः ।
जयतु शासन-भासन-भारतीमथमतिर्दलितापरवादिकः ।।३।।
शिष्यस्तस्य विशिष्टशास्त्रविशदः ससारभीताशयो
भावाभावविवेकवारिधितरस्स्याद्वादविद्यानिधिः ।
टीका नाटकपद्यजा वरगुणाध्यात्मादिस्रोतस्विनीं
श्रीमच्छ्रीशुभचन्द्र एष विधिवत्संचर्करीति स्म वै ।।४।।
त्रिभुवनवरकीर्तेर्जातरूपात्तमूर्तेः शमदममयपूर्तेराग्रहान्नाटकस्य ।
विशदविभववृत्तो वृत्तिमार्विश्चकार गतनयशुभचन्द्रो ध्यानसिद्ध्यर्थमेव ।।५।।
विक्रमवरभूपालात्पचत्रिशत्ते त्रिसप्ततिव्यधिके(१५७३) ।
वर्षेऽप्याश्विनमासे शुक्ले पक्षेऽथ पंचमी-दिवसे ।।६।।
रचितेयं वरटीका नाटक-पद्यस्य पद्ययुक्तस्य ।
शुभचन्द्रेण सुजयताद्विद्यासवल(?) न पद्माकात् ।।७।।
........पातनिकाभिश्च भिन्नभिन्नाभि ।
जीयादाचन्द्रार्कं स्वाऽध्यात्मतरङ्गिणी टीका ।।८।।

इति कुमतद्रुममूलोन्मूलन-महानिर्झरणीश्रीमदध्यात्मतरगिणी टीका समाप्ता। समाप्तश्चायं ग्रन्थः ।

४१- कर्णामृतपुराण (केशवसेन सूरि)

आदिभाग :—

लीलावासमलक्ष्म च श्रीपतिं परमेश्वरं ।
सुलक्षं ज्ञानिना वदे पुरुं पावन-शासनं ।।१।।
मातर जगता ज्ञान-विधान-परमोदया ।
ध्यायामि मनसि प्रायो गिरं श्रीशर्महेतवे ।।२।।
अज्ञानतिमिरं येन दारितं ज्ञान-दीप्तिभिः ।
मित्रेणेव सदा तस्मै गुरुवे स्यान्नमस्कृतिः ।।३।।
(आगे सज्जन, खल, वक्ता, श्रोताके लक्षण १० पद्योंमें है)

दानिना चक्रिणा तीर्थंकृता शीलवता सतो ।
राम-कृष्ण-मनोज्ञाना कथा तच्छास्त्रमुच्यते ॥१४॥
अमृताख्यपुराणेऽस्मिन कर्णसाकल्यमुच्यते ।
मरीचिभवप्राचुर्याकुरः सम्यक्त्वसत्फल ॥१५॥
बहुना प्रेमयुक्ताना दानशीलवता व्रत ।
कामदेवचरित्र श्रीश्रीपालकथानक ॥१६॥
तप-पूजा-सुभावाना कुभावाना कथानकं ।
शूराणा विरहाकान्तदेहिनो वृत्तमित्यल ॥१७॥
[त्रिभि.] कुलक । इति पुराणद्वारं ।
अगाधोऽयं पुराणाब्धिर्मतिर्मेऽल्पा प्रवर्त्तते ।
तथापि तर्तुमिच्छामि गगन पक्षिराडिव ॥१८॥
सिद्धोक्त-नीतिसारादि-पुराणोद्भूतसन्मति ।
विधास्यामि प्रसन्नार्थे ग्रथ संदर्भगर्भित ॥१९॥
खंखाग्निरसबाणेन्दुश्लोकसंख्या(१५६३००) प्रसूत्रिता ।
नीतिसारपुराणस्य सिद्धसेनादिसूरिभि. ॥२०॥
पूर्वाचार्योद्धृतं तत्त्वं निरीक्ष्य परमात्मनः ।
प्रसादेन सदानन्द करिष्यामि मनोज्ञ(ग)त ॥२१॥

× × × ×

इति श्रीकर्णामृतपुराणे धर्मशास्त्रे तत्त्वोद्धारे भ०श्रीरत्नभूषणाम्नायालंकार-ब्रह्मश्रीमंगलाग्रज-श्रीपूरमल्लापति-स्थविराचार्य-श्रीकेशवसेन-विरचिते ब्रह्मवर्द्धमानसहाय्यसापेक्षे श्रीभगवदागमन नाम प्रथमः स्कन्धः ॥१॥

अन्तभाग :—

काष्ठासघे गरिष्ठे प्रबलमुनियुते रामसेनो भदन्तः
श्रीमानासीत् क्रमेणेन्दुकविशदयशा रत्नभूषाभिधानः ।
तत्पादाम्भोजभृगो विमलतरमतिः श्रीजयाद्यन्तकीर्ति-
रास्ते विद्वज्जनाना प्रथम इह जिनाराधनैकस्वभावः ॥८८॥

वाग्वरे जनपदे च वीरिका-कान्त-हर्ष इति नाम तत्सुतः।
कृष्णदाससुनिपो विराजते प्रेमपूरपरमो दयान्तरः ॥८६॥
नीतिसंग्रहपुराणसागरादुद्धृतोऽखिलहिताय मेऽप्य(?)।
धर्मशास्त्रमणिरुत्तमोऽग्रहाः श्राव्य एव नितरा मनस्विभिः ॥९०॥
केवल सुमनसा मया कृतो ग्रन्थ एष परमार्थबुद्धितः।
श्रीपुराणगुरुप-प्रसादतः कृष्णदासकविवेधसा शुभः। ९१॥
मालवे जनपदे मनोरमे भाति भूतिलकभागा पुरी।
स्वर्गपस्य भ्रंशपूरिव पावना परमपावनैर्नरः ॥९२॥
तत्र पार्श्वजिनालये शुभे माघमासि उडुनविवसारे(?)।
सत्तिथौ प्रतिपदि प्रभासिनाऽकार्यग्रः(?) च कविता यथागमः ॥९३॥
शोधयंतु निपुणा इदं सदा कर्णदेवसुपुराणमादरात्।
ये विरोधरहिता विचारिणः सन्तु तेल(?) हितकारणाम् ॥९४॥
लेलिहान-वसु-ग्रह-विधुप्रमे(१६८८) वत्सरे विविधभावसयुतः।
एष एव रचितो हिताय मे ग्रथ आत्मन इहाखिलागिना ॥९५॥
आकर्णयन्ति खलु ये सुनरा नतागा श्रीकर्णभूपतिपुराणमिद पवित्रं।
पुत्र लभंत इह ते परमा रमा च कृष्णेन चन्द्रवदनेन निरूपितार्थे ॥९६॥
श्लोकसंख्या समाख्याता खखाम्बरचतुःप्रमा(४०००)।
सदोदयैः सता श्रेष्ठैः केशवाद्यन्तसूरिभिः ॥९७॥
आगगासागर यस्य दक्षिणे गूर्जरे तथा।
मालवे मेदपाटे च यशो जयति सत्कवेः॥९८॥
दिशा·········शिबिकाधिरूढो भट्टारकस्थापकसूरिमंत्री।
भट्टारकाचार्य इहास्ति कृष्णके नः पृथिव्या यत ईशपूज्यः ॥९९॥
नृपैर्भट्टारकाचार्यपदं दत्तं च दक्षिणे।
यस्य स कृष्णसेनाख्यः कविनाथोजयत्परं ॥१००॥
इति श्रीकर्णामृतपुराणे धर्मशास्त्रे भ०श्रीरत्नभूषणाम्नायालंकार-
वृषभ-जिनचरण-परिशीलन-लब्धप्रताप-ब्रह्ममगलाग्रज-राजराजेश्वरपूरमल्लेष्ट-

अयं विख्यातकीर्तिश्च रूपनिर्जितमन्मथः ।
सर्वलोकोपकारी च दयालुर्बुद्धिसागरः ॥४०॥
यत्समो दृश्यते नैव कोप्यन्यः पृथिवीतले ।
महाभाग्यश्च सद्वैद्यो बहुना भाषितेन किं ॥४१॥
धर्मश्रीरितिनामतोऽस्य वनिता देवादि-पूजा-रता ।
सौभाग्यादि-गुणान्विताऽतिविमला विख्यातकीर्तिः खलु ।
आसीत्सर्वहिता सुवाक्यकथका दानाऽद्वितीया परा
सम्यग्दृष्टियुता प्रफुल्लवदना दीनोपकारान्विता ॥४२॥
विवेकसत्क्षेत्रस्य परा सीमेव याऽभवत् ।
रोरुसतापिताना च शरदश्चन्द्रिकेव हि ॥४३॥
रेखानामास्ति पुत्रो वरगुणनिलयो ह्य तयोः सत्प्रतापो
वैद्याधीशः प्रसिद्धो विविधजननुतो धैर्यमेरुः सदैव ।
भोगाढयो बुद्धिसिधुः शशधरवदनः स्वर्णकातिः सभार्हः
सद्विद्यालंकृतागो विविधसुखनिधिः भाग्यवाश्चोपकारी ॥४४॥
सन्मानितो रणस्तभे दुर्गेऽयं बहुसपदः ।
शेरसाहिनरेन्द्रेण गाभीर्यगुणसागरः ॥४५॥
माननीयो नरेद्राणा बहूना वणिजा तथा ।
साहमी चास्त्यसौ नूनमहंकारसुरालयः ॥४६॥
यस्य हतु न मर्यादा क्षमः कोऽपि न दृश्यते ।
नर. प्रियतमस्याऽपि सर्वेषा च विवेकिना ॥४७॥
सौन्दर्य-जितकन्दर्प्पः सुहृदब्जदिवाकरः ।
योऽस्ति दुर्जननक्षत्रहमो विमलमानसः ॥४८॥
वाञ्छितार्थप्रदो योऽस्ति सेवकाना हितार्थिना ।
कलाचयप्रवीणश्च सन्मनुष्यशिरोमणिः ॥४९॥
भार्याऽस्य सद्गुणोपेता नाम्ना रिपसिरि स्मृता ।
गृहे दक्षा च दीनाना कल्पवल्लीव निर्म्मला ॥५०॥

सदाचाररता नून महाविनयधारिणी ।
ख्यातनिर्मलकीर्तिश्च शीलसम्यक्त्वभूषिता ॥५१॥
विद्यते ह्येतयोः पुत्रो जिनदासाभिधो वरः ।
बुधः सज्जनमर्यादो माननीयो मनीषिणाम् ॥५२॥
अधीती बहुविद्यासु आयुर्वेदे विशारदः ।
अपि योऽस्ति महाधीमान् वणिग्गो हि विवेकिना ॥५३॥
नाम्ना भर्तुर्जैवणाद(एणादे ?)इति ज्ञानदयान्विता ।
जिनदासाऽभिधानस्य भार्या स्याच्छीलसंभृता ॥५४॥
सती सीतासमा साऽपि भर्तारमनुसारिणी ।
धर्मदान-क्रियायुक्ता दम्पत्योरेनयोस्तयोः ॥५५॥
पुत्रोऽस्त्य(स्ति)नारायणदाससंज्ञो विराजते निर्मललक्षणैर्हि ।
स्वर्णप्रभः पंकजपत्रनेत्र पितामहादृष्टिपयोजभानुः ॥५६॥
स्वकीयवंशाम्बरपूर्णचन्द्रः सुबुद्धिमान् यः शुकनाश(स)कोस्ति ।
सुहृज्जनानंदकरो वरिष्ठो दरिद्रवल्ली द्विरदः प्रहृष्टः ॥५७॥
श्रीरणस्तंभसद्दुर्ग-समीपस्थे सुखप्रदे ।
नानावृक्षैः समाकीर्णे सरोभिः सकजैस्तथा ॥५८॥
जिनागारयुते रम्ये नवलक्षपुरे शुभे ।
वासिना जिनदासेन पंडितेन सुधीमता ॥५९॥
दृष्ट्वा पूर्व्वकथामेकपंचाशत्(५१)श्लोकसंयुता ।
पुरे सेरपुरे शांतिनाथचैत्यालये वरे ॥६०॥
वसुखकायशीतांशुमिते(१६०८) संवत्सरे तथा ।
ज्येष्ठमासे सिते पक्षे दशम्यां शुक्रवासरे ॥६१॥
अकारि ग्रंथः पूर्णोऽय नाम्ना दृष्टिप्रबोधकः ।
श्रेयसे बहुपुण्याय मिथ्यात्वापोहहेतवे ॥६२॥
भट्टारक-प्रभाचन्द्र-शिष्यो यो विद्यते भुवि ।
अनेकगुणसम्पन्नो धर्मचन्द्राभिधो मुनिः ॥६३॥

मम्पूर्ण-सिद्धात-विचारणैकः धीरो वरो ज्ञातमहाविवेकः ।
त्वारित्रपात्र त्रिधिपूतगात्रः म मे क्रियाद्बोधयुतो रमा हि ॥६४॥
अस्यास्ति शिष्यो ललितादिकीर्ति मुनिः सदा भव्यजनैश्च पूज्यः ।
दयार्द्रचित्तो विनयेन युक्तः प्रभाववान् शीलपरश्च विद्वान् ॥६५॥
जिनेन्द्रपादाबुज-सत्प्रसादाज्जीयाच्चिर श्रीजिनदाससज्ञः ।
साक हि नारायणदास-नाम्ना पुत्रेण सल्लक्षणसयुतेन ॥६६॥

जिनेन्द्रचरणाभोजपूजन च भवेद्भुवि ।
यावत्तिष्ठति हेमाद्रिर्यावच्चद्रदिवाकरौ ॥६७॥

जिनेशवाणी सुखदा च यावत्सतः कृपार्द्राश्च महीतलेऽपि ।
सुरापगा श्रीजिनदेवभक्तिर्महामुनीना निवहः कृपार्द्रः ॥६८॥

यावत्पचनमस्कारमन्त्रस्तावदयं शुभः ।
ग्रंथस्तिष्ठतु पुण्याय वाच्यमानो बुधैर्जनैः ॥६९॥
शातिः श्रीजिनमार्गस्य नरेंद्रस्य तपोभृता ।
प्रजाना काव्यकर्तृणा भवतात्सुहृदोऽपि च ॥७०॥
यत्किंचिदधिकं न्यून शास्त्रेऽस्मिन्नादित मया ।
जाड्यात्तज्जिन क्षतव्य दयासागरवारिज ॥७१॥
त्रिवाब्धिवसुमख्यैरनुष्टुप्श्लोकैः(८४३)प्रमाणता ।
ग्रथस्यास्य सुविद्वद्भिर्जिनदासैः कृता स्वय ॥७२॥

इति श्रीपडितजिनदासविरचिते मुनिश्रीललितकीर्तिनामाङ्किते होली-रेणुकापर्वचरित्रे दर्शनप्रबोधनाम्नि धूलिपर्व-समयधर्म-प्रशास्तिवर्णनो-नाम सप्तमोऽध्याय । [जयपुर प्रति

४६. मुनिसुव्रतपुराण (ब्रह्म कृष्णदास)

आदिभाग :—

देवेन्द्राच्चिंतसत्पाद पकजं प्रणमाम्यहं ।
आदीश्वर जगन्नाथं सृष्टिधर्म्मकरं भुवि ॥१॥

कनकच्नारसंछायं वृषभाकं वृषोद्धुरं ।
वृषभ जगता साक्षाच्छ्रमणोऽनतसिद्धये ॥२॥

अन्तभाग :—

काष्ठासंघे वरिष्ठेऽजनि मुनिपनुतो रामसेनो भदत-
स्तत्पादाम्भोजसेवाकृत-विमलमति.श्रीभीमसेन क्रमेण ।
तत्पट्टे सोमकीर्तिर्यवनपति-कराम्भोज-संपूजिताह्रि-
रेतत्पट्टोदयाद्रौ जिनचरणलयी श्रीयश'कीर्तिरेनः(?)॥६१॥

कमलपतिरिवाभूत्सदुदयाद्यतसेन,
उदितविशदपट्टे सूर्यशैलेन तुल्ये ।
त्रिभुवनपतिनाथाह्रिद्वयासक्तचेता-
स्त्रिभुवनजनकीर्तिर्नाम तत्पट्टधारी ॥६२॥

रत्नभूषणभदत इनाभो न्याय-नाटक-पुराण-सुविज्ञः ।
वादि-कुजर-घटाकर-सिंहस्तत्पदेऽजनि रजनभक्त' ॥६३॥
देवतानिकरसेवितपाद: श्रीवृषेशविभुपादप्रसादात् ।
कोमलेन मनसा कृत एष ग्रथ एव विदुषा हृदिहार' ॥६४॥
शोधयतु विबुधा विविरोधा यत्पुराणमद एव मयोक्त ।
सभवन्ति सुजनाः खलु भूमौ ते सदा हितकरा हतपापा' ॥६५॥
इन्द्वष्टषट्चद्रमितेऽथ वर्षे(१६८१) श्रीकार्तिकाख्ये धवले च पक्षे ।
जीवे त्रयोदश्यपरान्हया मे कृष्णेन सौख्याय विनिर्मितोऽय ॥६६॥
लोहपत्तननिवासमहेभ्यो हर्ष एव वणिजामिव हर्ष' ।
तत्सुतः कविविधिः कमनीयो भाति मंगल-सहोदर कृष्णः ॥६७॥
श्रीकल्पवल्लीनगरेगरिष्ठे श्रीब्रह्मचारीश्वर एष कृष्ण ।
कंठावलंब्यूर्जितपूरमल्ल' प्रवर्द्धमानो हितमाततान ॥६८॥

पचविंशातिसंयुक्तं सहस्त्रत्रयमुत्तमं (३०२५) ।
श्लोकसंख्येति निर्दिष्टा कृष्णेन कविवेधमा ॥६९॥

इति श्रीपुण्यचन्द्रोदये मुनिसुव्रतपुराणे श्रीपूरमल्लाके हर्ष-वीरिका देहज-

ब्रह्मश्रीमंगलदासाग्रज-ब्रह्मचारीश्वर-कृष्णदास-विरचिते रामदेव शिवगमन नाम त्रयोविंशतितमः सर्ग समाप्तः ॥२३॥

४७. चन्द्रप्रभ-चरित (कवि दामोदर)

आदिभाग :—

श्रियं चन्द्रप्रभो नित्या चन्द्रदश्चन्द्रलाञ्छनः ।
भव्यकुमुदचन्द्रो वश्चन्द्र-प्रभो जिन. क्रियात् ॥१॥
कुशासन-वचोग्रूढजगत्तारण-हेतवे ।
तेन स्ववाक्य सूत्रैर्धर्मपोतः प्रकाशित. ॥२॥
युगादौ येन तीर्थेशा धर्मतीर्थः प्रवर्त्तित. ।
तमहं वृषभ वन्दे वृषद वृषनायकम् ॥३॥
चक्री तीथकरः कामो मुक्तिप्रियो महाबली ।
शान्तिनाथः सदा शान्ति करोतु न' प्रशान्तिकृत् ॥४॥
येन विध्वंसितो दुष्टः प्रद्युम्नभूपतिर्वरं ।
मुक्तिसीमंतिनीनाथ वीर नमामि तं जिनम् ॥५॥
(इसके बाद शेष तीर्थंकरों तथा सिद्धादिकोका स्मरण है)
गुणान्विता शुभाकारां वृत्तमुक्ताफलाचिताम् ।
मालामिव सदाभूषा स्वकण्ठे भारतीं दधे ॥११॥
जगद्धितकरं सार विश्वतत्वप्रकाशकं ।
स्तौमि जिनागम नित्य ज्ञानाप्तयेऽघनाशनं ॥१२॥
परहित समुद्युक्तास्त्रैलोक्येश्वर संस्कृतान् ।
गौतमादीन्मुनीन् भक्त्या स्तुवे तद्गुणसिद्धये ॥१३॥
सीमधर-मुखात् श्रुत्वागम येनाऽत्र दुःषमे ।
प्रवर्त्तित हितं कुन्दकुन्दाचार्यं नमाम्यहम् ॥१४॥
परमतेभ-नागारिर्यः कवेर्गुण-सागरः ।
सद्गुणसिद्धये तस्मै नमोऽकलङ्क-योगिने ॥१५॥

यद्वारत्या' कविः सर्वोऽभवत्सञ्ज्ञान-पारगः ।
तं कविनायकं स्तौमि समन्तभद्र-योगिनम् ॥१६॥
नाभेयस्य पुराणाब्धिः कृतो येन सुबुद्धिदः ।
स्वसिद्धयै शिरसा वन्दे जिनसेनकवीश्वरं ॥१७॥
सर्वेषां तीर्थंकर्तृणां चरिताब्धिः प्रकाशितः ।
येन तं गुणभद्राचार्यकविं नौमि सततम् ॥१८॥
चन्द्रप्रभजिनेशस्य चरितं येन वर्णितं ।
तं वीरनन्दिनं वन्दे कवीशं ज्ञानलब्धये ॥१६॥
येऽन्येऽपि कवयोऽभ्वन् जिनगुण-प्रकाशका. ।
कवित्वसिद्धये सन्तु सर्वे ते मम सन्तुता ॥२०॥

अन्तभाग :—

भव्याब्जुजौघदिनकृद्गणभृत्समानो निश्शेषमुन्यधिपतिः शुभमंडलेश. ।
राजाधिराज-गणसेवित-पादपद्मः ख्यातो बभूव सुवचा भुवि नेमिचन्द्र' ॥६८

सुगुण-गण समुद्रो विष्टपे ख्यातकीर्तिर्मुनिनरपतिवृन्दैः पूजिताघ्रि सुरूपी ।
विजितसकलवादी तस्य पट्टे बभूव महिमितजिनधर्मा श्रीयशःकीर्तिनामा ॥

योगीशभूभृद्गणलब्धपूजः कवीशसेव्य' भुवनप्रसिद्धः ।
पट्टे तदीये जितकाममाय' श्रीभानुकीर्तिर्दृढशान्तमूर्तिः ॥७०॥
सिद्धान्तादि-पुराणकोशजलधिः प्रध्वस्त मिथ्यातमः
भव्याभाज-रवि. समस्तगुणभृद्धर्माब्धिचन्द्रोपमः ।
विख्यातो भुवने तपोभरधृतो गच्छाधिराज. शमी
शिष्यस्तस्य सुयोगिसंस्तुतपदः श्रीभूषणो राजते ॥७१॥
भव्याम्भोजाऽर्कभानुर्मुनिनृपतिगणैः सेविताघ्रिः प्रसिद्ध-
स्तर्कालंकारशास्त्रप्रवचन-पटुश्रीर्ध्वस्त-मिथ्यास्वादः ।
उद्यद्भानुप्रतापो गुणगणनिलयो जैनधर्मप्रकाशी
तत्पट्टेशस्तपस्वी प्रकटसुमहिमा धर्मचन्द्रो विभाति ॥७२॥

श्रीमूलसंघसुपतेः परिशान्तमूर्तेः चन्द्रप्रभेशचरितं भुवि सारमेतत् ।
शिष्येण तस्य चरितं बहुसौख्यहेतुर्दामोदरेण विदुषा तनुबुद्धिभाजा ॥७३॥
निश्शेषशास्त्रनिपुणाः परकृत्यचित्ताः कृत्स्नप्रदोषरहिता बहुकीर्तिभाजः ।
चन्द्रप्रभस्य चरितं परिशोधयन्तु सारं सता समुदयाः स्वगुणाप्रभुज्याः॥७४॥
जिनरुचिदृढमूलो ज्ञानविज्ञानपीठ· शुभवितरणशाखश्चारुशीलादिपत्रः ।
सुगुणचयसमृद्धः स्वर्गसौख्यप्रसूनः शिवसुखफलदो वै जैनधर्मद्रुमोऽस्तु ॥८४॥

भूभृन्नेत्राचलशशधराङ्कप्रमे(१७२७)
वर्षेऽतीते नवमिदिवसे मासि भाद्रे सुयोगे ।
रम्ये ग्रामे विरचितमिदं श्रीमहाराष्ट्रनाम्नि
नाभेयस्य प्रवरभवने भूरिशोभानिवासे ॥८५॥
रम्यं चतुःसहस्राणि पंचदशयुतानि(४०१५) वै ।
अनुष्टुप्कैः समाख्यातं श्लोकैरिदं प्रमाणतः ॥८६॥

इति श्रीमण्डलसूरिश्रीभूषण-तत्पट्टगच्छेश श्रीधर्मचन्द्रशिष्य-कविदामोदर-विरचिते श्रीचन्द्रप्रभचरिते श्रीचन्द्रप्रभनिर्वाणगमनवर्णनो नाम सप्तविंशतितमः सर्गः।

४८. ज्ञानार्णवगद्य-टीका (श्रुतसागर सूरि)

आदिभाग :—

शिवोऽयं वैनतेयश्च स्मरश्चात्मैव कीर्तितः ।
अणिमादि-गुणाऽनर्घ्यरत्न-वार्धिर्बुधैर्मतः ॥१॥

अन्तभाग :—

आचार्यैरिह शुद्धतत्वमतिभिः श्रीसिंहनंद्याह्वयैः
संप्रार्थ्य श्रुतसागरं कृतिवरं भाष्यं शुभं कारितम् ।
गद्यानां गुणवत्प्रियं विनयतो ज्ञानार्णवस्यान्तरे
विद्यानन्दिगुरु-प्रसाद-जनितं देयादमेयं सुखम् ॥

इति-श्रीज्ञानार्णव-स्थित-गद्य-टीका तत्त्वत्रय-प्रकाशिनी समाप्ता ।

४९. सम्मेदशिखरमाहात्म्य (दीक्षित देवदत्त)

आदिभाग :—

ध्यात्वा यत्पदपाथोज भव्याः संसारपारगाः ।
सारात्सारं सदाधार तमर्हन्त नमाम्यहम् ॥१॥
गुरुं गणेश वाणीं च ध्यात्वा स्तुत्वा प्रणम्य च ।
सम्मेदशैलमाहात्म्यं प्रकटीक्रियते मया ॥२॥
जिनेन्द्रभूषणयतिर्यति-धर्मपरायणः ।
तस्योपदेशात्सम्मेदवर्णने मद्गिरोत्सुका ॥३॥
भट्टारकपदस्थायी स यतिः सत्कविप्रियः ।
भवाब्धितरणायेह सत्कथापोतसज्जकः ॥४॥
माहात्म्यपूर्तिसिद्ध्यर्थं वन्दे सिद्धगण हृदि ।
सद्बुद्धि ते प्रयच्छतु वाणीं मे काव्यरूपिणीम् ॥५॥
सम्मेदशैलवृत्तातो महावीरेण भाषितः ।
गौतम प्रति भूयः स लोहार्येण धीमता ॥६॥
तत्सद्वाक्यानुसारेण देवदत्ताख्यसत्कविः ।
सम्मेदशैलमाहात्म्यं प्रकटीकुरुतेऽधुना ॥७॥

अन्तभाग :—

इति श्रीभगवल्लोहाचार्यानुक्रमेण-श्रीभट्टारकजिनेन्द्रभूषणोपदेशाच्छ्री-मद्दीक्षित-देवदत्तकृते श्रीसम्मेदशिखर-माहात्म्ये समाप्तिसूचको एकविंशति-तमोऽध्यायः ॥२१॥ समाप्तोऽयग्रन्थः ॥

५०. ध्यानस्तवः (भास्करनन्दि)

आदिभाग :—

परमज्ञानसंवेद्य वीतबाध सुखादिवत् ।
सिद्ध प्रमाणतस्सार्वं सर्वज्ञं सर्वदोषक(कृत्?) ॥१॥

अन्तभाग :—

तस्याऽभवत् श्रुतनिधिर्जिनचंद्रनामा शिष्योऽनु तस्य कृति-भास्करनंदिनाम्ना !
शिष्येण संस्तवमिम निजभावनार्थ ध्यानानुग विरचित सुविदो विदंतु ॥१००

इति ध्यानस्तवः समाप्तः ।

५१. पदार्थदीपिका (भ० देवेन्द्रकीर्ति)

आदिभाग :—

श्रीसर्वज्ञं जिन नत्वा सर्वसत्वहितावह ।
पदार्थदीपिका सारा टीका कुर्वे सुकोमला ॥१॥

अन्तभाग :—

वस्वष्टयुक्तसप्तेन्दुयुते (१७८८) वर्षे मनोहरे ।
शुक्ले भाद्रपदे मासे चतुर्दश्या शुभे तिथौ ॥१॥
ईसरदेति सद्ग्रामे टीका पूर्णितामिता ।
भट्टारक-जगत्कीर्तेः पट्टे देवेन्द्रकीर्तिना ॥२॥
दुष्कर्महानये शिष्यमनोहर-गिरा कृता ।
टीका समयसारस्य सुगमा तत्त्वबोधिनी ॥३॥
बुद्धिमद्भिः बुधैर्हास्य कर्तव्यं न विवेकिभिः ।
शोधनीयं प्रयत्नेन नयतो विस्तरता व्रजेत् ॥४॥
बुधैः संपाठ्यमानं च वाच्यमानं श्रुतं सदा ।
शास्त्रमेतच्छुभंकारि चिरं संतिष्ठता भुवि ॥५॥
पूज्य-देवेन्द्रकीर्तेश(तीश-)शिष्येण स्वांतहारिणा ।
नाम्नेयं लिखिता टीका स्वहस्तेन स्वबुद्धये ॥६॥

[इति समयसारस्य पदार्थदीपिका टीका समाप्ता ।]

५२. नागकुमारपंचमीकथा (प० धरसेन)

आदिभाग —

नेमि नमत्सुराधीश-मुनाशामनघश्रियम् ।
नत्वा नागकुमारस्य वक्ष्ये सक्षेपतः कथा ॥१॥

अन्तभाग —

आसीद्भूरिगुणाकरस्य गुणिनः श्रीवीरसेनस्तुतः
शिष्यः श्रीधरसेनपंडित इति ख्यातः सतामीशितु ।
गोनन्देवचिनातपस्य वसतौ तेन प्रशान्तात्मना
संवेगार्थमियं विशुद्धमनसा साध्वी कथा श्रेयसे ॥१॥
सोढदेवाख्य-रट्टाभ्यां सद्धर्मरसिकत्वतः ।
कारिता पंचमी सेयमाऽऽचन्द्रमभिनन्दतु ॥२॥

इति श्रीधरसेनविरचिते नागकुमारपंचमीकथासमुच्चये नागकुमारनिर्वाण गमनवर्णनो नाम अष्टमः सर्गः ॥८॥*

५३. महीपालचरित्र (भ० चारित्रभूषण)

आदिभाग —

यस्याशदेशेष्वितकुन्तलाली दूर्वाङ्कुरालीव विभाति नीजा(त्यनीचा ?) ।
कल्याणलक्ष्मीवमतिः स दिश्यादादीश्वरो मंगलमालिका वः ॥१॥
यस्याः क्रमोपास्तिवशाज्जडोपि विना श्रमं वाङ्मयपारमेति ।
सदा चिदानंदमयस्वरूपा सा शारदा रातु रतिं परां मे ॥२॥

---

* यह प्रशस्ति आजसे कोई ३०–३५ वर्ष पहले सेठ माणिकचन्द हीराचन्द जे० पी० बम्बईके 'प्रशस्तिसंग्रह' रजिष्टर न० १ परसे उद्धृत की गई थी। मूल ग्रन्थ सामने न होनेसे इस ग्रन्थकी रचना करानेवाले सोढदेव आदिका परिचय नहीं दिया जा सका।

मनोवचःकायकृतोपकाराः जयति सत सुकृतैकसारा. ।
येषा भिया न स्खलते सता धीर्हित करास्तेपि जयत्यसतः ॥३॥
अज्ञोपि विज्ञाय कृतप्रसादः परोपकाराय रसाभिराम ।
श्रीमन्महीपाल-नरेश्वरस्य चरित्रमेनद्रचयामि काम ॥४॥

अन्तभागः—

नित्य सच्छुक्लपक्षस्थितिरतिविशदो नाशितश्यामपक्षो ।
विध्वस्ताशेषदोषो बहुमुनिमहितो भूरिशोभाभिराम. ।
विश्वाल्हादं ददानो हतनिखिलतमाः शश्वदास्तोदया च
श्रीमद्वाख्याख्यगच्छो परिविधुवदयं राजते शुद्धवृत्त ॥१॥

कल्याणावलिशालिनोऽत्र सुमनःश्रेणीश्रितो विश्रुत.
श्रीमान् मारकरो गणो विजयते यं(थोः) मेरुवन्निश्चल' ।
विश्वालंकरणस्य विस्तृतजुष' सन्नंदतस्याऽन्वहं
भाति स्फीतियुतस्य यस्य पुरतः पादा इवान्ये गुणाः ॥२॥
तस्मिन् विस्मयकारिचारुचरिनश्चारित्रचूडामणिः
श्रीमान् श्रीविजयेन्दुसूरिरभवद्भव्यागि-चिंतामणिः ।
तत्पट्टे समभून्महीन्द्रमहितः श्रीक्षेमकीर्तिर्गुरु'
कास्कान्शेविबुधान् विनोति नितरा यत्कल्पवृत्तिस्तथा ॥३॥

श्रीरत्नाकरसूरयः समभवन् ज्ञानाब्धुरत्नाकराः
कीर्तिस्फीतिमनोहरा शुभगुणश्रेणीलनाभोधरा ।
यन्नाम्नाऽत्रबलो गणोयमभवद्रत्नाकराख्या परा
ख्यातेन क्षितिमडलेपि सकले सत्या तमोहारिणा ॥४॥
तस्यानुक्रमपूर्वशैलकरणि' कामद्विपोद्यत्सृणिः
सूरीशोऽभयनन्दि इत्यजनि सद्योगीन्द्रचूडामणिः ।
तत्पट्टे प्रकटप्रभावविदिते विध्वस्तवादिघृ णिः
जज्ञे श्रीजयकीर्तिसूरिरसमो भव्यात्मचिन्तामणिः ॥५॥

कीतिर्यस्य निरस्ततापनिवहा मच्छीलदङस्थिता
चचच्चन्द्रकलोज्वला दशदिशा श्वेतातपत्रायते।
तत्पट्टे स्फुटकादिकुंजरघटासिंहो रुदहोव्रज ।
सूरीन्द्रो जयताच्चिर गणधरः श्रीरत्ननन्द्याभिध. ॥६॥
तस्यानेकविनेय-सेवितपदाभोज' 'भव्यावली
चचन्नेत्रचकोरचद्रसदृशस्थानम्रभूमीपते. ।
शिष्याणू रचयाञ्चकार चतुरश्चारित्ररम्याऽभिधो।
विश्वाश्चर्यंकरं महीपचरितं नानाविचारोद्धुर ॥७॥
श्रीरत्नदिगुरुगादसरोरुहालिश्चारित्रभूपणकवियेदिद ततान।
तस्मिन्महीपचरिते भववर्णनाख्य. सर्गः समाप्तमगमत्किल पचमोऽय॥८॥

इति श्रीभट्टारकश्रीरत्ननंदिसूरिशिष्य-महाकविवरचारित्रभूपण-विरचिते श्रीमहीपालचरिते पंचमः सर्गः। इति श्रीमहीपालचरित्र काव्य सपूर्ण। ग्रन्थ स० ६६५। संवत्सरे गुण-रुद्रनेत्र-वसु-चन्द्रयुते १८३६ का भाद्रपदमास-कृष्णपक्षषष्ठया तिथौ। [जयपुर प्रति

५४. मदनपराजय (ठक्कुर जिनदेव)

आदिभाग :—

यदामलपदपद्म श्रीजिनेशस्य नित्य शतमख-शतसेव्यं पद्मगर्भादिवद्य।
दुरितवन-कुठारं ध्वस्तमोहाधकार सदखिलसुखहेतु त्रिःप्रकारैर्नमामि ॥१॥
यः शुद्ध-रामकुल-पद्म-विकाशनार्को जातोऽर्थिना सु[र]तरुर्भुवि चगदेव'।
तन्नदनो हरिरसत्कविनागसिंहः तस्मा[द्भि]षग्जनपतिर्भुवि नागदेव ॥२॥
तज्जावुभौ सुभिषजाविह हेम रामौ रामात्प्रियकर इति प्रियदोऽर्थिना यः।
तज्जश्चिकित्सित-महाबुधि-पारमाप्तः श्रीमल्लुगिज्जिनपदाबुज-मत्त भृ गः ॥३॥
तज्जोह नाग(जिन ?)देवाख्यः स्तोकज्ञानेन सयुतः।
छदोऽलकार-काव्यानि नाभिधानानि वेद्म्यह ॥४॥

कथा प्राकृतबंधेन हरदेवेन या कृता।
वक्ष्ये संस्कृतबंधेन भव्यानां धर्मवृद्धये ॥५॥

× × × ×

इति श्रीठक्कुरमाइंदसुत-जिनदेव विरचिते मारपराजये सुसंस्कृतबंधे मुक्तिस्वयंवरो नाम पञ्चमः परिच्छेदः।

अन्तभाग :—

पाठयते यः शृणोतीदं स्तोत्रं स्मरपराजयं।
तस्य ज्ञानं च मोक्षः स्यात् स्वर्गादीनां च का कथा ॥१॥
तावद्दुर्गतयो भवन्ति त्रिविधास्तावन्निगोद-स्थितिः
तावत्संसमुदारुणा हि नरकास्तावद्दरिद्रादयः।
तावद्दुःखघोरमोहतमसाच्छन्नं मनः प्राणिनां
यावन्मार-पराजयोद्भवकथागीतां च शृण्वति न ॥२॥

तथा च—शृणोति वा वक्ष्यति वा पठेत्तु यः कथामिमां मारपराजयोद्भवां।
सोऽस्मशर्यं न लभतेऽक्षयं सुखं शीघ्रेण कायस्य कदर्थनं विना ॥३॥

अज्ञानेन धिया विना किल जिनस्तोत्रं मया यत्कृतं
किं वा शुद्धमशुद्धमस्ति सकलं नैवं हि जानाम्यहं।
तत्सर्वं मुनिपुंगवाः सुकवयः कुर्वंतु सर्वं क्षमां
संशोध्याशु कथामिमां स्वसमये विस्तारयंतु भुवं ॥४॥

इति मदनपराजयं समाप्त।

५५. श्वेताम्बरपराजय (कवि जगन्नाथ)

आदिभाग :—

बुभुक्षाद्या यमीशानं न हि दुःखयितुं क्षमाः।
अनंतसुखसद्भावात्तस्मै श्री नेमये नमः ॥१॥
पदाम्बुज मधुव्रतो भुवि नरेन्द्रकीर्त्तेर्गुरोः
सुवादिपदसद्बुधः प्रकरणं जगन्नाथवाक्।

पद्येस्मिन् मयकाकृता नुतिमिमा श्रीमच्चतुर्विंशति-
तीर्थेशा कलुषापहा च नितरा तावद्भिरर्थैर्वरैः ।
प्रत्येक किल वाच्य-वाचकरवैर्बोध्याबुधैर्वृत्तितः
पूर्वाह्णादिषु यो ब्रवीति लभते स्थान जगन्नाथतः ॥१॥
काव्येऽस्मिन्भुवि कोविदाः स्तुतिमये तीर्थंकराणा वरे ।
सल्लभ्ये बुधचित्तचमत्कृतिकरे चित्तं दधीध्वं सदा ।
वाक्याशुद्धवचोपि यद्भणितितः कुर्वीध्वम(?)त्रापि सत्(श ?)
तस्माच्चि(न्त्य)तिमिद समस्तसुखद न ज्ञायते किं फल ॥२॥
जननि भारति सज्जिनतुण्डजे सुमति लोकलतावन(?)तत्परे ।
भव सरस्वति मे कलुषापहा तव पदाबुजभक्तियुजः सदा ॥३॥
इति श्रीचतुर्विंशतिजिन स्तुति कविजगन्नाथकृता पूर्णा ॥

५७. मौनव्रतकथा (गुणचन्द्र सूरि)

आदिभाग :—

सकलज्ञानसम्पूर्णान् नत्वा श्रीजिननायकान् ।
मौनव्रतकथां वक्ष्ये भव्याना हितसिद्धये ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽघविघातिनीह प्रद्योतमानान्यमतानि नेशुः ।
सारस्वतोगच्छ इहैव नद्याच्छ्रीमद्बलात्कारगणाभियुक्तः ॥२६॥
श्रीरत्नकीर्तिरभवज्जगतावरेण्यश्चारित्ररत्ननिवहस्य बभार भार ।
तद्दीक्षितो यतिवरः कृतिदेवकीर्तिः चारित्ररंजितजनोद्वहितासुकीर्तिः॥२७
तदग्रशि(तच्छि)ष्यो गुणचन्द्रसूरिरभवच्चारित्रचेतोहर-
स्तेनेय रचिता कथा व्रतवता पुण्याकुरोत्पादिका ।
श्रीमत्पचमतीर्थचैत्यसदने सद्दागलेन्द्रगके(?)
श्रीमौनव्रतसत्फलार्थकथका नन्दत्वियं भूतले ॥२८॥
इति मौनव्रतकथा समाप्ता ।

४९८. षट्चतुर्थ-वर्त्तमान-जिनार्चन (भ० शिवाभिराम)

आदिभाग :—

अथ षट्चतुर्थवर्तमानजिनार्चनं समुदीरयामः ।

यशः समानदति विष्टपत्रयं यदुग्रतेजः प्रसरत्प्रभाभिर ।
नरेड्डिव प्रस्खलिताहितद्युतेर्जिनेशिनस्तं हृदयेऽनिश दधे ॥१॥

अन्तभाग :—

अभवदजितविद्यो मन्मथारातिभक्तो नृपनिकरशिरोरुमौलिरत्नप्रभार्च्यः ।
पुषदवनिपसूनुर्यः शिवारामनाम्ना व्यरचि जिनवरार्चावृत्तरत्नप्रभार्कैः॥११॥
परमसुखविचित्र शुद्धसद्भावजात गुणगणितविनाश कर्मकातारदाव ।
विभय-विभवसार शुद्धजीवावतार जिनवरपदभक्तेर्यातु भक्त्यास्पदं भोः॥१२॥
भवतु विभवभूरिर्मुक्तिकातार्चकाना भवतु विभवभूरिस्तद्व्रतानंदिताना ।
भवतु विभवभूरिः सद्गुरूणा जनाना भवतु विभवभूरिः सर्वजीवात्मकाना॥१३॥
विशदविजयसारं मालवाख्याख्ययाख्ये दिविजनगरदुर्गे भाति देवालयो वा ।
जिनवर-पद-भक्तिर्विद्यते यज्जनाना न तु कुमतकुवृत्तिर्ग्रंथपथात्मकाना ॥१४॥
अरिकुलवनदाहो यत्र सामन्तसेनः स्वकुलगतसुवृत्तिस्कधसालत्रभूतः ।
हरितनुजतनूजो वानुरुद्ध. पृथिव्यामिव कविकुलपालो राज्यरामा बभार॥१५
तदखिलवरराज्यप्राज्यसाहाय्यसाने रघुपतिरिति नामाभून्महेज्यो महात्मा ।
तदखिलकुलभूपस्तत्सुतो धन्यराजो मम परमसुभक्तो सोत्र साहाय्यकोभूत्॥१६॥
रहितविभवभूपास्त्यक्ततारस्वदेशा जिनवरपदभक्तिमात्रमग्न्यग्धनाढ्याः ।
शिवगतजिनभूमेर्वंदनासक्तचित्ताः सुचिरतरविहारं कुर्महे धर्मसिद्ध्यै ॥१७॥
नवशि(?)च नयनाख्ये कर्मयुक्तेन चद्रे गतिवति सति जंतौ विक्रमस्यैव काले ।
निपतदतितुषारे माघचद्रावतारे जिनवरपदचर्चासिद्धये सप्रसिद्धा ॥१८॥

गुणभद्रभदन्तोक्त्या स्वयसिद्धान्तरै''कैः ।
जातेयं वीतरागार्चा नमस्कर्तव्यमत्र वै ॥१९॥

यावत्सज्जनचित्तनिश्चलधरा, यावज्जलश्रीधरा
यावच्चक्रधरा सुरेश्वरधरा पातालपाताधरा ।
यावच्चन्द्रदिवाकरपृथुधरा यावच्च धर्मस्थिति-
स्तावच्छ्रीजिनराजचन्द्रचरणपूजा समानंदतु ॥२०॥
शिवाभिरामाय शिवाभिरामं शिवाभिरामात्र शिवाभिरामैः ।
शिवाभिरामप्रदक भज त्व मुहुर्मुहुर्भो वद किं वदामि ॥२१॥

इति श्रीषट्चतुर्थवर्तमानजिनार्चा शिवाभिरामावनिप्रसूनुकृताऽद्भुततरैर्यं समाप्ता ।

५६. पार्श्वपुराण (भ० चन्द्रकीर्ति)

आदिभाग :—

मुक्तिस्त्रीहृदयाश्लिष्टं केवलश्रीविभूषणं ।
श्रीसर्वज्ञमहं वन्दे प्राप्तानंतचतुष्टयम् ॥१॥

× × ×

स जीयाद्रामसेनाख्यः काष्ठांबरनभोंऽशुमान् ।
भट्टारकः सदाश्रेष्ठः शब्दशास्त्राब्धिपारगः ॥३०॥
महापुराणसत्काव्य-कीर्तनान्निचितं यशः ।
भूतले यस्य जीयात्स जिनसेनो यतीश्वरः ॥३१॥
यदुत्तरपुराणस्य कर्ता नैयायिकः सुधीः ।
सूरिः श्रीगुणभद्राख्यो भू(जी)याद्भूमंडले कविः ॥३२॥

अन्तभाग :—

स्वस्ति श्रीमति काष्ठसंघतिलके गच्छे सुनन्दीतटे
वादीन्द्रोरुसुपण्डितेन्द्रकविसच्चन्द्रावलीभूषिते ।
आसीदन्वयमण्डितो गुणनिधिर्विद्यागणाधीश्वरः
सूरिः श्रीयुतरामसेन इह वै विद्यानवद्यः सदा ॥६५॥

यस्मिन्निवासं विदधे प्रसिद्धा स्याद्वादविद्या सततं मनोज्ञा ।
वृत्तं प्रवृत्तं विशदं च यत्र विजृंभते तस्य कथं न कीर्तिः ॥६६॥
तदन्वयेऽभूत्किल धर्मसेनः सूरिस्तपोभूषितधर्मसेनः ।
नमत्पदाम्भोजसुरेन्द्रसेनः स्याद्वादविन्निर्जितवादिसेनः ॥६७॥
विशदपाद[सु]पकजभास्करः सकलशास्त्रसुपीतरसोत्करः ।
अखिलसूरिवरस्तपसा निधिर्विमलसेनमुनिः समभूत्सुधीः ॥६८॥
तत्पट्टपूर्वाचलचण्डरोचिः सूरीश्वरोऽभूत्सुविशालकीर्तिः ।
यद्देशनाकर्णनतः प्रहृष्टा बुधा न मुह्यन्ति सुधारसेऽपि ॥६९॥
तत्पट्टवारानिधिशीतरोचिर्भट्टारकोऽभूत्किल दिव्यरोचिः ।
बभूव गच्छेश्वरविश्वसेनः स्वदेशनारंजितसद्रसेनः ॥७०॥
काष्ठासघे गच्छनन्दीतटीयः श्रीमद्विद्याभूषणाख्यश्च सूरिः ।
आसीत्पट्टे तस्य कामान्तकारी विद्यापात्रं दिव्यचारित्रधारी ॥७१॥
तत्पट्टाम्बरभूषणैकतरणिः स्याद्वादविद्याच्चिणो(?)
विद्वद्वृन्दकुलाभिमानशिखरीप्रध्वंसतीव्राशनिः ।
सच्चारित्रतपोनिधिर्मतिवरो विद्वत्सु शिष्यैर्युतः ।
श्रीश्रीभूषणसूरिराट् विजयते श्रीकाष्ठसंघाग्रणीः ॥७२॥
यदग्रतो नैति गुरुर्गुरुत्व श्लाघ्यं न गच्छत्युशनोऽपि बुद्धया ।
भारत्यपि नैति माहात्म्यमुग्र श्रीभूषणः सूरिवरः स पायात् ॥७३॥
वाणी यस्योत्कृष्टपीयूषजेत्री रूपं यस्यानन्तसौन्दर्यहारी ।
धत्ते वृत्ताद्यो गणे शोभमान श्रीश्रीभूषाख्यश्च सूरिः स जीयात् ॥७४॥
तस्य श्रीजयवच्छिष्यो जाड्यपात्र समस्थल(?) ।
आचार्यश्रीचन्द्रकीर्त्याख्यो रोलचोऽर्हत्पदाम्बुजे ॥७५॥
श्रीपार्श्वनाथस्य पुराणमुत्तमं सन्तोषकृत्तेन सता तदुत्तमम् ।
विनिर्मित भाववतो न भूरिणा श्रीचन्द्रकीर्त्याख्यकवीन्द्रसूरिणा ॥
भूरिशास्त्रनिपुणा विमत्सराः शोधयन्तु सुधियश्च सन्नराः ।
कूटमत्र भणित च यन्मया पार्श्वनाथसुपुराणसागरे ॥७७॥

× × × ×

श्रीमद्देवगिरौ मनोहरपुरे श्रीपार्श्वनाथालये
वर्षेऽब्धीषुरसैकमेय(१६५४) इह वै श्रीविक्रमाकेस(श्व)रे ।
सप्तम्यां गुरुवासरे श्रवणभे वैशाखमासे सिते
पार्श्वाधीशपुराणमुत्तममिदं पर्याप्तमेवोत्तरम् ॥
यावद्धरामेरुकुलाचलेन्द्रमन्दाकिनीमुख्यपदार्थवर्गाः ।
तिष्ठतु तावत्परमं पुराणं नन्द्यादिदं पार्श्वजिनेश्वरस्य ॥
द्वैसहस्रे तथा सप्तशतीपंचदशोत्तरे(२७१५) ।
अस्यैव ग्रन्थराजस्य मानमुक्तं कवीशिनः ॥

इति श्रीत्रिजगदेकचूडामणिश्रीपार्श्वनाथपुराणे श्रीचन्द्रकीर्त्याचार्य-प्रणीते भगवन्निर्वाणकल्याणकव्यावर्णनो नाम पंचदशः सर्गः ।

समाप्तश्चायं ग्रन्थः ।

६०. छन्दोनुशासन (जयकीर्ति)

आदिभाग :—

श्रीवर्धमानमानम्य छन्दसां पूर्वमक्षरं ।
लक्ष्यलक्षणमावीक्ष्य वक्ष्ये छन्दोनुशासनं ॥१॥
छन्दःशास्त्रं वहित्रं तद्विवक्षोः काव्यसागरं ।
छन्दो भाग्याश्रयं सर्वं न किंचिच्छन्दसो विना ॥२॥

अन्तभाग :—

माण्डव्य-पिंगल-जनाश्रय-सेतवाख्य-
श्रीपूज्यपाद-जयदेव-बुधादिकानाम् ।
छन्दांसि वीक्ष्य विविधानपि सत्प्रयोगान्
छन्दोऽनुशासनमिदं जयकीर्तिनोक्तं ॥

इति जयकीर्तिकृतौ छन्दोनुशासनं........सम्वत् ११९२ असाढ-सुदि १० शनौ लिखितमिदमिति । [जैसलमेर प्रति

६१. प्रद्युम्नचरित (महासेन सूरि)

आदिभाग :—

श्रीमन्नमानम्य जिनेन्द्रनेमिं ध्यानाग्निदग्धाखिलघातिकक्षम् ।
व्यापारयामास न यत्र बाणान् जगद्विजेता मकरध्वजोऽपि ॥१॥
बाल्येपि यस्याप्रतिमं सुरेन्द्रो विलोक्य रूपं पुनरीक्षते स्म ।
चक्षुः सहस्र युगपद्विधाय नत्वा च तं वीरजिनं विरागम् ॥२॥
जिनेन्द्रवक्त्राम्बुजराजहंसीं प्रणम्य शुक्लामथ भारतीं च ।
उपेन्द्रसूनोश्चरित प्रवक्ष्ये यथागम पावनमात्मशक्त्या ॥३॥
कवीन्द्र-सीमानमितैर्यदुक्त गणेश्वराद्यैरपि विस्तरेण ।
तत्पादपद्मद्वयभक्तिशक्त्या संक्षिप्य तद्वक्तुमथ श्रमो नः ॥४॥

अन्तभाग :—

श्रीलाटवर्गटनभस्तलपूर्णचन्द्रः शास्त्रार्णवान्तगसुधीस्तपसा निवासः ।
काता(कतो:) कलावपि न यस्य शरैर्विभिन्नं स्वान्तं बभूव स मुनिर्जयसेननामा॥
तीर्णागमाम्बुधिरजायत तस्य शिष्यः श्रीमद्गुणाकर-गुणाकरसेनसूरिः ।
यो वृत्त-बोध-तपसा यशसा च नूनं प्रापत्परामनुपमासुपमा मुनीना ॥२॥
तच्छिष्यो विदिताखिलोरुसमयो वादी च वाग्मी कविः
शब्दब्रह्म विचित्रधामयशसा मान्या सतामग्रणीः ।
आसीत् श्रीमहसेनसूरिरनघः श्रीमुंजराजार्चितः
सीमा दर्शनबोधवृत्ततपसा भव्याब्जनी-बाधवः ॥३॥
श्रीसिन्धुराजस्य महत्तमेन श्रीपर्पटेनार्चितपादपद्मः ।
चकार तेनाभिहितः प्रबन्ध स पावनं निष्ठितमङ्गजस्य ॥४॥
श्रीमत्काममहानरस्य चरितं संसारविच्छेदनः
श्रद्धाभक्तिपराः प्रबुद्धमनसाः शृण्वन्ति ये सत्तमाः ।
संवेगात्कथयन्ति ये प्रतिदिनं योऽधीयते सततं
भूयासुः सकलास्त्रिलोकमहिताः श्रीवल्लभेन्दुश्रियः ॥५॥

श्रीभूपतेरनुचरो मघनो विवेकी शृङ्गारभावघनसागररागसारं।
काव्यं विचित्रपरमाद्भुतवर्ण-गुम्फ सलेख्य कोविदजनाय ददौ सुवृत्तं ॥६॥
श्रे० माणिक्येन लिखितं। स० १५६६ वर्षे फाल्गुणसुदि ६ गुरौ ।

[कारंजा प्रति

६२. त्रिपंचाशत्क्रियाव्रतोद्यापन (भ० देवेन्द्रकीर्ति)

आदिभाग :—

श्रीदेवेन्द्रफणीन्द्रवृन्दविनुतं नत्वा जिनं सन्मति
हारासारतुषारगौरतनुभा श्रीशारदां शारदाम्।
वदित्वा गुणधारिणो मुनिगणान् श्रीगौतमादीन् ब्रुवे
त्रिःपचाशदभिक्रियाव्रतविशिष्टोद्यापनार्चाविधिः॥
चन्द्रोपकैः शोभितपुष्पमालाजाल लसत्तोरणमुत्पताकं।
यो वारकाद्यैः सहित हिताय विधाय जैनालयमडप सत्॥
पूजोपचार प्रचुर पवित्रं पवित्रचित्तः श्रितनीतिवित्तः।
लात्वा गृही वाऽथ महोत्सवेन भव्यैर्युतश्चैत्यगृहं समेति॥
× × × ×
साहं बीजपयोजमध्यममलं कृत्वा शुभ मडलं।
त्रिःपंचाशदभीष्टकोष्टकयुतं सत्पंचवर्णैर्वरैः॥
चूर्णैः रत्नभवै रर(?) कमलसञ्छुभ्रवासो युगैः
सुस्नातार्चितभूषितैर्जिनमहः प्रारभ्यते पंडितैः।

अन्तभाग :—

भव्याऽग्रवालसुकुलोत्पलपूर्णचन्द्र-श्रीराजमान्य-सुमहत्तरनाथनाम्नः।
श्राद्धक्रियामहविधिः सदनुग्रहेण देवेन्द्रनामकविना विहितः श्रियैः स्यात्॥
पद्मावद्धरणीधराढ्यविभवः श्रीविक्रम-स्वीकृतः।
भ्राजत्सम्भवविप्रराजविबुधो देवेन्द्रपूज्यस्य(श्र)यः॥

त्रिःपचाशदभिक्रियाव्रतविधिः पूजाक्रमोऽसौ चतु-

श्चत्वारिंशदिशेव(?)षोडशशतेऽब्दे(१६४४) निर्मितो नन्दतु ॥५॥

× × × ×

जिनाभिषेकस्य विधि विहाय प्रपठ्य शान्त्यै किल शान्तिपाठं।

विसर्ज पुष्पाक्षतकैस्तदीशान् प्रपूज्य संघ सुखमेधता सः ॥

इति त्रिपंचाशत् क्रियाव्रतोद्यापन समाप्त।

६३. बृहत्षोडशकारणपूजा (सुमतिसागर)

आदिभाग :—

अनन्तसौख्य सुपदं विशाल परंगुणोय(णौघं ?)जिनदेवसेव्यं।

अनादिकालप्रभवं व्रतेशं त्रिधाह्वये षोडशकारणं वै ॥१॥

अन्तभाग :—

अवन्तिकानामसुदेशमध्ये विशालशालेन विभाति भूतले।

सुशान्तिनाथोऽस्तु जयोऽस्तु नित्यमुज्जेनिकाया परदेव तत्र(?) ॥१॥

श्रीमूलसंघे विपुलेऽथ दूरे(?)ब्रह्मामगच्छे बलशालिने गणे।

तत्राऽस्ति यो गौतमनामधेयान्वये प्रशान्तो जिनचन्द्रसूरिः ॥२॥

श्रीपद्मनन्दिर्भवतापहारी देवेन्द्रकीर्ति ··············।

विद्यादिनदिर्वरमल्लिभूषो लक्ष्मादिचन्द्रोऽभयचन्द्रदेवः ॥३॥

तत्पट्टेऽभयनन्दीशो रत्नकीर्तिगुणाग्रणीः।

जीयाद्भट्टारके लोके रत्नकीर्तिर्जगोत्तमः ॥४॥

सुमतिसागरो देवश्चक्रे पूजामघापहा।

खण्डेलवालान्वये सेयः प्रल्हादोल्हादवान् सुधीः ॥५॥

कर्त्तोपरोधपूजाय (?) मूलसंघविदाग्रणीः।

सुमतिसागर देवं श्रद्धाक षोडशकारणं ॥६॥

इति श्रीषोडशकारणोद्यापनपूजा समाप्ता।

६४. पंचकल्याणकोद्यापनविधि (ब्र० गोपाल)

आदिभाग :—

श्रीवीरनाथं प्रणिपत्य मूर्ध्ना वक्ष्ये जिनाना भुवि पचक च ।
कल्याणकाना .... ॥

अन्तभाग :—

श्रीहेमचन्द्रसुगुरोः परमप्रसादात्सारा स्तुतिः सकललोकमनोमेयं(हरेय ?)।
नंद्यादतूरपिं(?)च कौचविरं जिनाना (?) एकातमासगणनाविधिरत्र मुख्यः॥१॥

गोपालवर्णिनाकारीशुकल्याणकवर्णन ।
यदि शुद्धमशुद्धं वा शोधयंतु बहुश्रुताः ॥२॥

इति श्रीब्रह्मभीमाब्रह्मद्ब्रह्मगोपालकृत-श्रीचतुर्विंशतिजिनपंचकल्याणक समुच्चयोद्यापनविधिरयं संपूर्णः ॥

६५. सिद्धचक्र-कथा (शुभचन्द्र)

आदिभाग :—

प्रणम्य परमात्मानं जगदानन्ददायकं ।
सिद्धचक्रकथां वक्ष्ये भव्याना शुभहेतवे ॥१॥

अन्तभाग :—

श्रीपद्मनंदीमुनिराजपट्टे शुभोपदेशी शुभचन्द्रदेवः ।
श्रीसिद्धचक्रस्य कथाऽवतारं चकार भव्याम्बुजभानुमाली ॥१॥
सम्यग्दृष्टिविशुद्धात्मा जिनधर्मे च वत्सलः ।
जालाकः कारयामास कथा कल्याणकारिणीं ॥२॥

६६. अंजनापवनंजय-नाटक (कवि हस्तिमल्ल)

आदिभाग :—

आदौ यस्य पुरश्चराचरगुरोरारब्धसंगीतक-
श्चक्रे नाट्यरसान् क्रमादभिनयन्नाखडलस्ताडव ।
यस्मादाविरभूदचिंत्यमहिमा वागीश्वराद्भारती
स श्रीमान् मुनिसुव्रतो दिशतु वः श्रेयः पुराणः कवि ॥१॥

नाद्यन्ते सूत्रधारः । अलमतिप्रसगेन मारिष । इतस्तावत्प्रविश्य पारि-पार्श्वकः । भाव अयम् । सूत्रधारः—आज्ञापितोऽस्मि परिषदा । यथा । अद्य त्वया तत्र भवतः सरस्वतीस्वयवृतपतेर्भट्टारगोविन्दस्वामिनः सूनुना,श्री-कुमार-सत्यवाक्य-देवरवल्लभोदयभूषणनामार्यमिश्राणामनुजेन कवे-र्वर्धमानस्याग्रजेन कविना हस्तिमल्लेन विरचित विद्याधरनिबंधन-ं जनापवनंजयनामनाटक यथावत्प्रयोगेन नाटयितव्यमिति ।

अन्तभाग :—

श्रीमत्पांड्यमहीश्वरे निजभुजादडावलंबीकृते ।
कर्णा[टा]वनिमंडल पदनतानेकावनीसेवति(?) ।
तत्प्रीत्यानुसरन् स्वबन्धुनिवहैर्विद्वद्भिराप्तैः सम ।
जैनागारसमेत' ' 'गमे श्रीहस्तिमल्लो वसन् ॥ निष्क्रान्ताः सर्वे ।

इति श्रीगोविन्दभट्टारस्वामिनः सूनुना श्रीकुमार-सत्यवाक्य-देवरवल्लभोदय--भूषणनामार्यमिश्राणामनुजेन कवेर्वर्धमानस्याग्रजेन कविना हस्तिमल्लेन विरचिते अजनापवनंजयंनामनाटके सप्तमोऽङ्कः । समाप्त चेदमंजनापवनं-जयं नाम नाटकं । कृतिरियं हस्तिमल्लस्य ।

६७. शृङ्गारमंजरी (अजितसेनाचार्य)

आदिभाग :—

श्रीमदादीश्वरं नत्वा सोमवंशभवार्थितः ।
राय्याख्य-जैनभूपने(पार्थ?) वक्ष्ये शृङ्गारमंजरीम् ॥१॥

अष्टाविंशं शत तस्याः प्रमाणं श्लोकपद्यतः ।
अनुष्टुप्सख्यया पञ्चचत्वारिंश शतं मतं ॥२॥
विदोषं सगुणं रीतिरसालंकारगं मुदे ।
काव्यं कुर्वीत शब्दार्थरचनानिपुणः कविः ॥३॥
×　×　×　×

अन्तभाग :—

राज्ञी विट्ठलदेवीति ख्याता शीलविभूषणा ।
तत्पुत्रः कामिरायाख्यो 'राय' इत्येव विश्रुतः ॥४६॥
तद्भूमिपालपाठार्थमुदितेयमलं-क्रिया ।
सक्षेपेण बुधैर्ल्लेषा यत्रास्ति(?) विशोध्यताम् ॥४७॥

इति श्रीमदजितसेनाचार्य-विरचिते शृङ्गारमंजरीनामालंकारे तृतीयः परिच्छेदः ॥

(दूसरी प्रतिमें[१]) श्रीसेनगणाग्रगण्यतपोलक्ष्मीविराजिताजितसेनदेव-यतीश्वरविरचितः शृङ्गारमंजरी नामालकारोऽयम् ॥

६८. शङ्खदेवाष्टक (भानुकीर्ति)

आदिभाग :—

शतमखशतवन्द्यो मोक्षकान्ताभिनन्द्यो
दलितमदनचापः प्राप्तकैवल्यरूपः ।
कुमतवनकुठारः शङ्खरत्नावतारः
त्रिभुवननुतदेवः पातु मां शङ्खदेवः ॥१॥

अन्तभाग :—

जिनपदकमलालिर्जैनभूतेपि कालि-
र्मुनिपतिमुनिचन्द्रः शिष्यराजेन्द्रचन्द्रः ।

---

१ दोनों प्रति ऐ०प० सरस्वतीभवन बम्बईमें हैं। अगस्त सन् १९२८ में उन्हीं परसे यह प्रशस्ति ली गई थी।

सकलविमलसूक्तिर्भानुकीर्तिप्रयुक्ति-
स्त्रिभुवननुतदेवः पातु मा शङ्खदेवः ॥८॥

६६. तत्वार्थसूत्र-सुखबोधवृत्ति (भ० योगदेव)

आदिभाग :—

विनष्टसर्वकर्माणं मोक्षमार्गोपदेशकं ।
तद्गुणोद्भूतिलाभाय सर्वज्ञं जगतो गुरुं ॥१॥
आलंबनं भवाभोधौ पततां प्राणिनां परं ।
प्रणिपत्य महावीरं लब्धानंतचतुष्टयं ॥२॥
सत्क्षेपितागमन्यासा मुग्धबुद्धिप्रबोधिका ।
सुखबोधाभिधा वक्ष्ये वृत्ति तत्त्वार्थगोचरा ॥३॥

पादपूज्य(पूज्यपाद)विद्यानन्दाभ्या यद्वृत्तिद्वयमुक्तं तत्केवल· ·तर्का-गमयोः पाठकैरबलाबालादिभिर्ज्ञातु न शक्यते ततः संस्कृतप्राकृतपाठकाना सुखज्ञानकारणवृत्तिरियमभिधीयते ।

(इसके बाद 'मोक्षमार्गस्य नेतारं' इत्यादि मंगल पद्य देकर उसकी व्याख्या की है और उसे सूत्रकारकृत सूचित किया है ।)

अन्तभाग :—

शुद्धेद्धतपःप्रभावपवित्रपादपद्मरजः किंजल्कपुंजस्य मनःकोणैक-देशक्रोडीकृताऽखिलशास्त्रार्थाम्बरस्य पंडितश्रीबन्धुदेवस्य गुणप्रबन्धाऽनु-स्मरणाजातानुग्रहेण प्रमाणनयनिर्णीताखिलपदार्थप्रपञ्चेन श्रीमद्भुजबल-भीमभूपाल-मार्तंडसभायामनेकधालब्धतर्क्क-चक्राकत्वेनाबलाब(बा)लादीना-मात्मनश्चोपकारार्थं न पांडित्यमदविलासात्सुखबोधाऽभिधा वृत्ति कृता महा-भट्टारकेण कुम्भनगरवास्तव्येन पंडितश्रीयोगदेवेन प्रकटयंतु संशोध्य बुधा यदत्रायुक्तमुक्तं किंचिन्मतिविभ्रमसंभवादिति ॥

[इति] श्रीप्रचंडपंडितमंडली-मौनव्रतदीक्षागुरोर्योगदेवविदुषः कृतौ सुख-बोधाभिधानतत्वार्थवृत्तौ दशमोऽध्यायः समाप्तः ।

७०. विषापहार-टीका (नागचन्द्रसूरि)

आदिभाग :—

वंदित्वा सद्गुरून् पंचज्ञानभूषणहेतवः ।
व्याख्या विषापहारस्य नागचन्द्रेण कथ्यते ॥१॥

अथातः स्याद्वादविद्यापूर्वकुल्कीलकोटीकिरणमालिना गृहस्थाचार्यकुंजरेण धनंजयसूरिणा सामायिकमनुतिष्ठता तदानीमेव स्वकीयपुत्रस्य सर्पदष्टत्वमाकर्ण्यापि ततोऽचलता भगवद्गुणग्रामदत्तचित्तेनाचालमेव स्तुवता कृतस्य स्तवस्य प्रभावनिःकाशिततद्गतविषनिषेकोद्रेकस्य तत एव विषापहार इति व्यपदेशभाजोऽतिगहनगभीरस्य सुखावबोधार्थं बागडदेशमंडलाचार्यज्ञानभूषणदेवैर्मुहुर्मुहुरुपरुद्धः कार्णाटादिराजसभे प्रसिद्धः प्रवादिगजकेशरीविरुदकविमदविदारी सद्दर्शनज्ञानधारी नागचंद्रसूरिर्धनंजयसूर्यभिहितार्थं व्यक्तीकर्तुमशक्नुवन्नपि गुरूवचनमलंघनीयमिति न्यायेन तदभिप्राय विवरीतुं प्रतिजानीते ।

अन्तभाग :—

इयमर्हन्मतक्षीरपारावारपार्वणशशांकस्य मूलसंघदेशीगणपुस्तकगच्छ-पनशोकावलीतिलकालंकारस्य तौलवदेशविदेश-पवित्रीकरणप्रवण-श्रीमल्ललितकीर्तिभट्टारकस्याग्रशिष्य - गुणवद्गुणपोषण-सकलशास्त्राध्ययन-प्रतिष्ठायात्राद्युपदेशानूनधर्मप्रभावनाधुरीण- देवचंद्रमुनीन्द्रचरणनखकिरण-चंद्रिकाचकोरायमाणेन कर्णाय (?) विप्रकुलोत्तंस-श्रीवत्सगोत्रपवित्रपार्श्वनाथगुमटाम्बातनूजेन प्रवादिगजकेशरिणा नागचंद्रसूरिणा विषापहार-स्तोत्रस्य कृतव्याख्या कल्पान्तं तत्त्वबोधायेति भद्रम् ।

इति विषापहारस्तोत्र-टीका समाप्ताः ।

७१. पाण्डवपुराण (श्रीभूषणकृत)

आदिभाग :—

प्रणम्य श्रीजिनं देवं सर्वज्ञं संभवं शिवं ।
कुर्वे हि पाण्डवानां हिं चरित्रं चित्तरंजनम् ॥१॥

('प्रथम पद्यके बाद वृषभ, चन्द्रनाथ, शान्ति, नेमि और महावीर' भगवानकी स्तुति करके तदन्तर ब्राह्मीवाणी, गौतमगणधर, युधिष्ठिर, भीम, अर्जुन, नकुल और सहदेवकी स्तुति की गई है।)

भद्रबाहुर्मुनिर्जीयात् महाज्ञानी महादमी ।
येन कृत्स्नं श्रुतं ज्ञातं पंचमो श्रुतकेवली ॥१२॥
विशाखाचार्यो मां पातु विशाखा भूतलेऽखिले ।
अद्यापि वर्तते शुद्धा देवेन्द्रैरपि संस्तुतः ॥१३॥
स जीयाद्रामसेनोऽपि प्रतिबोधनपंडितः ।
दिग्वासा शुद्धचेतस्को निमित्तज्ञानभास्करः ॥१४॥
समंतभद्रो भद्रार्थो भानुभाभारभूषितः ।
येन देवागमस्तोत्रं कृतं व्यक्तमिहावनौ ॥१५॥
अमित्यादिगतिर्येष्टः(?) शब्दव्याकरणार्णवः ।
पुनातु पावनामूर्तिर्यस्य संवर्तते क्षितौ ॥१६॥
अकलंकश्चिरं जीयादकलंकोऽवनिश्रुतः ।
पादेन ताडिता येन मायादेवी घटस्थिता ॥१७॥
त्रिषष्टिपुरुषाणां वै पुराणं येन निर्मितम् ।
स जीयाज्जिनसेनश्च संदेहध्वांतभास्करः ॥१८॥
गुणादिभद्रपर्यंता सूरयो भांतु भूतले ।
पुराणपूर्णसन्मार्गदर्शका रवयो यथा ॥१९॥
तं पुराणं समालोक्य गौणभद्र विशारद ।
पुराणं पांडवानां हि ब्रुवे सूत्रानुसारतः ॥२०॥
नेमिसेनश्चिरं जीयाद्विषयचारिः भवेद्वलात् ।
पद्मावत्यपरं तीर्थमकरोच्चारणर्द्धिवत् ॥२१॥
रत्नकीर्तिः भवेद्रत्नरोहणाचलवत् सदा ।
बाल्येपि येन निष्कामकामोपि कृतवान्मुनिः ॥२२॥
अन्वर्थो धर्मसेनोऽभूद्धर्मसेनो गुणाग्रणीः ।

वैराग्यरत्नवारीशो दिक्पेलो दमसंयुतः ॥२३॥
विमलसेनको सूरिः रविरिव विराजते ।
नानावस्तुकदंबानां ख्यातको भुवनोदरे ॥२४॥
विश्वसेनमुनिर्जातो गद्विशालः सर्वकीर्तिक ।
स्वन्यायचक्रचक्रेण जितं येनारिमंडलम् ॥२५॥
भाति भूवलये सूरिशोभाभरविभूषितः ।
विद्याभूषणसूरीन्द्रो ग्रथाना ग्रंथने क्षमः ॥२६॥
ग्रंथार्णवसुगंभीरः क्वाऽत्र मे बुद्धिलाघवी ।
अतोऽहं मारस मेने सर्वेषां हास्यदायकम् ॥२७॥
यद्दत्र कवयोऽभूवन् जिनसेनादिका वराः ।
तत्पदांभोजनमनात्करिष्ये तत्पुराणकम् ॥२८॥
विवक्षन् हास्यतां याति यथा मूको तथाप्यहं ।
हास्यस्य भाजनं शास्त्र विवित्सुर्ज्ञानलेशतः ॥२९॥
पंगुर्जिगमिषुर्मेरुमस्तकं निखिलैर्जनैः ।
विहस्यतेऽप्यहं शास्त्र चिकीर्षुरंजसा तथा ॥३०॥
शास्त्रं कर्तुमशक्तोऽहं यद्यपि सादरो यतः ।
सदा धेनुर्यथा वत्सं रक्षति क्षीरदानतः ॥३१॥
पूर्वाचार्यकृते ग्रन्थे मार्गसंदर्शनाल्लघु ।
क्रियते पावनं शास्त्रं मया स्वज्ञानशुद्धये ॥३२॥
सूर्यप्रकाशितो मार्गः दीपः किं न प्रकाशयेत् ।
पूर्वाचार्यैः कृतो ग्रंथो मया किं न करिष्यते ॥३३॥

× × × ×

(आगे दुर्जनादिका तथा कथा, वक्ता, श्रोताका स्वरूप वर्णित है।)

अन्तभाग :—

छंदास्यलंकारगणांश्च वेद्मि अनेकशास्त्राणि विवेकजानि ।
जैनेन्द्रमुख्यानि सुलक्षणानि काव्यानि न्यायानि प्रबोधकानि ॥६३॥

गोमट्टसाराणि महार्णवानि त्रैलोक्यसाराणि सुतर्ककाणि ।
नो विद्मयह चाष्टसहस्रकानि नानाप्रकाशोद्रमकानि सद्यः ॥९४॥
ईदृग्विधोऽहं सततं विबुध्य भोः साधुवर्गाः प्रविमुच्य कोपं ।
विशोध्यता मे कृतिमेव बुध्या बाले जने को हि हितं न कुर्यात् ॥९५॥
काष्ठासंघान्हगच्छे जगति सुविदितः सारनदीतटांको
धर्माधारोऽस्ति शस्तो मुनिगणसहितस्तत्र विद्यागणोऽपि ।
पूज्याः श्रीरामसेना गुरव इह बभूवुः पुरा पौरमान्याः
शाब्दातोक्तोपपत्त्या चरणमनुपमं ये चरते शरण्याः ॥९६॥
वंशे तेषा प्रशस्येऽजनिषत् गुरवो धर्मसेनाभिधाना-
स्तत्पट्टे लब्धवर्णाः सुविमलपदतः सेनसंज्ञाः मुनींद्राः ।
सूरीशास्तत्पदेपि प्रचुरगुणयुताः श्रीविशालास्सुकीर्ति-
सज्ञा विज्ञातशास्त्रास्तृणमणिसुजनाऽमित्रतुल्यस्वभावा ॥९७॥
तेषा पट्टे सुदक्षाः मुनिजनमहिता विश्वसेनाभिधाना'
सूरेंद्रा वै वितद्रा स्व(त ?)रणिसममहोद्योतिताशा बभूवुः ।
सूरिस्तेषा हि पट्टे सकलगुणगणाः प्रौढविद्याविभूषाः ॥९८॥
जीयात्तेषा हि पट्टे सकलगुणनिधिश्चारुचारित्रभूपः
श्रीमच्छ्रीभूषणाख्यो विबुधजननुतो जैनतत्वार्थवेदी ।
ज्ञाता दाता सुवक्ता परम[त]सकलान् वेत्ति विज्ञानदक्षः
तत्त्वातत्त्वप्रणेता विमलतरगुणश्चारुचारित्रयुक्तः ॥९९॥
शृण्वति ये भावधिया पठति चारित्रमेव प्रवरं विशाल ।
लिख्यापर्यत्यादरतो नितातं भजति ते सौख्यपरंपरा च ॥१००॥

(आगे दो पत्रोंमे आशीर्वाद है ।)

विद्याविभूषोत्तमपट्टधारी शास्त्रस्य वेत्ता वरदिव्यवाणी ।
जीयात्पृथिव्या जिनधर्मदाता श्रीभूषणोऽसौ यतिराट् नितातं ॥१०३॥
कृत चरित्र शुभपाडवाना भटोत्तमाना प्रवरं सुपुण्य ।
सुश्र्यादिभूषेण विशुद्धबोधात् पुरातन वीक्ष्य पुराणमेव ॥१०४॥

च्युत्सृष्टापरसंघसंततिबृहच्छ्रीकाष्ठसंघान्वये
संप्रा[ता]रुणरत्ननामकविना लाभाय बोधे पुनः।
दृष्टोऽयं रविवंशपुण्यचरितः श्रीपार्वतः सर्वतो
व्याप्ताशामुखमंडलः स्थिरतरः स्थेयात्पृथिव्यां चिरं ॥३९॥
रस-वृष-यति-चंद्रे ख्यातसंवत्सरे(१७१६)ऽस्मिन्
नियमितसितवारे वैजयंती-दशम्या ।
अजितजिनचरित्रं बोधपात्रं बुधानां
रचितममलवाग्मि-रक्तरत्नेन तेन ॥४०॥
मुद्गले भूभुजां श्रेष्ठे राज्येऽवरंगसाहिके ।
जहानावाद-नगरे पार्श्वनाथजिनालये ॥४१॥

[सरसावा-मन्दिर-प्रति

७३. आदिनाथ-फाग (भ० ज्ञानभूषण)

आदिभाग :—

यो वृन्दारक-वृन्द-वन्दित-पदो जातो युगादौ जयी
हत्वा दुर्जय-मोहनीयमखिलं शेषश्च घातित्रयम्।
लब्ध्वा केवल-बोधनं जगदिदं सबोध्य मुक्तिं गत-
स्तत्कल्याणक-पञ्चकं सुरकृतं व्यावर्णयामि स्फुटं ॥१॥

अन्तभाग :—

सर्व्वानेव नवोनषट्शतमितान्(५९१)श्लोकान्विबुध्याऽत्र वै
शुद्धं ये सुधियः पठन्ति सततं ते पाठयन्त्वादरात् ।
ये केचिन्निपुणा लिखन्ति लिखने ते शुद्धवर्णैः स्वय-
मन्यार्थं किल लेखयन्तु च पुरोः कल्याण-व्यावर्णनम् ॥
विख्यातो भुवनादिकीर्तिमुनिपः श्रीमूलसंघेऽभवत्
तत्पट्टेऽजनि बोधभूषणमुनिः स्वात्मस्वरूपे रतः।
जाता प्रीतिरतीव तस्य महता कल्याणकेषु प्रभो-
स्तेनेदं विहितं ततो जिनपतेराद्यस्य तद्वर्णनम् ॥

७४. भक्तामरस्तोत्र-वृत्तिः (ब्र० रायमल्ल)

आदिभाग :—

श्रीवर्धमानं प्रणिपत्य मूर्ध्ना दोषैर्व्यपेतं ह्यविरुद्धवाचं ।
वक्ष्ये फल तद्वृषभस्तवस्य सूरीश्वरैर्यत्कथितं क्रमेण ॥१॥

अन्तभाग :—

सकलेन्द्रोर्गुरोर्भ्रातुर्जैसेति वर्णिनः सतः ।
पादस्नेहेन सिद्धेय वृत्तिः सारसमुच्चया ॥२॥

(इसके पश्चात् दो श्लोकोंमें काव्योंका फल वर्णन किया है)

श्रीमद्हूंबड़वंशमंडणमणिर्मह्येति नामा वणिक् ।
तद्भार्यागुणमडिता व्रतयुता चम्पामितीताभिधा(?)॥६॥
तत्पुत्रो जिनपादकंजमधुपो रायादिमल्लो व्रती ।
चक्रे वृत्तिमिमा स्तवस्य नितरा नत्वा श्री(सु?)वादींदुक ॥७॥
सप्तषष्ठ्यंकिते वर्षे षोडशाख्ये हि संवते(१६६७) ।
आषाढश्वेतपक्षस्य पंचम्या बुधवारके ॥८॥
ग्रीवापुरे महासिन्धोस्तटभाग समाश्रिते ।
प्रोत्तुंग-दुर्ग-संयुक्ते श्रीचन्द्रप्रभ-सद्मनि ॥९॥
वर्णिनः कर्मसीनाम्नः वचनात् मयकाऽरचि ।
भक्तामरस्य सद्वृत्तिः रायमल्लेन वर्णिना ॥१०॥

इति श्रीब्रह्मरायमल्ल-विरचिता भक्तामरस्तोत्रवृत्तिः समाप्ता ।

[रोहतक-मन्दिर-प्रति

७५. हरिवंशपुराण (ब्रह्म जिनदास)

आदिभाग :—

सिद्धं सम्पूर्ण-भव्यार्थं सिद्धेः कारणमुत्तमं ।
प्रशस्त-दर्शज्ञान-चारित्र-प्रतिपादनम् ॥१॥

सुरेन्द्र-मुकटाश्लिष्ट-पादपद्मांशुकेशरं ।
प्रणमामि महावीरं लोकत्रितय-मंगलम् ।।२।।*
वन्दे नेमीश्वरं भक्त्या त्रिदशाधिप-वंदितं ।
त्रिजगत्पूज्यपादाब्जं समस्ताऽघविनाशनं ।।३।।

× × ×

श्रीवीरजिननाथोक्तो गौतमं गणनायकं ।
सोऽर्थः प्राप्तः सुधर्मं च श्रीजम्बूस्वामिनं ततः ।।४६।।
विद्युच्चरं ततः कीर्तिमनुत्तरविद् क्रमात् ।
रविषेणाभिधाचार्यं जिनसेनगुरुं ततः ।।४७।।
तद्वाक्यरचना प्राप्य मयाऽत्र क्रियते स्फुट ।
ग्रन्थं सुखेन मनुजा यथा जानति सत्कथां ।।४८।।
भद्रबाहुं प्रणम्याथ यतिसंघनमस्कृत ।
श्रीकुन्दकुन्दाचार्यादीन् मुनीन् रत्नत्रयांकितान् ।।४६।।
गुरुसकलकीर्तिं च श्रुताभोधिं महामुनिं ।
भक्त्या भुवनकीर्तिं च चंचत्कीर्तिं तपोनिधिं ।।५०।।
निर्ग्रंथान् शुद्धचारित्रानित्याद्यानपरानपि ।
अनुक्रमात्संगमुक्तान् रागद्वेषातिगान् सदा ।।५१।।
तन्मया जिनदासेन संक्षेपादुच्यतेऽधुना ।
हरिवंशस्य चरित भव्य-श्रुति-सुखाकर ।।५२।।

अन्तभाग :—

श्रीमन्नेमिचरित्रमुत्तममिदं नानाकथापूरित
पापध्वान्त-विनाशनैक-तरणिः कारुण्यवल्लीवनं ।

---

* ये दोनों श्लोक मूलतः श्रीरविषेणाचार्यकृत पद्मचरितके हैं। अन्य पद्योंकी तरह इन्हें भी ग्रन्थमें उद्धृत किया गया है।

भव्यश्रेणिमनःप्रमोदसदनं भक्त्याऽनघं कीर्तनं
नानासत्पुरुपालिचेष्टितयुत पुण्यं शुभं पावनं ॥३२॥
श्रीवर्द्धमानेन जिनेश्वरेण त्रैलोक्यवंद्येन [यदुक्त]मादौ ।
ततः परं गौतमसंज्ञकेन गणेश्वरेण प्रथित जनाना ॥३३॥
ततः क्रमाच्छ्रीजिनसेननाम्नाचार्येण जैनागम-कोविदेन ।
सत्काव्यकेलीसदनेन पृथ्व्या नीत प्रसिद्धं चरित हरेश्च ॥३४॥
श्रीकुन्दकुन्दान्वयभूपणोऽथ बभूव विद्वान् किल पद्मनन्दी ।
मुनीश्वरो वादिगजेन्द्रसिंहः प्रतापवान् भूवलये प्रसिद्धः ॥३५॥
तत्पट्टपंकेजविकाशभास्वान् बभूव निर्ग्रन्थवरः प्रतापी ।
महाकवित्वादिकलाप्रवीणस्तपोनिधिः श्रीसकलादिकीर्तिः ॥३६॥
पट्टे तदीये गुणवान्मनीषी क्षमानिधानो भुवनादिकीर्तिः ।
जीयाच्चिर भव्यसमूहवंद्यो नानायतिव्रातनिषेवणीयः ॥३७॥
जगति भुवनकीर्ति भूतले ख्यातकीर्तिः श्रुतजलनिधिवेत्ताऽनगमानप्रभेत्ता ।
विमलगुणनिवासश्छिन्नससारपाशः स जयति जिनराजः साधुराजीसमाजः॥३८
सद्ब्रह्मचारी गुरुपूर्वकोऽस्य भ्राता गुणज्ञोऽस्ति विशुद्धचित्तः ।
जिनस्य दासो जिनदासनामा कामारिजेता विदितो धरित्र्या ॥३९॥
श्रीनेमिनाथस्य चारित्रमेतदनेन नीत्वा रविषेण(जिनसेन)सूरेः ।
समुद्धृत स्वान्यसुखप्रबोधहेतोश्चिरं नदतु भूमिपीठे ॥४०॥

इति श्रीहरिवंशपुराणे भट्टारक सकलकीर्तिशिष्यब्रह्मजिनदास-विरचिते श्रीनेमिनाथ-निर्वाणवर्णनो नामैकोनचत्वारिंशत्तमः सर्गः ।

७६. सिद्धान्तसार (नरेन्द्रसेनाचार्य)

आदिभाग :—

भूर्भुवःस्वस्त्रयीनाथं त्रिगुणात्मत्रयात्मकं ।
त्रिभिः प्राप्तपरधाम वन्दे विध्वस्तकल्मषं ॥१॥

नित्याद्येकान्त-विध्वंसि मत मतिमता मतं ।
यस्य सः श्रीजिनः श्रेयान् श्रेयासि वितनोतु नः ॥२॥
श्रीमच्छ्रीजिनचन्द्रस्य वर्द्धमानस्य शासनं।
देवैर्दीप्तगुणैर्द्दष्टमिष्टमत्राऽभिनन्दतु ॥३॥
जैनीं द्विसप्तति नत्वाऽतीतानागतवर्तिनीं।
तत्त्वार्थसंग्रहं वक्ष्ये दृष्ट्वागमपरम्परा ॥४॥

अन्तभाग :—

श्रीवर्द्धमानस्य जिनस्य जातो मेदार्यनामा दशमो गणेशः ।
श्रीपूर्णतल्लाकि(छि)त-देह-संस्थो यत्राभवत्स्वर्गसमा धरित्री ॥८३॥
कल्पोर्व्वी(र्वी)रुहतुल्याश्च हारकेयूरमण्डिताः ।
जाता ज्ञाय(त)स्ततो ज्ञाता संघोऽसौ ग्यप्रढवागड्ः ॥८४॥
जातस्तत्र सता मित्रः पद्मसेनो महामुनिः ।
यच्छिष्यकिरणाः सर्वे सप्रतप्यन्ति दुस्सहाः ॥८५॥
श्रीधर्मसेनोऽजनि तत्र संघे दिगम्बरः श्वेततरैर्गुणैः स्वैः ।
व्याख्या सुदन्ताशुभिरुल्लसद्भिर्वस्त्रावृतो यः प्रतिभासते स्य(स्म)॥८६॥
भंजन्वादीन्द्रमानं पुरि पुरि नितरा प्राप्नुवन्नुद्यमानं
तन्वन् शास्त्रार्थदानं रुचि रुचि रुचिरं सर्वथानिर्निदानं ।
विद्यादर्शोपमानं दिशि दिशि विकिरिन् स्वय(स्वं) यशो योऽसमानं
तस्माच्छ्रीशान्तिषेणः समजनि सुगुरुः पाप-धूली-समीरः ॥८७॥
यत्रास्पदं निदधती परमागमश्रीरात्मन्यमन्यतसतीत्वमिदं तु चित्रं ।
वृद्धा च सततमनेकजनोपभोग्या श्रीगोपसेनगुरुराविरभूत्स तस्मात् ॥८८॥
उत्पत्तिस्तपसा पदं च यशसामन्यो रविस्तेजसा-
माद्रिः सद्वचसा विधिः सुतरसामासीन्निधिः श्रेयसा ।
आवासो गुणिना पिता च शमिनां माता च धर्मात्मना
न ज्ञातः कलिना जगत्सुवलिना श्रीभावसेनस्ततः ॥८९॥

ख्यातस्तत. श्रीजयसेननामा जातस्तपःश्रीहृतदुःकृतौघः ।
सत्तर्कविद्यार्णव-पारदृष्वा विश्वासगेहं करुणास्पदानाम् ॥६०॥

आचार्यः प्रशमैकपात्रमसमः प्रज्ञादिभिर्स्वैर्गुणैः
पट्टे श्रीजयसेननामसुगुरोः श्रीब्रह्मसेनो यतिः ।
सजल्पाम्बुधिमध्यमग्नवपुष' शश्वद्विकल्पोर्मितः(भिः?)
जल्पाका परवादिनोऽत्र विकलाः के के न जाता क्षितौ ॥६१॥

तस्मादजायत गणी गुणिना गरिष्ठो भव्याम्बुजप्रतिविकाशन-पद्मबन्धुः ।
कंदर्पदर्पदलने भुवनैकमल्लो विख्यातकीर्तिरवनौ कविवीरसेनः ॥६२॥

श्रीवीरसेनस्य गुणादिसेनो जातः सुशिष्यो गुणिना विशेषः ।
शिष्यस्तदीयोऽजनि चारुचित्त सदृष्टिवन्तो(वान)त्र नरेन्द्रसेनः ॥६३॥

गुणसेनोदयसेनौ जयसेनो सम्बभूवुराचार्याः ।
तेषा श्रीगुणसेनः सूरिर्जातः कलाभूरिः ॥६४॥

अतिदुःषमानिकटवर्तिनि कालयोगे नष्टे जिनेन्द्रशिववर्त्मनि यो बभूव ।
आचार्यनामनिरतोऽत्र नरेन्द्रसेनस्तेनेदमागमवचो विशद निबद्धम् ॥६५॥

इति श्रीसिद्धान्तसार(तत्त्वार्थ)सग्रहे आचार्यश्रीनरेन्द्रसेन-विरचिते द्वादशमः परिच्छेदः ॥१२॥

७७. द्रौपदी-प्रबंध (जिनसेन सूरि)

आदिभाग :—

सष्ट्र (सृष्टेः) षोडशतीर्थाय कृतनामेति शान्तये ।
चक्रेशाय जिनेशाय नमः शान्ताय शान्तये ॥१॥
येन सतदशं तीर्थं प्रावर्त्त पृथुकीर्त्तिना ।
तस्मै कुन्थुजिनेन्द्राय नमः प्राक्चक्रवर्त्तिने ॥२॥
नमोऽष्टादशतीर्थेन प्राणिनामिष्टकारिणे ।
चक्रपाणिजिनाऽरय निरस्तदुरितारये ॥३॥

धर्मामृताम्बुभृत्सूक्तनरो विहारी ।
जैनो मुनिर्जयतु भव्यजनोपकारी ॥१६॥
आसीत्तत्प्रियशिष्यः कामक्रोधादिदोषरिपुविजयी ।
श्रीपुष्पसेननामा मुनीश्वरः कोविदैकगुरुः ॥२०॥
श्रीमूलसंघ-भव्याब्ज-भानुमान् विदुषां पतिः ।
पुष्पसेनार्यवर्योऽभूत्परमागमपारगः ॥२१॥
यश्चार्वाकानजैषीत् सुगत-कणभुजोर्वाक्यभंगीरभाक्षी-
दक्षयेपीदक्षपादोदितमतमतनीतपारमर्षापकर्षं(?) ।
शोभां प्राभाकरीं तामपहृतविमतां भाट्ट-विद्या मनीषी
देवोऽसौ पुष्पसेनो जगति विजयते वर्धिताऽर्हन्मतश्रीः ॥२२॥
तच्छिष्योऽन्यमतान्धकारमथनः स्याद्वादतेजोनिधिः
साक्षाद्राघवपाण्डवीयकविताकान्तारमूढात्मनाम् ।
व्याख्यानांशुचयैः प्रकाशितपदन्यासो विनेयात्मना
स्वान्ताम्भोजविकाशको विजयते श्रीपुष्पसेनार्यमान् ॥२३॥
श्रीमद्धर्मे गुणानां गणमिह दयया सम्यगारोप्य रूढो
बाह्यान्तस्सत्तपोऽश्व व्रतनियमरथ मार्गणौघैर्गुणाकैः ।
लक्ष्यीकुर्वन् न लक्ष्यं मनसिजमजयन् मोक्षसंदानचित्त-
स्त्रैलोक्यं शासितारं जयति जिनमुनि. पुष्पसेन. सधर्मा ॥२४॥
पुष्पसेनमुनिर्भाति भीमसेनइवाऽपरः ।
वृहत्त्याग-दया-युक्तो दु.शासनमदापहः ॥२५॥
बाणास्तपो धनुर्धर्मो गुणा नामावलिर्गुण. ।
पुष्पसेनमुनिर्धन्वी शरव्यं पुष्पकेतन ॥२६॥
तं पुष्पसेनदेवं कलिकालगणेश्वरं सदा वन्दे।
यस्य पदपद्मसेवा विबुधानां भवति कामदुघा ॥२७॥
तदीयशिष्योऽजनि दाक्षिणात्यः श्रीमान्द्विजन्मा भिषजांवरिष्ठः ।
जिनेन्द्रपादाम्बुरुहैकभक्तः सागारधर्मः करुणाकराख्यः ॥२८॥

तस्यैव पत्नी कुलदेवतेव पतिव्रतालङ्कृतपुण्यलक्ष्मीः ।
यदर्कमाम्बा जगति प्रतीता चारित्रमूर्तिर्जिनशासनोत्का ॥२६॥
तयोरासीत्सूनुस्मदमलगुणाढ्यः सविनयो
जिनेन्द्र-श्रीपादाम्बुरुह-युगलाराधनपरः ॥
अधीतिः शास्त्राणामखिलमणिमन्त्रौषधवता ।
विपश्चिन्निर्णेता नयविनयवानाऽऽर्य इति यः ॥३०॥

श्रीमूलसङ्घकथिताखिलसन्मुनीना श्रीपादपद्ममरसीरुहराजहंसः ।
स्यादय्यपार्य इति काश्यपगोत्रवर्यो जैनालपाकवरवंशसमुद्रचन्द्रः ॥३१॥
प्रसन्नकविरानृतैः प्रवचनागविद्यामृतैः परमतत्त्वधर्मामृतैः सुधाकर इवाऽपरो-
ऽखिलकराभिराम. सदा चकास्ति सुकृतोदयः कुवलयोत्सवः श्रीयुत. ॥३२॥

कवितानाम काप्यन्या सा विदग्धेषु रज्यते ।
केऽपि कामयमानास्ता क्लिश्यते हन्त बालिशाः ॥३३॥
स्वस्त्यस्तु सज्जनेभ्यो येषा हृदयानि दर्पणसमानानि ।
दुर्वचन-भस्म-संगादधिकतरं यान्ति निर्मलताम् ॥३४॥
स्वस्त्यस्तु दुर्जनेभ्यो यदीयभीत्या कविद्विजाः सर्वे ।
रचयन्ति भरमसूक्तिं कवित्वरचनासु ये कृतिषु ॥३५॥
असता मगपंकेन यदंगं मलिनीकृते ।
तदहं धौतुमिच्छामि साधुसंगनिवारिणा ॥३६॥
सुस्वरत्व सुव्रतत्वं साहित्यं भाग्यसम्भव ।
बलात्कारेण यद्गीत स्वाधीन नैव जायते ॥३७॥
शब्दशास्त्रमपि काव्यलक्षणं छंदस स्थितिमजानता भ(कृ)तिः ।
अय्यपार्य-निजुणा विनिर्मिता कुलवग्रसादत·(?)॥३८॥
शाकाब्दे विधुवार्धिनेत्रहिमगो(१२४१)सिद्धार्थसम्वत्सरे
माघे मासि विशुद्धपक्षदशमी-पुष्यर्क्षगेऽह्नि ।
ग्रंथो रुद्रकुमारराज्यविषये जैनेन्द्रकल्याणभाग्
सम्पूर्णोऽभवदेकशैलनगरे श्रीपालनन्द्(नन्द वा नन्द्?)ज्ञि. ॥३६॥

इति सकलतार्किक-चक्रवर्ति-समन्तभद्र-मुनीश्वर-प्रमुख-कविवृन्दारक-वृन्द-मानस-सरोवर-राजहंसायमानर्हत्प्रतिमाभिषेक-विशेष-विशिष्ट-गंधोदक-पवित्रीकृतोत्तमाङ्गेन अय्यपार्येन श्रीपुष्पसेनार्योपदेशक्रमेण सम्यग्विचार्य पूर्वशास्त्रेभ्यः सारमुद्धृत्य विरचितः श्रीमज्जिनेंद्रकल्याणाभ्युदयापरनामधेयोऽयं त्रिंशदभ्युदयो ग्रंथः समाप्तः ॥ (ग्रन्थ-श्लोकसंख्या ३५६०)

[श्रवणबेल्गोल-दौर्बलिशास्त्रि-प्रति

८२. धन्यकुमार-चरित्र (भ० गुणभद्र)

आदिभाग :—

स्वयंभुवं महावीरं लब्धाऽनंतचतुष्टयं ।
शतेन्द्रप्रणतं वन्दे मोक्षाय शरणं सताम् ॥१॥
प्रणमामि गुरूंश्चैव सर्वसत्वाऽभयंकरान् ।
रत्नत्रयेण सयुक्तान्संसारार्णवतारकान् ॥२॥
दिश्यात्सरस्वती बुद्धिं मम मन्दधियो दृढा ।
भक्त्यानुरंजिता जैनी मातेव पुत्रवत्सला ॥३॥
स्याद्वादवाक्यसंदर्भं प्रणम्य परमागमम् ।
श्रुतार्थभावनां वक्ष्ये कृतपुण्येन भाविताम् ॥४॥
क्षमंतु सज्जनाः सर्वे ये समजस-बुद्धयः ।
शोधयंतु पदं दुष्टं विशुद्धं स्थापयन्तु ते ॥५॥

× × ×

अन्तभाग :—

इति धन्यकुमारचरिते तत्त्वार्थभावनाफलदर्शके आचार्यश्रीगुणभद्र-कृते भव्य-वल्हण-नामाङ्किते धन्यकुमार-शालिभद्रयति-सर्वार्थसिद्धिगमनो नाम सप्तमः परिच्छेदः ॥७॥

यः संसारमसारमुन्नतमतिर्ज्ञात्वा विरक्तोऽभव-
द्धत्वा मोहमहाभटं शुभमना रागाधिकारं तथा ।

आदायेति महाव्रतं भवहरं माणिक्यसेनो मुनि-
र्नैर्ग्रन्थ्यं सुखदं चकार हृदये रत्नत्रय मण्डनं ॥१॥

शिष्योऽभूत्पदपकजैकभ्रमरः श्रीनेमिसेनो विभु-
स्तस्य श्रीगुरुपुंगवस्य सुतपाश्चारित्रभूषान्वितः।
कामक्रोधमदान्ध-गन्धकरिणो ध्वंसे मृगाणापतिः
सम्यग्दर्शन-बोध-साम्य-निचितो भव्याऽब्जाना रविः ॥२॥

आचारं समितीर्दधौ दशविध धर्मं तपः संयमम्
सिद्धान्तस्य गणाधिपस्य गुणिनः शिष्यो हि मान्योऽभवत् ।
सैद्धान्तो गुणभद्रनाममुनिपो मिथ्यात्व-कामान्तकृत्
स्याद्वादामलरत्नभूषणधरो मिथ्यानयध्वंसकः ॥३॥

तस्येयं निरलकारा ग्रन्थाकृतिरसुन्दरा ।
अलंकारवता दृष्ट्या सालंकाराकृता न हि ॥४॥

शास्त्रमिदं कृत राज्ये राज्ञो श्रीपरमार्दिनः ।
पुरे विलासपूर्वे च जिनालयैर्विराजिते ॥५॥

यः पाठयति पठत्येव पठन्तमनुमोदयेत् ।
स स्वर्गं लभते भव्यः सर्वात्तसुखदायकं ॥६॥

लम्बकंचुकगोत्रोऽभूच्छुभचन्द्रो महामनाः ।
साधुः सुशीलवान् शान्तः श्रावको धर्मवत्सलः ॥७॥

तस्य पुत्रो बभूवाऽत्र बल्हणो दानवान्वशी ।
परोपकारचेतस्को न्यायेनार्जित-सद्धनः ॥८॥

धर्मानुरागिणा तेन धर्मकथा-निबन्धनं ।
चरितं कारितं पुण्यं शिवायेति शिवार्थिनः ॥९॥

इति धन्यकुमारचरित्र पूर्णं जातं ॥

[देहली-पचायती-मन्दिर प्रति

८३. सिद्धिविनिश्चय-टीका (आचार्य अनन्तवीर्य)

आदिभाग :—

अकलङ्क जिनं भक्त्या गुरुं देवीं सरस्वतीं ।
नत्वा टीका प्रवक्ष्यामि शुद्धा सिद्धिविनिश्चये ॥१॥
अकलंक वचःकाले कलौ न कलयाऽपि यत् ।
नृषु लभ्य क्वचिल्लब्ध्वा तत्रैवाऽस्तु मतिर्मम ॥२॥
देवस्याऽनन्तवीर्योऽपि पट व्यक्तु तु सर्वतः ।
न जानीतेऽकलंकस्य चित्रमेतत्पर भुवि ॥३॥
अकलंकवचोऽम्भोधेः सूक्तरत्नानि यद्यपि ।
गृह्यन्ते बहुभिः स्वैरं सद्रत्नाकर एव सः ॥४॥
सर्वधर्म[स्य] नैरात्म्यं कथयन्नपि सर्वथा ।
धर्मकीर्तिः पदं गच्छेदाकलङ्क कथं ननु ॥५॥

शास्त्रस्यादौ तदविघ्नप्रसिद्धिप्रथनादिकं
फलमभिसमीक्ष्य सर्वज्ञमित्यादिमगलमाह । तस्यायमर्थः ।

(इसके बाद "सर्वज्ञ सर्वतत्त्वार्थ-स्याद्वादन्यायदेशिन । श्रीवर्द्धमानमभ्यर्च्य वक्ष्ये सिद्धिविनिश्चयम्" मूलके इस मगलपद्यका अर्थ तथा व्याख्यान है और फिर प्रथम प्रस्तावके अन्यपद्योंकी टीका है) ।

इति श्रीरविभद्रपादोपजीव्यनन्तवीर्य-विरचिताया सिद्धिविनिश्चय-टीकाया प्रत्यक्षसिद्धिः प्रथम' प्रस्तावः ॥१॥

अन्तभाग :—

"यथेन्द्र इत्यादि निदर्शनमत्रैवेत्थ भूतस्येत्यादिना शास्त्रार्थमुपसहरन्नाह—तदेवमित्यादि शास्त्रान्ते मगलमाह—जीयादित्यादि ॥

इति सिद्धिविनिश्चयटीकायामनन्तवीर्यविरचिताया निक्षेपसिद्धिर्द्वादशमः प्रस्तावः समाप्तः ॥

(इसके आगे ग्रन्थदान-प्रशस्ति है । टीकाकारकी कोई प्रशस्ति नहीं) ।

[कच्छदेशस्थ कोडायग्रामकी प्रति परसे
पुरातत्वमन्दिर अहदाबादमें कराई गई प्रति

८४. प्रायश्चित्तसमुच्चय-सचूलिक-वृत्ति (श्रीनन्दिगुरु)

आदिभाग :—

शुद्धात्मरूपमापन्न प्रणिपत्य गुरोर्गुरुं ।
निबन्धनं विधास्येऽहं प्रायश्चित्तसमुच्चये ॥१॥
× × × ×
प्रणम्य परमात्मान केवलं केवलेक्षणं ।
मयाऽभिधास्यते किंचिच्चूलिकाविनिबन्धनम् ॥२॥

अन्तभाग :—

यः श्रीगुरूपदेशेन प्रायश्चित्तस्य संग्रह ।
दासेन श्रीगुरोर्द्दब्धो भव्याशय-विशुद्धये ॥१॥
तस्यैषानूदितावृत्तिः श्रीनदिगुरुणा हि सा ।
विरुद्ध यदभूदत्र तत्क्षाम्यतु सरस्वती ॥२॥
प्रवरगुरुगिरीन्द्र-प्रोद्गता वृत्तिरेषा सकलमलकलंकक्षालनी सज्जनाना ।
सुरसरिदिव शश्वत्सेव्यमाना द्विजेन्द्रैः प्रभवतु जननूना यावदाचन्द्रतारं ॥३॥
समाप्तोऽयंग्रन्थः । (वृत्तिसंख्या प्रायः २००० श्लोकपरिमाण है)

८५. योगसंग्रहसार (श्रीनन्दिगुरु)

आदिभाग :—

भद्रं भूरिभवाम्भोधि-शोषिणे दोषमोषिणे ।
जिनेशशासनायाऽलं कुशासनविशासिने ॥१॥
संयमोद्दाममारामश्रीगुरोः पादपंकजम् ।
वदे देवेन्द्र-वृन्दोद्यन्मौलिमालाकरार्चितम् ॥२॥
योगीन्द्रो रुन्द्रयोगाग्नि-दग्धकर्मेन्धनोऽङ्गिनाम् ।
विश्वज्ञो विश्वदृश्वाऽस्तु मंगलं मगलार्थिनाम् ॥३॥

सद्वाग्वृत्त पदन्यास-वर्णालंकारहारिणी।
सन्मार्गाङ्गि सदैवाऽस्तु प्रसन्ना नः सरस्वती ॥४॥
यस्माद्ध्यान बुधैरिष्ट साक्षान्मोक्षस्य साधनम्।
अतो मोक्षार्थिभव्येभ्यस्तदेवाऽस्माभिरुच्यते ॥५॥

अन्तभाग :—

विपुल-वाङ्मय-वारिधि-तत्वसन्मणि-मयूख-लवाशकलाकृतः।
स्मरणमात्रमिदं गदितं मया किमिह दृष्टमहो न महात्मभिः ॥१७६॥
नानोपदेशकोशोऽयं सरस्वत्या मदर्पितः।
भव्यैराधीयमानोऽपि सर्वदास्त्वक्षयस्थितिः ॥१७७॥
श्रीनन्दनन्दिवत्सः श्रीनन्दीगुरुपदाब्जषट्चरणः।
श्रीगुरुदासो नन्द्यान्मुग्धमतिश्रीसरस्वतीसूनुः ॥१७८॥
इति श्रीनन्दिगुरुकृतः योगसंग्रहसारः समाप्तः।

८६. भावशतक (कवि नागराज)

आदिभाग :—

शुभ्रं क्वचित्क्वचिदतीवसितेतराभ क्वापि प्रफुल्लनवपल्लवसन्निकाशं।
तत्त क्वचित्क्वचन शीतलमस्तु वस्तु कैवल्यसंसृतिपथानुगत मुदे वः ॥१॥
नागराजशतग्रंथं नागराजेन तन्वता।
अकारि गतवक(क्त्र)श्रीर्नागराजो गिरागुरुः ॥२॥
वसंतकाले चकिता नतांगी विज्ञाय चक्रीकृतचापदंडं।
मनोभवं सौरभशोभमानैरपूरयत् पाणियुगं प्रसूनैः ॥३॥

अन्तभाग :—

आसीत्कार्पटिगोत्रसागर-सुधाधामो मुनिः श्रीधनः
श्रीविद्याधरइत्यशेषभुवन-प्रख्यातनामामृतः।

सर्वविद्-हिमवदुक्त-सरो-द्वार-विनिर्गता ।
वाग्गगा हि भवत्वेषा मे मनोमलहारिणी ॥२॥
गुरूणा पादपद्मं च मुक्तिलक्ष्मीनिकेतनं ।
मे हृत्सरसि सानद क्रीडतामन्तरायहृत् ॥३॥
पुन. श्रीगौतमादीना स्मृत्वा चरणपकजे ।
वक्ष्ये श्रीतत्वसारस्य वृत्ति संक्षेपतो मुदा ॥४॥

स्वस्ति। अथ श्रीनेमीश्वरमहातीर्थादियात्राविहारकर्म्म विधाय द्रथाद्यद्य (?) च श्रीय(प ?)थपुरमागत्य महामहोत्सवपूर्वक धर्मोपदेश कुर्वतः स सतो मे यथा भेदेतररत्नत्रयात्मकमोक्षमार्ग-भावना भावय तथैत्वदाक्ष (?) क्षमीकृतपरमार्थतरपलक्षणेन ठ० अ(स)तोषतनयेन सतिमयेन ठ० श्रीलपूनामधेयेनेदं वचः प्रोक्त-भो कृपावारिसागर चतुर्गतिसंसाराबुधियान भट्टारकश्रीकमलकीर्तिदेव चतुर्विधसघकृतसेव संसारशरीरभोगनिर्म्ममो मदीयो सामोऽय तत्त्वाऽतत्त्व-हेयोपादेय-परिज्ञानलालसः ठ० श्रीअमरसिंहो वरीवर्तितस्तत्त्वोपदेशेन बोध्यते चेत्तदा चरमिताकर्ण्याकुलीभूतमानसे[न]मुहविमृश्याल्पमतिनाऽपि मया चिंतितमिति। सर्व्वविद्योक्ततत्त्वोपदेशे पुण्य भविष्यति। पुण्येन तत्तत्त्वोसारोपदेशाख्य शास्त्र सम्पूर्णं भविष्यतीति मत्वा तत्त्वसारविस्तराऽवतार भावनाग्रथ कर्त्तुं समुद्यतोऽहमभव ॥छ॥ अथासन्नीकृतोपारससारतीरेण अन्तर्भावित-सकलविमलकेवलज्ञानमूर्ति-सर्व्वविन्महावीरेण समाविष्कृतसमयसार-चारित्रसार-पचास्तिकायसार-सिद्धान्तसारादिसारेण समूरीकृतवाह्याभ्यतरदुर्द्धरद्वादशविधतपोभारेण समभ्यसितसम्यक्त्वाद्यष्टगुणालकृतपरमात्मस्वभावेन तिरस्कृतासंसारायाताज्ञानोद्भव-लोकमात्रसंकल्पविकल्पात्मकविभावेन भस्मीकृतद्रव्यकर्म-भावकर्म-नोकर्ममलकलकाना सिद्धानां द्रव्यभावरूप स्तुतिं कर्त्तुकामेण भेदोऽभेदरत्नत्रयानुभवोद्भवसम्यग्ज्ञानमहाधामेन आसंसारप्रधावित-मोहमहाराजशीघ्रगामित मसंग्निलित(?),पद्मायमानादिमिथ्यादर्शनाज्ञानाविरतिभावादिविषयकषायठकपेटकदुर्ज्जयनिर्ज्ञायसर्वविद्वीतरागोपदिष्टागमाध्यात्मसिद्धातशास्त्राऽवतारितोपयोगेन समीप्सितसाक्षाद्रूपे-

यसंसिद्धिशिष्टाचार-प्रपालन-नास्तिक[ता]परिहार-निर्विघ्नपरिसमत्ती(माप्ती) ति फलचतुष्टयेन स्वगततत्त्वपरगततत्त्वभेदभिन्नं तत्त्वसाराख्यं ग्रन्थमहं प्रवक्ष्यामीति कृतप्रतिज्ञेन परमाराध्यपरमपूज्यभट्टारकश्रीदेवसेनदेवेन सूत्रमिदं सवर्ण्यंते ॥

इति श्रीतत्त्वसारविस्तरावतारेऽत्यासन्न-भव्यजनानंदकरे भट्टारकश्रीकमलकीर्तिदेव-विरचिते कायस्थमाथुरान्वयशिरोमणीभूतभव्यवरपुण्डरीकाऽमरसिहमानसारविन्द-दिनकरे स्वगतपरगततत्त्वलक्षणवर्णन नाम प्रथम पर्वं।

अन्तभाग :—

ग्रन्थेऽस्मिन् भावनारूपे पुनरुक्तस्य दूषण ।
भ(भा)वविद्भिर्नतद्ग्राह्यं ज्ञानवैराग्य-भूषण ॥१॥
इति तत्त्वं स्वपरगतं प्रोक्तं सत्क्षेपमात्रतोऽपि मया
सम्यग्यदि विस्तरतो ब्रूते जिनसन्मतिः सत्यं ॥२॥
इति कतिपयवर्णैर्वर्णिताऽध्यात्मसारा परमसुखसहाया तत्त्वसारस्य टी[का]।
अवगतपरमार्था शोध्य चैना पठंतु सुरमृगपतिकंठे हारभूता सुरम्या ॥३॥
यावन्मेरु-मही-स्वर्ग-कुलाद्रि-गगणाऽपगा• ।
तत्त्वसारस्य टीकेय तावन्नद[तु]भूतले ॥४॥

इति तत्त्वसारविस्तारावतारेऽत्यासन्नभव्यजनानंदकरे भट्टारकश्रीकमलकीर्तिदेव-विरचिते कायस्थ-माथुरान्वय-शिरोमणीभूत-भव्यवरपुडरीकाऽमरसिह-मानसारविन्द-दिनकरे सिद्धस्वरूपवर्णन षष्ठ पर्वं ॥६॥

सिद्धाः सिद्ध(द्धि)प्रदास्ते स्युः प्रसिद्धाष्टगुणैर्युताः ।
भोऽमर्त्यसिंह भो(?)शुद्धाः प्रसिद्धा जगता त्रयैः(ये) ॥६॥ आशीर्वादः

श्रीमन्माथुरगच्छपुष्करगणे श्रीकाष्ठसंघे मुनिः
सभूतो यतिसंघनायकमणिः श्रीक्षेमकीर्तिर्महान् ।
तत्पट्टाम्बरचंद्रमा गुणगणी श्रीहेमकीर्तिर्गुरुः
श्रीमत्संयमकीर्तिपूरितदिशापूरो गरीयानभूत् ॥१॥

अभवदमलकीर्तिस्तत्पदांभोजभानुर्मुनिगणनुतकीर्तिर्विश्वविख्यातकीर्तिः।
शम-यम-दम-मूर्तिः खंडितारातिकीर्तिर्जगति कमलकीर्तिः प्रार्थितज्ञानमूर्तिः॥२॥

[देहली-पंचायती-मंदिर प्रति

नोट—यह ग्रन्थ प्रति बहुत कुछ अशुद्ध है। और इस प्रतिके शुरू तथा अन्त आदिमें कितने ही पत्र बादको प्रतिलिपि करके जोड़े गये हैं।

८८. यशोधर-महाकाव्य-पंजिका (पं० श्रीदेव)

आदिभाग :—

यशोधर-महाकाव्ये सोमदेवैर्विनिर्मिते।
श्रीदेवेनोच्यते पंजी नत्वा देवं जिनेश्वर ॥१॥
छंद-शब्द-निघंटवलंकृति-कला-सिद्धांत-सामुद्रक-
ज्योतिर्वैद्यक-वेद-वाद-भरताऽनग-द्विपाऽश्वायुध-।
तर्काख्यानक-मंत्र-नीति-शुकुन-द्मारुह-पुराण-स्मृति-
श्रेयोऽध्यात्मजगत्स्थितिप्रवचनी-व्युत्पत्तिरत्रोच्यते ॥२॥
अर्ह वा काव्यकर्ता वा द्वावेवेश्वराविह।
विधु-ब्रध्नातिरेकेण को नामान्यस्तमोपहः ॥३॥
किंच कवेरपि विदग्धोऽहमेतत्सूक्तिसमर्थने।
यत्सौभाग्यविधौ स्त्रीणा पतिश्च पिता प्रभुः ॥४॥
प्रयोगास्तमयाच्छन्देष्वप्रसिद्धिमयं तमः।
तत्प्रयोगोदयार्को हि निरस्यत्यसमंजस ॥५॥
रुष्यत्याकर्षकायाऽन्धः स्वदोषेण यथा स्खलन्।
स्वयमशस्तथा लोकः प्रयोक्तारं विनिंदति ॥६॥
नाऽप्रयुक्तं प्रयुंजीतेत्येतन्मार्गानुसारिभिः।
निघंटु-शब्दशास्त्रेभ्यो नूनं दत्तो जलांजलिः ॥७॥
जहे-पेलवयोन्याद्यान् शब्दास्तेऽत्र प्रयुंजता।
नाऽप्रयुक्तं प्रयुंजीतेत्येष येषा नयो हृदि ॥८॥

नाऽप्रयुक्तं प्रयोक्तव्य प्रयुक्तं वाऽप्रयुज्यते ।
इत्येकांतस्ततो नास्ति वागर्थौचित्यवेदिना ॥९॥
साग्रा दशशतीवाचामपूर्व्वा समभूदिह ।
कवेर्वागर्थसर्वज्ञाद्वर्णकत्रिशती तथा ॥१०॥

सुमुखः समाहितमतिरुदङ्मुखः प्राङ्मुखो वा कविः सकलैहिकामुत्रिक-व्यवहारव्युत्पत्तिकारण काव्यमिद चिकीर्षुः पुण्यावाप्ति-प्रत्यूह-व्यूह-व(व्यु)दासो नास्तिकतापरिहारः शिष्टाचारप्रतिपालन परंपरया परकृतोपकाराद्य विस्मरणं वेति पंचविध फलं । आशीर्न्नमस्क्रियावस्तुनिर्द्देशो वाऽपि तन्मुखमिति वा मनसि निधाय श्रियमित्यादिकान् श्लोकानाह ॥छ॥ कुवलयमुत्पलं भूमंडलं च । संदर्शनमवलोकनं सम्यग्दर्शनं च । कंतुः कामः। निकेतन गृहं ।

इति श्रीसोम(श्री)देवसूरि-विरचिताया यशोधर-पंजिकाया प्रथम आश्वासः ॥१॥ [देहली-पचायती-मन्दिर प्रति

नोट १—इस ग्रन्थ-प्रतिकी सब संधियोंमें श्रीदेव की जगह मूलग्रन्थकार सोमदेवका ही नाम दे दिया है, जो लिपिकारकृत-अशुद्धिका परिणाम जान पडता है।

नोट २—इस ग्रन्थप्रतिके अन्तमें पंजिकाके कर्ताकी कोई प्रशस्ति नहीं है। यह प्रति संवत् १५३९ फाल्गुण सुदि ८ रविवारके दिन लिखाकर मूलसंघी मुनि रत्नकीर्तिके उपदेशसे एक खंडेलवाल कुटुम्बकी ओरसे ब्रह्म होला को दान की गई है।

८९. पुरुषार्थानुशासन (पं० गोविन्द)

आदिभाग :—

श्रियं कुर्यात्स वः कश्चिद्देवो देवेन्द्रवन्दितः ।
दृग्ज्ञानसुखवीर्याणि यस्याऽनतान्यनन्तवत् ॥१॥
स्वभूर्विष्णुः-शिवो भास्वान् शीतगुः सुगतो गुरुः ।

धर्मांगजश्च देवेन्द्रो जिनेन्द्रः स्वस्तिदोऽस्तु नः ॥२॥
शक्तिसिक्तिस्याऽनन्तगुणाय परमात्मने ।
अरूपात्मनः सता शरूपा गुणाना व्यक्तये नमः ॥३॥
ता नमामि गिरं ब्राह्मीं गुरूंश्च दत्तेऽङ्घ्रिनां ।
देयाद्येयोपदेशेन सेविता ये हित पदं ॥४॥

अथ मा श्रीपथाख्यपुरीनाधिपुरीमिव ।
स्वां थित मरर्वसौतेऽस्मिनाथि:स्तुमिना स्थितं ॥५॥
श्रीमतो नरसिंहस्याऽमरसिंहस्य मनय ।
ननगं जिनगोपेत इतिश्रीलक्ष्मणोऽभणत् ॥६॥ (इय)

हे लोकत्रयगुरुगर्व यशःश्रेयश्च धीमना ।
स्वर्गेनीय भवेता भोः काव्येनैवाऽत ते भृश ॥७॥
काव्य चिधीयता किञ्चिद्गुरुपार्थोपदेशितं ।
स्वार्थकृत्ये न धीमतो भवनि यदनुद्यताः ॥८॥

श्रुत्वा तस्येति सुश्लिष्टरचनं वचन मया ।
इति सोऽभाणि भो युक्त त्वयोक्तं किन्चित' शृणु ॥९॥
योगक्षेमी सुराजाद्वा जायेते ते सुकाव्यतः ।
कुराजादिव तावेव नश्यतस्तु कुकाव्यतः ॥१०॥

कारं निगदुराचार्या भाव वा कर्म वा कवेः ।
तत्रशाऽशेषदोषं स्यात्सुकाव्यं परथा परं ॥११॥
अशक्ताद्वा प्रमादाद्वा शब्दादौ स्खलनं कवेः ।
दोषः स्यात्ते तु शब्दाद्याः प्रभूताः काव्यहेतवः ॥१२॥

तत्त्वा स्ते जानंते केचिदप्रमत्ता. सुमेधसः ।
विश्ववाङ्मयवाराशेः पारेयैरुच्यतैर्गतं ॥१३॥
तादृशा मादृशा येषा नाभूद्योगोपि तेपि चेत् ।
सुकाव्यायोद्यम कुर्यं धृष्टत्वं विमतः पर ॥१४॥

किञ्च— भगवन्समन्तभद्रः श्रीमद्भट्टाकलङ्क इत्याद्याः ।
चक्रुस्तर्कग्रन्थान्कुतर्कविक्षेपदक्षास्तान् ॥१५॥
श्रीपूज्यपादभगवत्प्रमुखाः विमुखा कुमार्गतो कुर्वन् ।
व्याकरणानि नृणा वाङ्मल[ग्न?]व्याकरणनिपुणानि ॥१६॥
जिनसेनो गुणभद्रो रविषेणश्चैवमादिकविराजाः ।
महता निहताहासि व्यधुः पुराणानि पुरुषाणा ॥१७॥
श्रीभट्ट-वट्टकेरादयो दुरंताघपाशशस्त्राणि ।
सुमधुरगिरो ऽव्यरचयननगाराचारशास्त्राणि ॥१८॥
श्रीशिवकोटिमुनीश्वरपुरोगमाः स्ववगतागमा नृणा ।
ज्ञानतपश्चारित्रं सदर्शनं दर्शयामासुः ॥१६॥
श्रीकुन्दकुन्दसूरिः श्रीमदुमास्वातिदेव इत्याद्याः ।
साधु व्यदधुस्तत्त्वग्रन्थानुद्दिष्टपरमार्थान् ॥२०॥
श्रीसोमदेवपूर्वा अकुर्वताऽपूर्वशब्दसर्वस्वाः ।
निरवद्यगद्यपद्यश्चम्पूःकृतबुधशिरःकम्पाः ॥२१॥
श्रीवीरनन्दिदेवो धनञ्जयश्चाऽसगो हरिश्चन्द्रः ।
व्यधुरित्याद्याः कवयः काव्यानि सदुक्तियुक्तीनि ॥२२॥
श्रीजयसेनाचार्योऽमितगतियतिरेवमादयः सदयाः ।
ग्रन्थीकृत्य सदर्थानगारिणामूचुराचारान् ॥२३॥
इत्याद्यागमभेदान्विहितमनोवाग्वपुःमलछेदान् ।
सर्वानपि जितदुर्णयचक्राः कविचक्रिणश्चक्रुः ॥२४॥
इत्यादिपौरस्त्यमहाकवीना रुग्भी रवीनामिव यत्र वाग्भिः ।
प्रकाश्यते विश्वपदार्थजातं न तत्र भात्यन्यवचः प्रदीपः ॥२५॥
अन्यच्च—भूवाच्यते कलौ जाताः प्रभूताः सांप्रतं खलाः ।
कुर्व्वंतोऽपकृतीरेव नृणामाराधिताश्च ये ॥२६॥
वंद्यानामपि निन्दन्ति ये गिराविमला. खलाः ।
मादृशा क्रियते गोघ्नाः कृपा कुर्य्यरजासु किं ॥२७॥

तथा च—

छित्रा एवात्र ते सन्तो मर्यायो वा सुजातयः।
नयंति सुषमाभास्य सुवर्णमपि ये स्वय ॥२८॥
तावन्त एव ते मन्येऽणवः स्पष्टाः ससर्ज यैः।
सन्तोऽसतोऽन्यथा मृज्यान्न स नास्ति विधिर्विधीः ॥२९॥

तत्किं काव्यावधानेन यशः श्रेयोऽर्थिभिर्नृभिः।
कार्यः सदा सदाचारो लभ्येते लघु ते यत. ॥३०॥
सुमनोगतमाख्याय मयीत्युपरते सति।
सस्मितं स ततोऽवोचल्लक्ष्मणः सुविचक्षणः ॥३१॥

नृभिर्विपश्चिता वाच्या न पुरः प्रचुरा गिरः।
कथ्यतेऽदस्ततस्तथ्यं सक्षेपेण मया वचः ॥३२॥
भवन्मानसज काव्यवारिजं निजकर्णयोः।
वतसीकर्तुमिच्छामि विधेयस्तदनुग्रहः ॥३३॥

साहाय्यं स्वामिभक्ताना शारदा वो विधास्यति।
काव्यसिद्धौ सता सैव मातेव हितकारिणी ॥३४॥
तस्येत्यावश्यकं वाक्यं निशम्याऽह स्वमानसे।
वाग्देवीं प्रणमंस्तस्याः प्रसादायेत्यचिंतयं ॥३५॥

वाढमर्हति मे भक्तिर्वाग्देवी तन्मुखोद्भवा।
काव्यं मे कुर्वतः किन्न सा सहायी भविष्यति ॥३६॥
कुर्वे मंदोऽपि तत्काव्यमह शोचामि किं बहुः।
सहाय सबल प्राप्य किं न हीनोपि वल्गति ॥३७॥

काव्यसस्कारकर्तारः सति वा गुरवो मम।
ज्ञाततद्धेतवः सतश्चिन्तया मम किं तया ॥३८॥
निश्चित्येति क्षण पश्चादिति चिंतामुपागमं।
विचित्रा रुचयः पुसामनुशास्मि तदत्र किं ॥३९॥

इच्छन्त्याक्षेपिणीं श्रोतुं केचिद्विक्षेपिणीं परे ।
संवेगिनीं कथां केचित्परे निर्वेदिनीं जनाः ॥४०॥
केचिद्धर्मार्थिनः केचिदर्थकामार्थिनोऽङ्गिनः ।
मुमुक्षवोऽन्ये तत्सर्वान्के रंजयितुमीशते ॥४१॥
प्रायः सर्वप्रियं यद्वा पुरुषार्थानुशासनं ।
कुर्वेऽह तत्तथा स्वस्मिन् जिते रंजित जगत् ॥४२॥
इति स्वगतमालोच्य शास्त्रमन्वर्थसंज्ञकं ।
मया प्रसूयते नाम्ना पुरुषार्थानुशासनम् ॥४३॥
पुरुषार्थश्चतुर्वर्गं उपदेशोऽनुशासनं ।
चतुर्वर्गश्च धर्मोऽर्थ-काम-मोक्षः प्रकीर्तितः ॥४४॥
चतुर्वर्गोपि मानुष्यैः कैश्चिदद्भुतचेष्टितैः ।
प्राप्य कालादिसामग्रीं साध्यते कृतसत्क्रियैः ॥४५॥
विना मोक्षं चतुर्वर्गस्त्रिवर्गः सद्भिरुच्यते ।
स एव साध्यते कैश्चिदलब्ध्वाऽखिललब्धिभिः ॥४६॥
जन्मसाफल्यकृत्पुंसा स्यात्त्रिवर्गोपि साधितः ।
परस्पराविरोधेन सुखश्रेयस्करो यतः ॥४७॥
विरोधयेन्न वा धर्मं साधयन्शुद्धधीः परौ ।
परौ तु साधयन्धर्मं न हि जातु विरोधयेत् ॥४८॥
नृणां विरोधितावर्थकामौ किं किल कुर्वतः ।
धर्मस्तु हंति तावत्रामुत्र चेत्प्रद्विरोधित. ॥४६॥
धर्मादेव प्रसूयेते अर्थकामौ नृणामिह ।
सम्यक्त्वादिव सुज्ञानचरित्रे सुखसाधने ॥५०॥
एक एव क्षमो धर्मः सर्वकल्याण-योजने ।
एक एव न किं भानुरल सर्वार्थदर्शने ॥५१॥
उत्कल्लोपि वारांशिर्बाहुभ्या जातु तीर्यते ।
न सर्वं धर्ममाहात्म्यं वक्तुं केनापि पार्यते ॥५२॥

त्रिवर्गसाधने तस्माद्धर्ममुख्यतया नृभिः ।
यतितव्यं सदा जन्मसाफल्यं नेतुमात्मनः ॥५३॥
दुरापं प्राप्य मानुष्यं यैस्त्रिवर्गो न साधितः ।
केवलं नेह लोकस्तैः परलोकोऽपि बाधितः ॥५४॥
विना त्रिवर्गसंसिद्धया मानुषस्य पशोरपि ।
केवलं खुरशृंगादिकृतो भेदोऽभिवेदितः ॥५५॥
मानुष्येऽपि न यः स्वार्थसाधनायोद्यतोऽधमः ।
तं तिरश्चां गतिं कांचित्प्राप्तं को बोधयिष्यति ॥५६॥
स्वार्थसिद्धिर्भवेद्यत्र तिर्यक्त्वमपि तद्वरं ।
मानुष्यमपि तन्निंद्यं स्वार्थभ्रंशो भवेद्यतः ॥५७॥
यथाऽनर्थकमासत्वं विनाऽनन्तचतुष्टयं ।
पुरुषार्थं विना नृणां पुरुषत्वं तथा वृथा ॥५८॥
पुमर्थसाधनोपायमवबुध्य ततः सुधीः ।
साधयेत्तं तथा नृत्वं कृतार्थं जायते यथा ॥५९॥
इति कतिचिदुदीर्याऽनिंद्यपद्यानि लोक-
द्वितयगतसुखार्थी श्रोतृशुश्रूषुतायै ।
जिनपतिमतसूत्रात् कथ्यतेऽथाप्त्युपायः
कृतसकलसमृद्धेः सच्चतुर्वर्गसिद्धेः ॥६०॥

इति पंडितश्रीगोविन्द-विरचिते पुरुषार्थानुशासने कायस्थमाथुर-वंशाऽवतंस-श्रीलक्ष्मणनामांकिते कथामुखाऽभिधानोऽयं प्रथमोऽवसरः परः ॥१॥ अत्राशीर्वादः —

भोगींद्रो भोगिवर्गैः कथमपि विदितः प्रस्फुरद्भोगरत्नै-
श्चन्द्रोऽर्केनोडुवृन्दैरपि सुरनिकरैर्दृक्सहस्रेण चेन्द्रः ।
कीर्त्या यस्य त्रिलोक्यामिव सुरसरिताश्चेतितायां स्वसंगा-
च्छ्रीमान्सोऽमर्त्यसिंहश्चिरमुरुचरितो नन्दतान्नंदनाभ्यां ॥१०॥

(इसी तरह हर एक अगले अध्यायके शुरूमे भी आशीर्वादात्मक-पद्य दिये हैं जिनमें प्रायः 'लक्ष्मण'को आशीर्वाद देते हुए उसके गुणोंका भी कुछ वर्णन किया है ।)

अन्तभागः—

श्रीसद्महास' कुमुदाऽखिलाशस्तमोविनाशः सुपथप्रकाशः ।
यत्रोदितेऽत्र प्रभवन्ति लोके नमाम्यहं श्रीजिनभास्करं ते ॥१॥
दोषाऽप्रकाशः कमलाऽवकाशस्तापस्य नाशः प्रसरश्च भासः ।
यत्र प्रसन्नेऽत्र जने भवति श्रीमज्जिनेन्द्र' तमहं नमामि ॥२॥
कुर्वंतु धीकैरविणीसमृद्धि विवेकवार्द्धेश्च जनेऽत्र वृद्धि ।
श्रीमूलसंघाकर-चन्द्रपादा भट्टारकश्रीजिनचन्द्रपादाः ॥३॥

विमलसदमलकाष्ठसंघपट्टोदयाऽद्रावुदितउरुवचोंशुध्वस्तदोषाधकारः ।
बुधजनजलजानामुद्विलासं ददाना जयति मलयकीर्तिर्भानुसाम्य दधान'॥४॥

काष्ठासघेऽनवयतिभिर्यं कान्तो भात्याकाशे स्फुरदुडुभिर्वा चन्द्र' ।
सत्प्रज्ञाना भवति न केषा तुल्यः कीर्त्याऽचारः स कमलकीर्त्याचार्य' ॥५॥

परे च परमाचारा जिनसघमुनीश्वराः ।
प्रसन्नमेतत्कुर्वंतु मयि सर्वेपि मानस ॥६॥

कायस्थानामस्त्यथो माथुराणां वंशो लब्ध्वाऽमर्त्यसत्प्रशंसः ।
तत्रापि श्रीखेतलो बन्धुलोकैः खे तारौघैरुत्प्रकाशं शशीव ॥७॥

सुरगिरिरिव धीरो वारिधिर्वा गभीरो विधुरिव हततापः सूर्यवत्सुप्रतापः ।
नरपतिरिव मान्यः कर्णवद्वो वदान्यः समजनि रतिपालस्तत्सुतः साऽरिकालः॥८

दुःशासनाऽपायपरो नराग्रणीः सदोद्यतो धर्मसुतार्थसाधने ।
ततः सुतोऽभूत्स गदाधरोपि यो न भीमता क्वापि दधौ सुदर्शनः ॥९॥

स तस्मात्सत्पुत्रो जनितजनितासयदजनि
क्षितौ ख्यातः श्रीमानमरहरिरित्यस्तकुनयः ।

गुणा यस्मिंस्ते श्री-नय-विनय-तेजःप्रभृतयः
समस्ता ये व्यस्ता अपि न सुलभाः क्वाऽपि परतः ॥१०॥
महम्मदेशेन महामहीभुजा निजाधिकारिष्वखिलेष्वपीह यः।
सम्मान्य नीतोपि सुधीः प्रधानता न गर्वमप्यल्पमधत्त सत्तमः ॥११॥
सर्वैरहंपूर्विकया गुणैर्वृत निरीक्ष्य दोषा निखिला यमत्यजन्।
स्थाने हि तद्भूरिभिराश्रितेऽरिभिः स्थाने वसंतीह जना न केचन ॥१२॥
श्रुतशताये विनयेन धीमता तया नयस्तेन च येन सपदा।
तया च धर्मो गुणवन्नियुक्तया सुखकरं तेन समस्तमीहितं ॥१३॥
सत्योक्तित्वमजातशत्रुरखिलक्ष्मोद्धारसार नयं
रामः काममुदाररूपममलं शीलं च गगांगजः।
कर्णश्चारुवदान्यता चतुरता भोजश्च यस्मायिति
स्व स्वं पूर्वनृपा वितीर्य्य सुगुण लोकेऽत्र जग्मुः परं ॥१४॥
धन धनार्थिनो यस्मान्मानं मानार्थिनो जनाः।
प्राप्यासन् सुखिनः सर्वे तद्द्वयं तद्द्वयार्थिनः ॥१५॥
निशीनोः कौमुदस्येष्टो नाब्जानामन्यथा रवेः।
यस्योदयस्तु सर्वेषा सर्वदैवेह वल्लभ ॥१६॥
स्त्रीकुलीनाऽकुलीना श्रीः स्थिरा धीः कीर्तिरस्थिरा।
यत्र चित्रं विरोधिन्योऽप्यऽमूर्तेनुः सहस्थिर्ति ॥१७॥
तस्यानेकगुणस्य शस्यधिष्णस्याऽमर्त्यसिंहस्य स।
ख्यातः सूनुरभूत्प्रतापवसति श्रीलक्ष्मणाख्यः क्षितौ।
यो वीक्ष्येति वितर्क्यते सुकविभिर्नीत्वा तनु मानवीं
धर्मोऽयं नु नयोऽथवाऽथ विनयः प्राप्तः प्रजापुण्यतः ॥१८॥
यशो यैर्ल्लक्ष्मणस्यैणलक्ष्मणाऽत्रोपमीयते।
शंके न तत्र तैः साक्षाच्चिलाक्षैर्लक्ष्मलक्षितं ॥१९॥
श्रीमान्सुमित्रोन्नतिहेतुजन्मा सल्लक्षणः सन्नपि लक्ष्मणाख्यः।
रामातिरिक्तो न कदाचनासीदधाच्च यो रावणसोदरत्वं ॥२०॥

स नयविनयोपेतैर्वाक्यैर्मुहुः कविमानसं
सुकृतसुकृताऽपेक्षो दक्षो विधाय समुद्यतं ।
श्रवणयुगलस्यात्मीयस्यावतंसकृते कृती-
स्तु विशदमिदं शास्त्राभोजं सुबुद्धिरकारयत् ॥२१॥

अथास्त्यग्रोतकाना सा पृथ्वी पृथ्वीव संततिः ।
सच्छायाः सफलाः यस्या जायंते नरभूरुहाः ॥२२॥

गोत्रं गार्ग्यमलंचकार यं इह श्रीचन्द्रमाश्चन्द्रमो
बिम्बास्यस्तनयोऽस्य धीर इति तत्पुत्रश्च हींगाऽभिधः ।
दोहे लब्धनिजोद्भवेन सुधियः पद्मश्रियस्तत्स्त्रियो
नव्य काव्यमिदं व्यधायि कविनाऽर्हत्पादपद्मालिना ॥२३॥

पादादिवर्णसंज्ञेनेति शेषः ॥

शब्दार्थोभयदुष्टं यद्व्यधाय्यत्र मया पद ।
सद्भिस्ततस्तदुत्सार्य्यं निधेयं तत्र सुन्दरं ॥२४॥

जीयाच्छ्रीजिनशासनं सुमतयः स्युः क्ष्माभुजोर्हन्नता-
स्सर्वोप्यस्तु निरामयः सुखमयो लोकः सुभिक्ष्यादिभिः ।
संतः सन्तु चिरायुषोऽमलधियो विज्ञातकाव्यश्रमाः
शास्त्रं चेदममी पठन्तु सततं यावत्त्रिलोकीस्थितिः ॥२५॥

यदेतच्छास्त्रनिर्माणे मयात्यल्पधिया कृतं ।
क्षंतव्यमपरागैर्मे तदागः सर्वसाधुभिः ॥२६॥

इति प्रशस्तिः ॥ समाप्तं चेद पुरुषार्थानुशासननाम शास्त्रमिति ॥

[बम्बई ऐ० प० स० भ० प्रति

नोट—यह ग्रन्थप्रति अच्छी साफ और शुद्ध लिखी हुई है और किसी किसी स्थानपर टिप्पणको भी लिये हुए है ।

६०. नागकुमार-चरित (मल्लिषेण सूरि)

आदिभाग :—

श्रीनेमिं जिनमानम्य सर्वसत्त्वहितप्रदम् ।
वक्ष्ये नागकुमारस्य चरितं दुरितापहं ॥१॥
कविभिर्जयदेवाद्यैर्गद्यैर्पद्यैर्विनिर्मितम् ।
यत्तदेवास्ति चेदत्र विपम मन्दमेधसाम् ॥२॥
प्रसिद्धैः संस्कृतैर्वाक्यैर्विद्वज्जन-मनोहरम् ।
तन्मया पद्यबन्धेन मल्लिषेणेन रच्यते ॥३॥

अन्तभाग :—

श्रुत्वा नागकुमार-चारुचरितं श्रीगौतमेनोदित ।
भव्याना सुखदायकं भवहर पुण्यास्रवोत्पादकं ।
नत्वा तं मगधाधिपो गणधरं भक्त्या पुर प्रागम-
च्छ्रीमद्राजगृह पुरंदरपुराकार विभूत्या सम ॥६१॥

इत्युभयभाषाकविचक्रवर्ति-श्रीमल्लिषेणसूरि-विरचिताया श्रीनागकुमार-पचमीकथाया नागकुमार-मुनीश्वर-निर्वाणगमनो नाम पंचमः सर्गः ।

* जितकषायरिपुर्गुणवारिधिर्नियतचारुचरित्रतपोनिधिः ।
जयतु भूपतिरीटविघट्टितक्रमयुगोऽजितसेनमुनीश्वरः ॥१॥
अजनि तस्य मुनेर्वरदीक्षितो विगतमानमदो दुरितातकः ।
कनकसेनमुनिर्मुनिपुंगवो वरचरित्रमहाव्रतपालकः ॥२॥
गतमदोऽजनि तस्य महामुनेः प्रथितवान् जिनसेनमुनीश्वरः ।
सकलशिष्यवरो हतमन्मथो भवमहोदधितारतर[ण्ड]कः ॥३॥
तस्याऽनुजश्चारुचरित्रवृत्तिः प्रख्यातकीर्तिर्भुवि पुण्यमूर्तिः ।
नरेन्द्रसेनो जितवादिसेनो विज्ञाततत्त्वो जितकामसूत्रः ॥४॥
तच्छिष्यो विबुधाग्रणीर्गुणनिधिः श्रीमल्लिषेणाह्वय
संजातः सकलागमेषु निपुणो वाग्देवतालंकृतः ।

तेनैषा कविचक्रिणा विरचिता श्रीपंचमीसत्कथा
भव्याना दुरितौघनाशनकरी संसारविच्छेदिनी ॥५॥
स्पष्ट श्रीकविचक्रवर्त्तिगणिना भव्याब्जधर्मांशुना
ग्रंथी पचशती मया विरचिता विद्वज्जनाना प्रिया।
ता भक्त्या विलिखति चारुवचनैर्व्याषर्णयंत्यादरा
ये शृण्वंति मुदा सदा सहृदयास्ते याति मुक्तिश्रिय ॥६॥*

इति नागकुमारचरित्र समाप्तम्।

६१. ज्वालिनीकल्प (इन्द्रनन्दियोगीन्द्र)

आदिभाग :—

चन्द्रप्रभजिननाथं चन्द्रप्रभमिन्द्रनंदिमहिमानम्।
ज्वालामालिन्यर्चित-चरणसरोजद्वयं वंदे ॥१॥
कुमुददलधवलगात्रा महिषमहावाहनोज्ज्वलाभरणा।
मा पातु वन्हिदेवी ज्वालामालाकरालांगी ॥२॥
जयताद्देवी ज्वालामालिन्युद्यत्त्रिशूल-पाश-झष-
कोदण्ड-काण्ड-फल-वरद-चक्रचिन्होज्वलाऽष्टभुजा ॥३॥
अर्हत्सिद्धाचार्योपाध्यायान् सकलसाधुमुनिमुख्यान्।
प्रणिपत्य मुहुर्मुहुरपि वक्ष्येऽहं ज्वालिनीकल्पं ॥४॥
दक्षिणदेशे मलये हेमग्रामे मुनिर्महात्मासीत्।
हेलाचार्यो नाम्ना द्रविडगणाधीश्वरो धीमान् ॥५॥
तच्छिष्या कमलश्रीः श्रुतदेवी वा समस्तशास्त्रज्ञा।
सा ब्रह्मराक्षसेन गृहिता रौद्रेण कर्मवशात् ॥६॥

— इन चिन्होंके अन्तर्गत यह षट्पद्यात्मक अन्तका भाग 'आरा-जैनसिद्धान्तभवन'की ताडपत्रीय दो प्रतियों परसे लिया गया है, अन्य कितनी ही प्रतियोंमें यह नहीं पाया जाता—छूटा हुआ है।

रोदिति हाहाकारैः स्फुटाऽट्टहासं करोति सन्ध्याया ।
जपति पठत्यथ वेदान् हसति पुनः कहकह-ध्वनिना ॥७॥
कोऽसावास्ते मंत्री यो मोचयति स्वमंत्रशक्त्या मा ।
वक्तीति सावलेपं सविकारं जृम्भणं कुरुते ॥८॥
दृष्ट्वा तामतिदुष्टग्रहेण परिपीडिता मुनीन्द्रोऽसौ ।
व्याकुलितोऽभूत्तत्प्रतिविधानकर्तव्यतामूढः ॥६॥
तद्ग्रहविमोक्षणार्थं तद्ग्रामसमीपनीलगिरिशिखरे ।
विधिनैव वन्हिदेवीं स साधयामास मुनिमुख्यः ॥१०॥
दिनसप्तकेन देव्या प्रत्यक्षीभूतया पुरः स्थितया ।
मुनिरुक्तः किं कार्यं तवार्यं वद मुनिरुवाचेत्थम् ॥११॥
कामार्थाद्यैहिक-फलसिद्ध्यर्थं देवि नोपरुद्धासि ।
किन्तु मया कमलश्री-ग्रह-मोक्षायोपरुद्धासि ॥१२॥
तस्माद् ग्रहमोक्षं कुरु देव्येतावदेव मम कार्यं ।
तद्वचनं श्रुत्वा सा बभाण तदिदं कियन्मात्रम् ॥१३॥
मा मनसि कृथाः खेदं मंत्रेणानेन मोचयेत्युक्त्या ।
मृदुतरमायसपत्र विलिखितमंत्रं ददौ तस्मै ॥१४॥
तन्मंत्रविधिमजानन् पुनरपि मुनिपो बभाण ता देवीं ।
नास्मिन् वेद्मि किमप्यहमतो विवृत्यै तदभिधेहि ॥१५॥
तस्मै तया ततस्तद्व्याख्यातं सोपदेशमयतत्त्वं ।
पुनरपि तद्भक्ति-वशाददायि तत्सिद्धविद्येत्थम् ॥१६॥
साधनविधिना यस्मै त्व दास्यसि होमजपविहीनोऽपि ।
भविता स सिद्धविद्यो नो दास्यसि यस्य सोऽत्र पुनः ॥१७॥
उद्यानवने रम्ये जिनभवने निम्नगातटे पुलिने ।
गिरिशिखरेऽन्यस्मिन् वा स्थित्वा निर्जंतुके देशे ॥१८॥
हृदयोपहृदयमंत्र प्रजाप्य नियुत तथा युत हुत्वा ।
प्रकरोतु पूर्वसेवा प्रणिगद्यैव स्वधाम गता ॥१६॥

तत्र स्थित एव ततस्तमसौ दंदह्यमानमाध्याय ।
दहनाक्षरै रुदन्तं दुष्टं निर्द्धाटयामास ॥२०॥
निर्द्धाटितो ग्रहश्चेद् ध्यात्वैकं भूतदहनररररबीज ।
शेषदशनिग्रहाणां किमस्त्यसाध्यो ग्रहः कोऽपि ॥२१॥
देव्यादेशाच्छास्त्र तेन पुनर्ज्वालिनीमतं रचितम् ।
तच्छिष्यो गांगमुनिर्नीलग्रीवो बीजावाख्यः ॥२२॥
आर्या क्षांतिरसब्बा विरुवट्टः क्षुल्लकस्तथेत्यनया ।
गुरुपरिपाट्याविच्छिन्नसम्प्रदायेन चागच्छत् ॥२३॥॥
कन्दर्पेण ज्ञातं तेनापि स्वसुतनिर्विशेषाय ।
गुणनंदिश्रीमुनये व्याख्यातं सोपदेशं तत् ॥२४॥
पार्श्वे तयोर्द्वयोरपि तच्छास्त्रं ग्रंथतोऽर्थतश्चापि ।
मुनिनेन्द्रनन्दिनाम्ना सम्यग्गदितं विशेषेण ॥२५॥
क्लिष्टग्रंथं प्राक्तनशास्त्रं तदिति स(स्व)चेतसि निधाय ।
तेनेन्द्रनन्दिमुनिना ललितार्यावृत्तगीताद्यैः ॥२६॥
हेलाचार्योक्तार्थं ग्रंथपरावर्तनेन रचितमिदं ।
सकलजगदेकविस्मयजनन जनहितंकरं शृणुत ॥२७॥
मंत्रि-ग्रह-सन्मुद्रा-मण्डल-कटुतैल-वश्ययंत्र-सुतंत्रं ।
स्नपनविधिर्नीराजनविधिरथ साधनविधिश्चेति ॥२८॥
अधिकाराणामेषा दशभेदाना स्वरूपनिर्देश ।
वक्ष्येऽहं संक्षेपात् प्रकटं देव्या यथोद्दिष्टम् ॥२९॥
मौनी नियमितचित्तो मेधावी बीजधारणसमर्थः ।
मायामदनमदोनः सिद्धयति मंत्री न संदेहः ॥३०॥
सम्यग्दर्शनशुद्धो देव्यर्चनतत्परो व्रतसमेतः ।
मंत्रजपहोमनिरतोऽनालस्यो जायते मंत्री ॥३१॥
देवगुरुसमयभक्तः सविकल्पः सत्यवाग्विदग्धश्च ।
वाक्पटुरपगतशंकः शुचिरार्द्रमना भवेन्मंत्री ॥३२॥

देव्याः पदयुगभक्तो हेलाचार्यक्रमाब्जभक्तियुतः ।
स्वगुरूपदेशमार्गेण वर्तते यः स मन्त्री स्यात ॥३३॥
विद्यागुरुभक्तियुते तुष्टिं पुष्टिं ददाति खलु देवी ।
विद्यागुरुभक्तिवियुक्तचेतसे द्वेष्टि नितरा सा ॥३४॥
सम्यग्दर्शनदूरो वाक्कठश्छान्दसो भयसमेतः ।
शून्यहृदयः सलज्जः शास्त्रेऽस्मिन् नो भवेन्मन्त्री ॥३५॥

इति हेलाचार्यप्रणीतार्थे श्रीमदिन्द्रनन्दियोगीन्द्र-विरचित-ग्रंथसदर्भे ज्वालिनीमते मंत्रिलक्षणनिरूपणाधिकारः प्रथमः ॥

अन्तभाग :—

द्रविडगणसमयमुख्यो जिनपतिमार्गोचितक्रियापूर्णः ।
व्रतसमितिगुप्तिगुप्तो हेलाचार्यो मुनिर्जयति ॥१६॥
यावत् क्षितिजलधिशशाकाम्बरतारकाकुलाचलास्तावत् ।
हेलाचार्योक्तार्थः स्थेयाच्छ्रीज्वालिनीकल्पः ॥२०॥

इति हेलाचार्यप्रणीतार्थे श्रीमदिन्द्रनन्दियोगीन्द्रविरचितग्रथसन्दर्भे ज्वालिनीमते साधनविधिर्दशमः परिच्छेदः ॥

आसीदिन्द्रादिदेवस्तुतपदकमलश्रीन्द्रनंदिर्मुनीन्द्रो
नित्योत्सर्प्पचरित्रो जिनमतजलधिर्धौतपापोपलेपः ।
प्रज्ञानावामलोद्यत्प्रगुणगणभृतोत्कीर्णविस्तीर्णसिद्धा-
न्ताम्भोराशिस्त्रिलोक्याबुजवनविचरत्सद्यशोराजहंसः ॥१॥
यद्वृत्तं दुरितारिसैन्यहनने चण्डासिधारायितम्
चित्तं यस्य शरत्सरसलिलवत् स्वच्छ सदा शीतल ।
कीर्तिः शारदकौमुदी शशिभृतो ज्योत्स्नेव यस्याऽमला
स श्रीवासवनदिसन्मुनिपतिः शिष्यस्तदीयो भवेत् ॥२॥
शिष्यस्तस्य महात्मा चतुरनियोगेषु चतुरमतिविभवः ।
श्रीवप्पनदिगुरुरिति बुधमधुपनिषेवितपदाब्जः ॥३॥

लोके यस्य प्रसादादजनि मुनिजनस्तत्पुराणार्थवेदी
यस्याशास्तम्भमूर्धान्यतिविमलयशः श्रीवितानो निबद्धः।
कालास्तायेन पौराणिककविवृषभा द्योतितास्तत्पुराण-
व्याख्यानाद् बप्पनंदिप्रथितगुणगणस्तस्य किं वर्ण्यतेऽत्र ॥४॥
शिष्यस्तस्येन्द्रनंदिर्विमलगुणगणोद्दामधामाभिरामः
प्रज्ञा-तीक्ष्णास्त्रधारा-विदलितबहलाऽज्ञानवल्लीवितानः।
जैने सिद्धान्तवार्धौ विमलितहृदयस्तेन सद्ग्रंथतोय(ग्रंथतोऽय)
हेलाचार्योदितार्थो व्यरचि निरूपमो ज्वालिनीमंत्रवादः ॥५॥
अष्टशतस्यैकषष्ठि(८६१)प्रमाणशकवत्सरेष्वतीतेषु।
श्रीमान्यखेटकटके पर्वण्यक्ष[य]तृतीयायाम ॥६॥
शतदलसहितचतुःशतपरिमाणग्रंथरचनया युक्त।
श्रीकृष्णराजराज्ये समाप्तमेतन्मतं देव्याः ॥७॥

(नोट—अन्तका पद्य बम्बई सरस्वतीभवनकी प्रतिमें न होकर कारंजा-की प्रतिमें पाया जाता है।)

६२. स्वर्णाचलमाहात्म्य (दीक्षित देवदत्त)

आदिभाग :—

श्रीमोक्षसिद्धि-समवाप्ति-निदानमेक शैलान्वयाम्बुजवन-प्रतिबोध-भानुं।
ध्यानात्समस्तकलुषाब्धिकुंभजातं वंदे सुवर्णमयमुच्चसुवर्णशैलं ॥१॥

अन्तभाग :—

श्रीमच्छ्रीमूलसंघेऽस्मिन् बलात्कारगणे तथा।
कुन्दकुन्दाभिधाचार्यान्वये विश्वप्रदीपिते ॥४३॥
नन्द्याम्नाये बभूव श्रीभट्टारकपदस्थितः।
जगद्भूषणदेवोऽभूज्जगद्भूषणमर्थतः ॥४४॥
यस्य वागमला नूनं धर्मशास्त्र-प्रकाशिका।
गंगेव पठतां नूनं पुनाति मुखपंकजं ॥४५॥

सार्वः सतत-सन्निसधिनियतः पूर्वापरानुक्रमः
शब्दांभोजदिवाकरोऽस्तु सहसा नः श्रेयसे यं(?)च वै ॥१॥
नमः श्रीवर्द्धमानाय महते देवनन्दिने ।
प्रभाचन्द्राय गुरवे तस्मै चाऽभयनन्दिने ॥२॥

६५. प्राकृतशब्दानुशासन, स्वोपज्ञवृत्तिसहित (कवि त्रिविक्रम)

आदिभाग —

श्रीवीरं प्राच्याचल-समुदितमखिलप्रकाशक वन्दे ।
दिव्यध्वनिपटुदीधितिमहमत्तरपद्धतिप्राप्त्यै ॥१॥
श्रुतभर्तुरर्हनन्दि-त्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीवाणसकुलकमलद्युमणेरादित्यशर्मणः पौत्रः ॥२॥
श्रीमल्लिनाथ-पुत्रो लक्ष्मीगर्भामृताम्बुधिसुधांशुः ।
सोमस्य वृत्त-विद्या-धाम्नो भ्राता त्रिविक्रमस्तु कविः ॥३॥
श्रीवीरसेन-जिनसेनार्यादिवचः पयोधिपूरात्कतिचित् ।
प्राकृतपदरत्नानि प्राकृतकृति-सुकृति-भूषणाय चिनोति ॥४॥
अनल्पार्थ-सुखोच्चारशब्दसाहित्यजीवितम् ।
स च प्राकृतमेवेति मतं सूक्तानुवर्तिनाम् ॥५॥
प्राकृतं तत्समं देश्यं तद्भव चेत्यदस्त्रिधा ।
तत्समं सम्कृतसमं नेयं संस्कृतलक्षणात् ॥६॥
देश्यमार्षं च रूढत्वात्स्वतन्त्रत्वाच्च भूयसा ।
लक्ष्म नापेक्षते तस्य सम्प्रदायो हि बोधक ॥७॥
प्रकृतेस्संस्कृतात्साध्यमानात्सिद्धाच्च यद्भवेत् ।
प्राकृतस्याऽस्य लक्ष्यानुरोधिलक्ष्म प्रचक्ष्महे ॥८॥
प्राकृतपदार्थसार्थप्राप्त्यै निजसूत्रमार्गमनुजिगमिषताम् ।
वृत्तिर्यथार्थसिद्धयै त्रिविक्रमेणागमक्रमेण क्रियते ॥९॥

तत्सम-तद्भव-देश्य-प्राकृतरूपाणि पश्यता विदुषा ।
दर्पणमिति येयमवनौ वृत्तिस्त्रैविक्रमी जयति ॥१०॥
प्राकृतरूपाणि यथा प्राच्यैराहेमचन्द्रमाचार्यैः ।
विवृतानि तथा तानि प्रतिबिम्बन्तीह सर्वाणि ॥११॥
सिद्धिर्लोकाच्च ॥१॥ (प्रथमसूत्र)

इति श्रीमदर्हनन्दित्रैविद्यदेवश्रुतधर-श्रीपादप्रसादासादितसमस्तविद्याप्रभाव-श्रीमत्त्रिविक्रमदेवविरचितप्राकृतव्याकरणवृत्तौ प्रथमाध्यायस्य प्रथमः पादः ।

[नोट—इस ग्रन्थमें चार अध्याय हैं और प्रत्येक अध्यायमें पाणिनीय व्याकरणकी तरह चार पाद हैं। यह ग्रन्थ साङ्ग सिद्धशब्दानुशासनके कर्ता हेमचन्द्राचार्यसे बादका और कालिदासके शाकुन्तलादि नाटकत्रयके व्याख्याता काटयवेमसे पहलेका बना हुआ है; क्योंकि इसमें हेमचन्द्रके उक्त ग्रन्थवाक्योंका उल्लेखपूर्वक खण्डन है और काटयवेमके व्याख्या-ग्रन्थोंमे इस ग्रन्थके सूत्रोंका ही प्राकृतविषयमें प्रमाणत्वरूपसे निर्देश पाया जाता है, ऐसा श्रीवेंकटरंगनाथ शर्माने इस ग्रन्थके प्रथम अध्यायकी भूमिकामें प्रकट किया, जो सन् १८६६ मे आर्षप्रेस विजिगापट्टमसे छपकर प्रकाशित हुआ है। ग्रन्थका अन्तभाग पासमें न होनेसे नहीं दिया जा सका।]

९६. जिनसहस्रनाम-टीका (अमरकीर्तिसूरि)

अन्तभाग :—

नत्वा जिनसेनाचार्यं विद्यानं[दं] समंतभद्रमर्हंत ।
श्रीमत्सहस्रनाम्ना·············चिम ससिद्धयै ॥१॥

अथ श्रीमज्जिनसेनाचार्यः चातुर्वर्ण्यसंघसमुद्धरणे धीरः सकललोक-नरोचनाकातः(?) खंडितापाखंडिमंडलाहंकारः शुक्तिवचनवीचीविरचित-चित्तचमत्कारः स्वर्गापवर्गपुरमार्गस्पंदनः चारुचारित्रचमत्कृतसक्रंदनः सकलजगज्जयजातदर्पकंदर्पनिष्कंदनः शुभोपदेशवचनशैत्यगुणावगणित-

हरिचन्दनः श्रीमद्गीर्वाणभाषारचितश्रीमहापुराणः जिनयज्ञादिसकलशास्त्रप्रवीणः श्रीमद्गुणभद्राचार्यवर्यसेवितपादांभोजः प्रज्ञापुंजः इति विरुदावली विराजमानः जिनसहस्रनामस्तवनं सचिकीर्षुः प्रसिद्धाष्टसहस्रेद्धलक्षणमित्यादिस्नाभिप्रायसं[सू]चूनपरः श्लोकमित्याह—

× × × ×

इति सूरिश्रीमदमरकीर्तिविरचितायां जिनसहस्रनामटीकायां प्रथमोध्यायः॥१॥

अन्तभाग :—

अथ प्रशस्तिः। स्वस्तिस्यात्कारकोत्तमाय श्रीमदनेकांतशासनाय ।

सद्वृत्तो ‥लोकमहितः ‥ ‥ ‥ ‥ ‥

‥ ‥ ‥ ‥ ‥ ‥ ‥ ‥ य ।

रत्नाना ‥ ‥ ‥ सुमनाः स्याद्वादचंद्रोदयः

साक्षात्सोऽत्र सनातनो विजयते श्रीमूलसंघोदधिः ॥१॥

आसाद्यद्युसदा(?) सहायमसमं गत्वा विदेहं जवा-

दद्राक्षीत् किल केवलेक्षणमिनं द्योतत्तमध्यक्षतः ।

स्वामी साम्यपदादिरूढधिषणः श्रीनंदिसंघश्रियो

मान्यः सोऽस्तु शिवाय शांतमनसा श्रीकुन्दकुन्दाऽभिधः ॥२॥

श्रीपद्मनंदिविद्वन् विख्याता त्रिभुवनेऽपि कीर्त्तिस्ते ।

हारति हीरति हंसति हरति हरोत्तसमनुहरति ॥३॥

श्रीपद्मनंदिपरमात्मपरः पवित्रो देवेन्द्रकीर्तिरथ साधुजनाऽभिवंद्यः ।

विद्यादिनंदिवरसूरिरनल्पबोधः श्रीमल्लिभूषण इतोऽस्तु च मंगलं वै ॥४॥

प्रायो व्याकरणं येन धातुपाठेऽवतारित ।

स जीयात् शब्दमाणिक्यनिवासः श्रुतसागरः ॥५॥

मल्लिभूषणशिष्येण भारत्या नंदनेन च ।

सहस्रनामटीकेयं रचिताऽमरकीर्तिना ॥६॥

इति श्रीसूरिश्रीमदमरकीर्त्तिविरचितायां भट्टारकश्रीविश्वसेनाऽनुमोदितायां संघाधिपति-सुधाचन्द्र-चन्द्रिका जिनसहस्रनामटीका सम्पूर्णा ॥

६७. सरस्वती(भारती)कल्प (मल्लिषेणसूरि)

आदिभाग :—

जगदीशजिनं देवमभिवन्द्याभिनन्दनं(शंकरं) ।
वक्ष्ये सरस्वतीकल्पं समासाद(सेना)ल्पमेधसान्(म्) ॥१॥
अभयज्ञानमुद्राक्षमालापुस्तकधारिणी ।
त्रिनेत्रा पातु मां वाणी जटाबालेन्दुमण्डिता ॥२॥
लब्धवाणीप्रसादेन मल्लिषेणेन सूरिणा ।
रच्यते भारतीकल्पः स्वल्पजाप्य-फलप्रदः ॥३॥

अन्तभाग :—

वाक्पतेर्वादिवेतालादभयेन्दोश्च पञ्चलात् ।
श्रीमल्लिषेणयोगींद्रादेशाद्विद्या समागता ॥६५॥
कृतिना मल्लिषेणेन श्रीषेणस्य च सूनुना ।
रचितो भारतीकल्पः शिष्टलोकमनोहरः ॥६६॥
सूर्याचन्द्रमसौ यावन्मेदिनी भूधरार्णवाः ।
तावत्सरस्वतीकल्पः स्थेयाच्चेतसि धीमताम् ॥६७॥

इत्युभयभाषाकविशेखर-श्रीमल्लिषेणसूरिविरचितः श्रीभारतीकल्पः समाप्तः ।

६८. कामचाण्डालीकल्प (मल्लिषेणसूरि)

आदिभाग :—

श्रीवीरं जिनमानम्य खण्डित-स्मर-सायकम् ।
वक्ष्येहं कामचाण्डालीकल्पमिष्टफलप्रदम् ॥१॥
भूषिताभरणैः सर्वैर्मुक्तकेशा निरम्बरा ।
पातु मां कामचाण्डाली कृष्णावर्णा चतुर्भुजा ॥२॥

फलकाचकलशकरा शाल्मलिदण्डोद्धुरगोपेता ।
जयतात् त्रिभुवनवन्द्या जगति श्रीकामचाण्डाली ॥३॥

विरचयति मन्त्रवादं संक्षेपात्सकलजनहितार्थमिदम् ।
कलिकालोभयभाषा-कविशेखर-मल्लिषेणगणी ॥४॥

साधकदेव्याराधनमशेषजनवश्ययन्त्रतन्त्राणि ।
ज्वालागर्दभभेदः शास्त्रेऽस्मिन् कथ्यते स्पष्टम् ॥५॥

अन्तभाग :—

निःशेषागममन्त्रवादकुशलं वाग्देवताऽलंकृतं ।
तन्नत्वा कविशेखरं मुनिवरं श्रीमल्लिषेणाह्वय ॥
दद्यात्स्वर्णसमन्वितोन्नतघटाद् धाराजलं तत्करे ।
साक्षीकृत्य हुताशनानिलव(प)यश्चन्द्रार्कतारागणान् ॥ आज्ञाप्रक्रमः !
उद्यन्निर्मलकीर्तिपूरितदिशो विज्ञातजैनागमो ।
नाम्ना श्रीजिनसेनसूरिरभवद्भव्याम्बुजाना रविः ॥
तच्छिष्यः कविशेखरोऽजनि मुनिः श्रीमल्लिषेणो गणी ।
तेनैव स्वपरोपकारजनकः श्रीमन्त्रवादः कृतः ॥

इत्युभयभाषाकविशेखरश्रीमल्लिषेणसूरि-विरचिते कामचाण्डालीकल्पे ज्वालागर्दभलक्षणाधिकारः पंचमः ।

भाषाद्वय-कविताया कवयो दर्पं वहन्ति तावदिह
नालोकयन्ति यावत्कविशेखर-मल्लिषेणमुनिम् ॥१॥

छन्दोलंकारशास्त्रं किमपि न च परं प्राकृतं संस्कृतं वा
काव्यं तच्च प्रबन्धं सुकविजनमनोरजनं यत्करोति ।
कुर्वन्नुर्वी-शिलादौ न लिखति किल तत्या(ख्या)ति यावत्समाप्तिं
स श्रीमान् मल्लिषेणो जयतु कविपतिर्वाग्वधूमण्डितास्यः ॥२॥

इति कामचाण्डालीकल्पः समाप्तः ।

६६. ज्वालिनीकल्प (मल्लिषेणसूरि)

आदिभाग :—

चन्द्रप्रभं जिनं नत्वा शरच्चन्द्रसमप्रभम् ।
वक्ष्येहं ज्वालिनीकल्पं संकल्पितसमप्रभम् ॥१॥

अन्तभाग :—

श्रीमतोऽजितसेनस्य सूरेः कर्मार्तिधूरिणः ।
शिष्यः कनकसेनोभूद्वर्णि(र्णि ?)कमुनिजनस्तुतः ॥२॥
तदीयशिष्यो जिनसेनसूरिः तस्याग्रशिष्योऽजनि मल्लिषेणः ।
वाग्देवतालक्षितचारुवक्त्रस्तेनारचि [श्री] शिखिदेविकल्पः ॥३॥
कुमतिमतविभेदी जैनतत्त्वार्थवेदी हृतदुरितसमूहः क्षीणसंसारमोहः ।
भवजलधितरण्डो वाग्व[रो]वाकरण्डो विबुधकुमुदचन्द्रो मल्लिषेणो गणीन्द्रः४

इति ज्वालिनीकल्पं समाप्तम् ।

१००. भैरवपद्मावतीकल्प सटीक (मल्लिषेणसूरि)

आदिभाग :—

टी॰ मं॰—श्रीमच्चातुर्णिकायामरखचरवधूनृत्यसंगीतकीर्ति-
व्याप्ताशामण्डलं मण्डितसुरपटहाद्यष्टसत्प्रातिहार्यं ।
नत्वा श्रीपार्श्वनाथं जितकमठकृतोद्दण्डघोरोपसर्गं
पद्मावत्या हि कल्पप्रवरविवरणं वक्ष्यते मल्लिषेणैः* ॥१॥

---

* साराभाई नवाब द्वारा मुद्रित प्रतिमें 'बन्धुषेणैः' पाठ दिया है और उसके द्वारा टीकाको बन्धुषेणकृत सूचित किया है, परन्तु ऐ॰ प॰ सरस्वती भवन बम्बईकी प्रतिमें और ला॰ मनोहरलालजी जौहरी देहलीकी दो प्रतियों में भी 'मल्लिषेणैः' पाठ पाया जाता है और उससे टीकाका स्वोपज्ञ होना जाना जाता है, ग्रन्थकी सन्धियोंमें भी मल्लिषेणका ही नाम है। बन्धुषेणके टीकाकार होनेका उनसे कोई समर्थन नहीं होता। और न अन्तमें ही बन्धु-षेणका टीकाकार-रूपसे कोई नामोल्लेख तथा परिचय उपलब्ध होता है।

मूल मं०—कमठोपसर्गदलन त्रिभुवननाथं प्रणम्य पार्श्वजिनम्।
वक्ष्येऽभीष्टफलप्रद-भैरवपद्मावतीकल्पम् ॥१॥
पाशफलवरदगजवशकरणकरा पद्मविष्टरा पद्मा।
सा मा रक्षतु देवी त्रिलोचना रक्तपुष्पाभा ॥२॥
त्रोतला त्वरिता नित्या त्रिपुरा कामसाधनी।
देव्या नामानि पद्मायास्तथा त्रिपुरभैरवी ॥३॥
पाशवज्रफलाभोजभृत्करा त्रोतलाह्वया।
शंखपद्माभया वरदा त्वरिताख्याऽरुणप्रभा ॥४॥
पाशाकुशपयोजातसाक्षमूल(माल)करा वरा।
हंसवाहाऽरुणा नित्या जटा बालेन्दुमण्डिता ॥५॥
शूल-चक्र-कशाभोज-चाप-बाण-फलाकुशैः।
राजिताऽष्टभुजा देवी त्रिपुरा कुकुमप्रभा ॥६॥
शंख-पद्म-फलाभोजभृत्करा कामसाधनी।
बन्धूकपुष्पसंकाशा कुक्कुटोरगवाहना ॥७॥
पाशचक्रधनुर्बाणखेटखड्गफलाम्बुजैः।
लसद्भुजेन्द्रगोपाभा त्र्यक्षा त्रिपुरभैरवी ॥८॥
आदौ साधकलक्षणं सुसकला देव्यर्चनायाः क्रमं
पश्चाद्द्वादशयंत्रभेदकथन स्तभोऽङ्गनाकर्षणं।
यंत्र वश्यकरं निमित्तमपरं वश्यौषध गारुडं
वक्ष्येऽह क्रमशो यथा निगदिताः कल्पेऽधिकारास्तथा ॥९॥
इति दशविद्याधिकारैर्ललितार्याश्लोकगीतिसद्वृत्तैः।
विरचयति मल्लिषेणः कल्पं पद्मावतीदेव्याः ॥१०॥
निर्जितमदनाटोपः प्रशमितकोपो विमुक्तविकथालापः।
देव्यर्चनानुरक्तो जिनपदभक्तो भवेन्मत्री ॥११॥
मन्त्राराधनशूरः पापविदूरो गुणेन गम्भीरः।
मौनी महाभिमानी मंत्री स्यादीदृशः पुरुषः ॥१२॥

गुरुजनकृतोपदेशो गततंद्रो निद्रया परित्यक्तः ।
परिमितभोजनशीलः स भवेदाराधको देव्याः ॥१३॥

निर्जितविषयकषायो धर्मामृतजनितहर्षगतकायः ।
गुरुतरगुणसंपूर्णः स भवेदाराधको देव्याः ॥१४॥

शुचिः प्रसन्नो गुरुदेवभक्तो दृढव्रतः सत्यदयासमेतः ।
दक्षः पटुर्बीजपदावधारी मंत्री भवेदीदृश एव लोके ॥१५॥

एते गुणा यस्य न संति पुंसः क्वचित्कदाचिन्न भवेत्स मंत्री ।
करोति चेद्दर्पवशात्स जाप्यं प्राप्नोत्यनर्थं फणिशेखरायाः ॥१६॥

इत्युभयभाषाकविशेखर-श्रीमल्लिषेणसूरिविरचिते भैरवपद्मावतीकल्पे मंत्रिलक्षणनिरूपकः प्रथमोऽधिकारः ॥

अन्तभाग :—

सकलनृपमुकुटघटितचरणयुगः श्रीमदजितसेनगणी ।
जयतु दुरितापहारी भव्यौघभवार्णवोत्तारी ॥५७॥

जिनसमयागमवेदी गुरुतरसंसारकाननच्छेदी ।
कर्मेन्धन-दहनपटुस्तच्छिष्यः कनकसेनगणी ॥५८॥

चारित्रभूषितांगो निःसंगो मथितदुर्जयाऽनंगः ।
तच्छिष्यो जिनसेनो बभूव भव्याब्जघर्मांशुः ॥५९॥

तदीयशिष्योऽजनि मल्लिषेणः सरस्वती-लब्धवरप्रसादः ।
तेनोदितो भैरवदेवतायाः कल्पः समासेन चतुःशतेन(४००) ॥६०॥

यावद्वार्धि-महीधर-तारागण-गगन-चन्द्र-दिनपतयः ।
तिष्ठति तावदास्तां भैरवपद्मावतीकल्पः ॥६१॥

इत्युभयभाषा-कविशेखरश्रीमल्लिषेणसूरिविरचिते भैरवपद्मावतीकल्पे गरुडाधिकारो दशमः ॥

१०१. महापुराण (मल्लिषेणसूरि)

आदिभाग :—

..................................।

..................................॥१॥

अन्तभाग :—

तीर्थे श्रीमुलगुन्दनाम्नि नगरे श्रीजैनधर्मालये
स्थित्वा श्रीकविचक्रवर्तियतिपः श्रीमल्लिषेणाह्वयः ।
संक्षेपात्प्रथमानुयोगकथनव्याख्यान्वित शृण्वता
भव्याना दुरितापह रचित गन्निःशेषविद्याम्बुधिः ॥१॥
वर्षैकत्रिशताहीने सहस्रे(६६६) शकभूभुजः ।
सर्वजिद्वत्सरे ज्येष्ठे सशुक्ले पंचमीदिने ॥२॥
अनादि तत्समासं तु पुराण दुरितापहम् ।
जीयादाचन्द्रतारार्कं विदग्धजनचेतसि ॥३॥
श्रीजिनसेनसूरितनुजेन कुदृष्टिमतप्रभेदिना
गारुडमंत्रवादसकलागमलक्षणतर्कवेदिना ।
तेन महापुराणमुदित भुवनत्रयवर्तिकीर्तिना
प्राकृतसस्कृतोभयकवित्वधृता कविचक्रवर्तिना ॥

[विद्वद्रत्नमाला, कोल्हापुर ल० भ० मठ प्रति

१०२. कर्मकाण्ड-टीका (भ० ज्ञानभूषण व सुमतिकीर्ति)

आदिभाग :—

महावीरं प्रणम्यादौ विश्वतत्त्व-प्रकाशक ।
भाष्यं हि कर्मकाण्डस्य वक्ष्ये भव्यहितकर ॥१॥
विद्यानदि-सुमल्ल्यादिभूष-लक्ष्मीन्दु-सद्गुरून् ।
वीरेन्दुं-ज्ञानभूष हि वंदे सुमतिकीर्तियुक् ॥२॥

सिद्धातपरिज्ञानी चक्रवर्तिश्रीनेमिचन्द्रकविः ग्रंथप्रारम्भपूर्वं ग्रन्थनिर्विघ्न-परिसमाप्त्यादिफलमभिलषन् श्रीइष्टदेवनेमिनाथ नमस्कुर्वन्नाह—

अन्तभाग :—

मूलसघे महासाधुर्लक्ष्मीचन्द्रो यतीश्वरः।
तस्य पट्टे च वीरेन्दुर्विबुधो विश्ववंदितः ॥१॥
तदन्वये दयाम्भोधिर्ज्ञानभूपो गुणाकरः।
टीका हि कर्मकाण्डस्य चक्रे सुमतिकीर्तियुक् ॥२॥
टीका गोम्मटसारस्य विलोक्य विहितध्रुव।
पठंतु सज्जनाः सर्वे भाष्यमेतन्मनोहरं ॥३॥
प्रमादाद्भ्रमतो वापि यद्यशुद्धं कदाचन।
टीकायामत्र संशोध्य विबुधैर्द्वेषवर्जितैः ॥४॥

इति श्रीभट्टारकश्रीज्ञानभूषण-विरचिता * कर्मकाण्डप्रथटीका समाप्ता ॥

[बारसेनामन्दिर-प्रति

१०३. पुण्यास्रव-कथाकोष (रामचन्द्र मुमुक्षु)

आदिभाग :—

श्रीवीरं जिनमानम्य वस्तुतत्त्व-प्रकाशकं।
वक्ष्ये कथामय ग्रन्थं पुण्यास्रवाभिधानकं ॥१॥

अन्तभाग :—

इति पुण्यास्रवाभिधाने ग्रन्थे केशवनन्दिदिव्यमुनिशिष्य-रामचन्द्रमुमुक्षु विरचिते दानफलव्यावर्णनो नाम षोडशवृत्ता' (अधिकाराः) समाप्ताः ॥१६॥

---

* जयपुर और देहलीकी कितनी ही प्रतियोंमें 'ज्ञानभूषणनामांकिता सूरिसुमतिकीर्ति-विरचिता' ऐसा पाठ पाया जाता है, जो ग्रन्थकी दोनों भट्टारकों द्वारा सयुक्त रचना होनेका परिणाम जान पड़ता है। और जिस ग्रन्थको 'कर्मकाण्ड' नाम दिया गया है वह १६० गाथात्मक 'कम्मपयडि' (कर्मप्रकृति) नामका गोम्मटसारी प्रकरण है।

यो भव्याब्ज-दिवाकरो यमकरो मारेभपञ्चाननो
नानादुःखविधायि कर्म्मकुभृतो वज्रायते दिव्यधीः।
यो योगीन्द्र-नरेन्द्र-वन्दितपदो विद्यार्णवोत्तीर्णवान्
ख्यातः केशवनन्दिदेव-यतिपः श्रीकुन्दकुन्दान्वयः ॥१॥

शिष्योऽभूत्तस्य भव्यः सकलजनहितो रामचन्द्रो मुमुक्षु-
र्ज्ञात्वा शब्दापशब्दान् सुविशदयशसः पद्मनन्द्याभिधानात्(द्वयाद्दे)।
वन्द्याद्वादीभसिंहात्परमयतिपते. सो व्यधाद्भव्यहेतो-
र्ग्रन्थं पुण्यास्रवाख्यं गिरिशमितिमितं दिव्यपद्यैः कथार्थैः ॥२॥

सार्द्धैश्चतु'सहस्रैर्यो(४५००)मितः पुण्यास्रवाह्वयः।
ग्रन्थः स्थेयात् सता चित्ते चन्द्रादिवत्सदाम्बरे ॥३॥ *
कुन्दकुन्दान्वये ख्याते ख्यातो देशिगणाग्रणीः।
अभूत संघाधिपः श्रीमान्पद्मनन्दी त्रिरात्रिकः ॥४॥

वृषाधिरूढो गणपो गुणोद्यतो विनायकानन्दितचित्तवृत्तिकः।
उमासमालिङ्गितईश्वरोपमस्ततोप्यभून्माधवनन्दिपण्डितः ॥५॥
सिद्धांतशास्त्रार्णवपारदृश्वा मासोपवासी गुणरत्नभूषितः।
शब्दादिवार्थो(?) विबुधप्रधानो जातस्ततः श्रीवसुनन्दिसूरिः ॥६॥

दिनपतिरिव नित्यं भव्यपद्माब्धिबोधी
सुरगिरिरिव देवैः सर्वदा सेव्यपादः।
जलनिधिरिव शश्वत् सर्व्वसत्वानुकम्पी
गणभृदर्जन शिष्यो मौलिनामा तदीयः ॥७॥

---

* पंचायती मन्दिर देहलीमें इस ग्रन्थकी दो प्रतियाँ हैं—एक सं० १५८४ की लिखी हुई, जिसमें प्रशस्तिके इस * चिन्ह तक कुल तीन ही पद्य हैं, दूसरी सं० १७६६ की लिखी हुई है जिसमे ९ पद्य हैं; परन्तु आदिके उक्त तीन पद्योंको छोड़कर शेष ६ पद्योंमें जो प्रशस्ति है वह एक जुदी तथा अधूरी जान पड़ती है—ग्रन्थकर्ताके साथ उसका सम्बन्ध व्यक्त नहीं होता।

कलाविलासः परिपूर्णवृत्तो दिगम्बरालंकृतिहेतुभूतः।
श्रीनन्दिसूरिर्मुनिवृन्दवन्द्यस्तस्मादभूच्चन्द्रसमानकीर्तिः ॥८॥
चार्वाक-बौद्ध-जिन-साङ्ख्य-शिवद्विजाना,
वाग्मित्व-वादि-गमकत्व-कवित्व-वित्तः।
साहित्य-तर्क-परमागम-भेदभिन्नः,
श्रीनन्दिसूरिगगनाङ्गणपूर्णचन्द्रः ॥६॥

इति समाप्तोऽयं पुण्याश्रवाभिधो ग्रंथः।

[देहली पंचायती मन्दिर प्रति

१०४. प्रा०पंचसंग्रह-टीका (भ० सुमतिकीर्ति)

आदिभाग :—

..................................।
..................................॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि नन्दिसंघो वरो बलात्कारगणप्रसिद्धः।
श्रीकुंदकुंदो वरसूरिवर्यो बभौ बुधो भारतिगच्छसारे॥१॥
तदन्वये देवमुनीन्द्रवंद्यः श्रीपद्मनन्दी जिनधर्म्मनंदी।
ततो हि जातो दिविजेन्द्रकीर्तिर्विद्या[दि]नंदी वरधर्म्ममूर्तिः ॥२॥
तदीयपट्टे नृपमाननीयो मल्ल्यादिभूषो मुनिवंदनीयः।
ततो हि जातो वरधर्म्मधर्त्ता लक्ष्म्यादिचन्द्रो बहुशिष्यकर्ता ॥३॥
पंचाचाररतो नित्यं सूरिसद्गुणधारकः।
लक्ष्मीचद्रगुरुस्वामी भट्टारकशिरोमणिः ॥४॥
दुर्वारदुर्वादिकपर्वताना वज्रायमानो वरवीरचन्द्रः।
तदन्वये सूरिवरप्रधानो ज्ञानादिभूषो गणिगच्छराजः ॥५॥

त्रैविद्यविद्याधरचक्रवर्ती भट्टारको भूतलयातकीर्तिः।
ज्ञानादिभूपो वरधर्म्ममूर्तिस्तदीयवाक्यात् कृतसारवृत्तिः ॥६॥

भट्टारको भुवि ख्यातो जीयाच्छ्रीज्ञानभूषणः।
तस्य पट्टोदये भानुः प्रभाचन्द्रो वचोनिधिः ॥७॥

विशदगुणगरिष्टो ज्ञानभूपो गणीन्द्र-
स्तदनुपदविधाता धर्म्मधर्ता सुभर्त्ता।
कुवलयसुखकर्त्ता मोहमिथ्याघहर्ता
स जयतु यतिनाथः श्रीप्रभाचन्द्रचन्द्रः ॥८॥

दीक्षा-शिक्षा-पदं दत्त लक्ष्मीवीरेन्द्र(न्दु?)सूरिणा।
येन मे ज्ञानभूपेण तस्मै श्रीगुरुवेनमः ॥६॥
आगमेन विरुद्धं यद् व्याकरणेन दूषितं।
शुद्धीकृतं च तत्सर्वं गुरुभिर्ज्ञानभूपणैः ॥१०॥

तथापि—

अत्र हीनादिकं किञ्चिद्रचितं मतिविभ्रमात्।
शोधयन्तु महाभव्याः कृपा कृत्वा ममोपरि ॥११॥
हृसाख्यवर्णिनः येन ग्रन्थोऽयमुपदेशितः।
तस्य प्रसादतो वृत्तिः कृत्वा सुमतिकीर्तिना ॥१२॥

श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे।
विंशत्यग्रगते (१६२०) सिते शुभतरे भाद्रे दशम्या तिथौ।
ईलावे वृषभालये वृषकरे सुश्रावके धार्मिके
सूरिश्रीसुमतीशकीर्ति-विहिता टीका सदा नंदतु ॥१३॥

इति श्रीपंचसग्रहाऽपरनामलघुगोम्मट्टसारसिद्धातग्रन्थ - टीकाया कर्म्मकाडे सप्ततिंनाम सप्तमोऽधिकारः ॥ इति श्रीलघुगोम्मट्टसारटीका समाप्ता ॥ [देहली पंचायती मन्दिर प्रति

१०५. रात्रिभोजनत्याग-कथा (ब्रह्म नेमिदत्त)

आदिभाग :—

श्रीमज्जिनं जगत्पूज्यं भारतीं भुवनोत्तमाम् ।
नत्वा गुरून्प्रवक्ष्येऽहं रात्रिभोजनवर्जनम् ॥१॥

अन्तभाग :—

जिनपतिमुखपद्मात् निर्गता दिव्यभाषा
मुनिपतिशतसेव्या सारतत्त्वप्रकाशा ।
कुमतितिमिरनाशा भानुभेव प्रशस्या
दिशतु मम सुखानि सर्वलोकैकभूपा ॥१॥
श्रीभट्टारकमल्लिभूषणगुरुः सूरिश्रुताब्धिः सुधी-
राचार्यो वरसिंहनन्दी सुगुरुः कुर्यात्सता मंगलम् ॥२॥

इति भट्टारकश्रीमल्लिभूषण-शिष्याचार्यश्रीसिंहनन्दिगुरूपदेशेन ब्रह्म-नेमिदत्तविरचिता रात्रिभोजन-परित्यागफलदृष्टान्त-श्रीनागश्रीकथा समाप्ता।

१०६. नेमिनाथ-पुराण (ब्रह्म नेमिदत्त)

आदिभाग :—

श्रीमन्नेमि जिनं नत्वा लोकालोकप्रकाशकम् ।
तत्पुराणमहं वक्ष्ये भव्यानां सौख्यदायकम् ॥१॥

अन्तभाग :—

गच्छे श्रीमति मूलसंघतिलके सारस्वतीये शुभे
विद्यानन्दगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
ज्ञानध्यानरतः प्रसिद्धमहिमा चारित्रचूडामणिः
श्रीभट्टारकमल्लिभूषणगुरुः जीयात्सतां भूतले ॥१॥
प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगी-तरंगैः
कान्तं मिथ्यामलनिकरः(?) क्रोधनक्रादिदूरः ।

श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेंद्रप्रवृद्धिः
जीयान्मे सूरिवर्यो व्रतनिचयलमत्पुण्यपण्यश्रुताब्धिः ॥२॥

मिथ्यावादान्धकारक्षयकिरणरविः श्रीजिनेंद्राघ्रिपद्म-
द्वंद्वे निर्द्वंद्वभक्तिर्जिनगदितमहाज्ञानविज्ञानसिन्धुः ।
चारित्रोत्कृष्टभारो भवभयहरणो भव्यलोकैकबन्धु-
र्जीयादाचार्यधर्यो विशदगुणनिधिः सिंहनन्दी मुनीन्द्रः ॥३॥

यस्योपदेशवसिता(शतो) जिनपुंगवस्य नेमेः पुराणमतुल शिवसौख्यकारी ।
चक्रे मयापि तुच्छतमा(?)ऽत्र भक्त्या कुर्यादिमं श्रुततमं मम मंगलानि ॥४॥

(अगले एक पद्यमें नेमिपुराणात्मक आशीर्वाद है।)

इति श्रीत्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषण-शिष्याचार्यसिंहनंदिनामाङ्किते ब्रह्मनेमिदत्तविरचिते श्रीनेमितीर्थंकरपरमदेव-पंचकल्याणकव्यावर्णनो नाम षोडशोऽधिकारः ॥

१०७. समवसरणपाठ (प० रूपचन्द)

आदिभाग :—

नमस्कृत्यार्हतः सिद्धान् सूरीन् सत्पाठकान्मुनीन् ।
विदधे केवलज्ञानकल्याणार्चां शुभाप्तये ॥१॥

अन्तभाग :—

नाभेयभुक्तिरुचिरे कुरुनाम्निदेशे शुद्धे सलेमपुरवाक्पहिरूपसिद्धे ।
अग्रोतकान्वयविभूषणगर्गगोत्रः श्रीमामटस्य तनयो भगवानदासः ॥१॥
तत्पूर्वपत्न्या प्रभवः प्रतापी श्रीब्रह्मदासेति समासवृत्तः ।
द्वितीयचाचो इति संज्ञिकाया पत्न्या भवाः पंचसुताः प्रसिद्धाः ॥२॥
हरिरिव हरिराजो भूपतिर्भूमिर्वोच्य(?)भवदभयराजः कीर्तिचन्द्रः सुकीर्त्तिः ।
तदनुजकविरूपो रूपचन्द्रो वितंद्रो विमलसुमतिचक्षुर्जैनसिद्धांतदक्षः ॥३॥

स रूपचन्द्रोऽथ समाव्रजत्पुरीं वानारसीं बोधविधानलब्धये।
आस्वाद्य शब्दार्थसुधारसं ततः सम्प्राप्तवांस्तद्दरियापुरं परं ॥४॥
विराजिते यत्र महोदये कुलं न राजते किं न महोदयाकुलं।
न यत्र केन क्रियतेऽप्यसत्क्रिया न(ना ?)क्रियते केन य एव सत्क्रियाः ॥५॥

× × × ×

श्रीमत्साहिजलालदीनविलसद्वंशाद्रिभास्वान्महा-
नुद्यद्विश्वमहोमहोदयजहांगीरात्मजः सज्जयः।
स श्रीसाहिजहांनरेन्द्रमहितो मघा(द्या)चकत्तान्वयः
श्रीन्द्रप्रस्थपुरप्रतापविदितो यत्पालने प्रोद्गतः ॥१०॥

श्रीमन्मूलमहोदयैकतिलकश्रीनन्दिसंघप्रभुः
प्रायः प्रोल्लसदुत्तरस्याग(?) बलात्कारे गणे गौरव.।
गच्छे स्वच्छसरस्वतीप्रविदिते श्रीकुन्दकुन्दान्वये
वादीभेदमदप्रभेदनविधौ श्रीसिंहकीर्तिर्महान् ॥११॥

तत्पट्टाद्रिविभास्करो धृतिधर' श्रीधर्मकीर्तिं कृती
तस्मात्शीलविभूपणो गुणनिधिर्गण्यो गणीन्द्रोऽजनि।
सिद्धांताम्बुधिपारसारसुहितः प्रायः प्रतापस्ततः
प्रोद्यत्पुण्यपरः प्रसिद्धमुनिराट् श्रीज्ञानभूपोऽभवत् ॥१२॥

तत्पट्टे प्रमदप्रकाशविलसत् श्रीभारतीभूपणः
चारित्राचरणाचमत्कृतदशः किं वा तपोभूपणः।
श्रीभट्टारकवंदिताह्रियुगलो गण्योऽप्यनुदद्दूषणः
शश्वत् किन्नमस्यते बुधगणैः श्रीमज्जगद्भूपणः ॥१३॥

श्रीमद्गोलापूर्वान्वयगिरिशिरसि प्रोद्गतो विश्वविद्या-
लीलाविध्वस्तमिथ्यात्वविभवतिमिरस्तोमलब्धप्रतापः।
मारवानाधोगोत्रप्रविदितविभवः श्रीजगद्भूपणाना-
माम्नाये वल्लिपानोऽभवदखिलगुणो दिव्यमेत्राविधानः ॥१४॥

तत्पत्नीकृतवर्गपोगन्दिचित. स्वर्गैकवर्गपल्कर'
धर्माश्लिष्टत्रिशिष्टमार्गमसुगुणाद्दुर्गाख्यया सर्वतः ।
आसीत् शत्रुमदः सुपूर्वतनयः श्रीचक्रसेनस्ततो
प्रोद्यच्चित्रविचित्रनागुणमयः श्रीमित्रसेनोऽपरः ॥१५॥
यद्विद्याप्रभवत्प्रतापभयभाग् विद्वद्गणाभूत्तमा ।
व्याजग्रामवनालयापि भयतो श्रीचक्रपाणिश्रुते ॥१६॥
यश्रे निस्तरता गिमत्र तदिद प्रायप्युनर्वंगगते(?) ।
प्रासीत्तद्गुणगौरवस्य जयतु श्रीचक्रसेनो महान् ॥१७॥
तस्य प्रिया शीलनिधिगलील(?) कृष्णावती तत्प्रभवोऽतिविद्यः ।
यो राजितो भोगसमाज्जितान्या सुयोगभावोपि विभाति भूत्या ॥१८॥
इजा इवाख्याश्च तदंगनास्तयोर्बभूवतुः केवल-धर्मसेनकौ ।
सुतौ सुशीलौ विलसत प्रभापरौ जगत्त्रये पुण्यवता सुमपदः ॥१९॥
श्रीमद्दिव्यवंशो द्वितीयतनयः पूर्णप्रतापप्रभा-
भासच्चारुललाटहर्षितजनस्त्रीमैकचेतोऽम्बुजः ।
स श्रीन्निश्रपवित्रनात्मविभवः श्रीमित्रसेनो महान्
सद्दानैकनिधानता प्रविदधत् संप्राप्तमानो बभौ ॥२०॥
सुशीलया तत् प्रियया प्रभूतो यशोदया गीतगुणो यशोभिः ।
संघाधिपः श्रीभगवानदासो विराजतेऽसौ परमप्रतापी ॥२१॥
तद्भामिनी केशरिदे शुभानना तयोः प्रजातास्तु सुता अमी त्रयः ।
महादिसेनो जिनदाससंज्ञिकस्ततो मुनिःसुव्रतवाक् सुखप्रदाः ॥२२॥
श्रीमित्रसेन-तनयो हरिवंशो द्वितीयकः ।
विशिष्टगुणसंपन्नो विभाति नृपवत्सलः ॥२३॥
श्रीमान् श्रीभगवानदास इति वाक्पूर्णप्रतापो महान्
भक्त्या श्रीजिनराजपादयुगलप्रायः प्रतिष्ठापन ।
कृत्वा यो भुवि संघराजपदवीं चिक्राय(?)सद्विक्रमी
भूयो दानविधानमानकरणैर्जा········श्चिर ॥२४॥

श्रीमान्कि भरतेश्वरः किमथवा श्रेयान्नृपः श्रेयसा
शक्रः किं किमु देवसूरिरनघः किं राजराजो महान् ।
यस्यालोकविधौ प्रसिद्धविबुधाः संदिग्धभावोऽभवन्
सोऽय श्रीभगवानसंघपतिराट् प्रायश्चिरं जिव्य(जीव)ताम् ॥१५॥

× × × ×

तेन श्रीवरसंघराजभगवद्दासेन संपोषिता
वाग्देवी बुधरूपचंद्रमभितः संप्रेयमाणाऽभवत् ।
श्रीसर्वज्ञपदाम्बुजार्चनकृतौ कैवल्यकेलीमयं
चक्रे चारुपदावलीललितमाचार्यसर्ज्या(?)विधि ॥३२॥

ज्ञात्वा श्रीमुनिपाणिनीयमतुलालंकारपारं दधत्
षट्तर्काविधिना(?) प्रपद्य श्रु(?)वृहत्तारादिकानागमान् ।
सिद्धान्तान् परिचिन्त्य वाग्भटकृतामा(ना)शाधरीश्र(म)द्भुता
बुध्वा वृत्तिमचीकरं किमपरं कैवल्यसंपूजनम् ॥३३॥

श्रीमत्संवत्सरेऽस्मिन्नरपतिनुतयद्विक्रमादित्यराज्ये-
ऽतीते द्गनंदभद्रास(शु)कृत्परिमिते(१६९२ ?) कृष्णपक्षे ष(?)मासे ।
देवाचार्यप्रचारे शुभनवमतिथौ सिद्धयोगे प्रसिद्धे
पौनर्वस्वित्पुडस्थे(?) समवसृतिमहं प्राप्तमाप्तासमाप्ति ॥३४॥

अनेकतर्कसंकर्ष-प्रहर्षित-बुधोत्तमः
स्वर्ध्वनीव यशस्फूर्त्तिर्जीयात् श्रीप्रीतिवर्द्धनः ॥३५॥

जीयात् श्रीरूपचन्द्रश्चिरमिह महितः शब्दशास्त्रार्थधीरैः
वीरः प्रज्ञावता यो बुधगणवनिता-गीयमानो यशोभिः ।
सद्वादे सर्वविद्यावरद इतिपद विश्वलोके प्रसिद्धं
विद्वद्देवाधिदेवः प्रवरजिनमते स्रग्धराभ्यर्च्यमानः ॥३६॥
जीयात् श्रीनेत्रसिंहोऽयं शाश्वत्शिष्याग्रणीर्महान् ।
नित्य नेत्रमिवाभाति विद्वज्जनवचो(मनो)हरः ॥३७॥

शब्दार्थरीतिरूपाढ्या गुणालंकारधारणी ।
जिनार्चा भामिनी भूयात् प्रसिद्धेयं महीतले ॥३८॥
श्रीमता रूपचन्द्रेण कृतेयं श्रीजिनार्हणा ।
कारिता भगवद्दास-संघराजेन भक्तितः ॥३६॥
आचार्यकश्रीजिनेशेन(जिनसेन)भाषितमहापुराणोक्तविधैरनुक्रमात् ॥
कृतेयमर्चा जिनकेवलोदया भव्यात्मानां संविदधातु मंगलं ॥४०॥

× × × ×

जिन-सिद्ध-महाचार्योपाध्यायसाधवः सदा ।
कुर्वन्तु संस्तुताः श्रीमद्रूपचन्द्राय मंगलं ॥४८॥

इति श्रीमत्पंडितरूपचन्द्र-कृत श्रीसंघाधिपति-भगवानदास-कारितं भगवत्समवसरणार्चनविधानं समाप्त ॥

१०८. सुखनिधान (कवि जगन्नाथ)

आदिभाग :—

नाभेयं करुणासिंधुं भव्यपंकज-भास्करं ।
शास्वत सौख्यसदनं नमामि भवशान्तये ॥१॥

× × × ×

श्रीश्रीपालचरित्रस्य रचने महती मम ।
वाञ्छा प्रजायतेऽत्यत विदेहस्थस्य चक्रिणः ॥४७॥
मदबुद्धि. कलामूढो विद्याभ्यामपरिच्युतः ।
यदहं शास्त्रकर्तेति गमिष्यामि हसं बुधा(धान् ?) ॥४८॥
तथा च—कवयः सिद्धसेनाद्या [वय तु] कवयो मताः ।
मणयः पद्मरागाद्या ननु काचोपि मेचकः ॥४६॥
परं किमत्र पांडित्यं सरलैर्निनदैरिव(रहं?) ।
चरित्रं रचयाम्येष नाम्ना सुखनिधानकं ॥५०॥

अन्तभाग :—

धीरा विशुद्धमतयो मम सच्चरित्रं कुर्वन्तु शुद्धमिह यत्र विपर्ययोक्तं ।
दीपो भवेत्किल करे न तु यस्य पुंसो दोषो न चास्ति पतने खलु तस्य लोके ॥
आचार्यपूर्णेन्दु-समस्तकीर्ति-सरोजकीर्त्यादिनिदेशतो मे ।
कृतं चरित्रं सुपुरांतमाले श्रीपालराज्ञः शंधामनाम्ना ॥२०६॥
दिवाकरो निशाकरो नदीश्वरोथ भूतलं नभोपि भानि भाति वै घनाथ तारकाः(?)
उमापती रमापतिः शचीपतिर्जगत्पतिर्भवेत्स यावदेष कोपि तावदेवराजता॥२१०
खखर्षिभूमीन्दुयुते(१७००)सुवत्से शुच्या दशम्या च शुभाऽश्विनस्य।
पुरातमाले सुपुरे महेन ग्रन्थ जगन्नाथसुधीरकार्षीत् ॥२११॥
मंगलश्रीमहाभामत् महाराजमहानग
मतिमन्नाम भो नाथ म(य)तीना धीमता वरः ॥२१२॥
नामगर्भित-कमलबन्धमिदं ।

इति विमलसकलागमावलीमंडित-खंडितानेककुवादि-परिरंजिताखिल-लोक-सच्चातुरीकातरीकृतमिथ्यात्वनिवहस्य राजेन्द्रकीर्त्ति* मुख्यातेवासिना गद्यपद्यविद्याविनोदाम्बुधिना कविचक्रवर्तिना जगन्नाथनाम्ना कृते सुखनिधाननाम्नि ग्रथे विदेहक्षेत्रस्थश्रीपाल-मुक्तिगमननामः पंचमः परिच्छेदः ॥५॥

१०६. पद्मचरित-टिप्पण (श्रीचन्द्रमुनि)

आदिभाग :—

शंकरं वरदातारं जिनं नत्वा स्तुतं सुरैः ।
कुर्वे पद्मचरितस्य टिप्पित(प्पण) गुरुदेशनात् ॥१॥

अन्तभाग :—

'लाडवागडि - श्रीप्रवचनसेन-पंडितात्पद्मचरितस्सकर्ण्यो(माकर्ण्य)

---

* पूर्वकी सब संधियोंमें 'नरेन्द्रकीर्ति' नाम है, यहाँ यह 'राजेन्द्रकीर्ति' उसीका पर्यायनाम जान पड़ता है ।

बलात्कारगणश्रीश्रीनंद्याचार्यसत्कशिष्येण श्रीचंद्रमुनिना श्रीमद्विक्रमादित्यसंवत्सरे सप्ताशीत्यधिकवर्षसहस्रे(१०८७) श्रीमद्धारायां श्रीमतो भोजदेवस्य राज्ये पद्मचरित [टिप्पणं कृत]। एवमिदं पद्मचरितटिप्पितं श्रीचन्द्रमुनिकृत समाप्तमिति ।

११०. श्रीदेवताकल्प (भ० अरिष्टनेमि)

आदिभाग :—

प्रणम्य जिनमुत्तुंग-स्याद्वादनयभासुरं ।
क्रियते श्रीदेवताकल्प कल्पामरसुसेवित ॥१॥
नानावृत्त-पदन्यास-वर्णालंकाहारिणी ।
सन्मार्गगामिता जैनी प्रसन्ना नः सरस्वती ॥२॥
विद्यानुवादनिलयं श्रुतसारविद्भिर्भव्योपकार इति चिंत्य महर्षिभिस्त ।
स्पष्टीकृत पुनरह विदधेऽल्पग्रंथ नात्यन्तविस्तरकृत न विदत्यशेषं ॥३॥
मंत्री मंत्रविधिर्होमो देवताराधनक्रिया ।
यंत्र-मंत्र-प्रयोगाश्च दृश्यन्तेऽत्र विशेषत ॥४॥

अन्तभाग :—

श्रीयुवतिसदनपद्मं राजेन्द्रशिरस्सुशेखरीकृतपद्मं ।
भव्यानिहितपद्मं (?) श्रीवीरसेनपदयुगपद्मं ॥२०९॥
शिष्यः श्रीवीरसेनस्य विद्वद्विनयनायकः ।
गुणसेनो महाख्यातो मदवादीभकेशरी ॥२१०॥
तस्य शिष्यो भवेत्ख्यातो विद्वदंभोजभास्करः ।
विशिष्टोऽरिष्टनेमीशो दुष्टवादिमदापहः ॥२११॥
रचित नेमिनाथेन त्रैविद्येन यतीशिना।
स्थेयाच्छ्रीदेवताकल्पं यावच्चन्द्र-दिवाकरौ ॥२१२॥
इत्यरिष्टनेमि-भट्टारकविरचिते श्रीदेवताकल्पे तत्राधिकारः समाप्तः ।

[जौहरी मनोहरलाल देहली प्रति

१११. क्षपणासार (माधवचन्द त्रैविद्यदेव)

आदिभाग :—

> श्रीसद्धर्मसमुद्रनदनवरः सवृद्धरत्नाकरः
> सत्सेव्यो विमलोऽतुलः सुखकरो लोकप्रकाशप्रदः ।
> उद्यद्वीबलभद्रमाधवनुतश्रीपादपद्मद्वयो
> यो यूयं नमतादराकृतधियस्तं नेमिचचन्द्रं सदा ॥१॥

क्षपणासारशास्त्रस्य नादीसूत्रव्याख्यानमिद—

श्रीसद्धर्म्मसमुद्रनदनवरः सतागराज्यलक्ष्म्या विशिष्टत्वाप्रधर्मेण प्र युतः समुद्रविजयप्रियपुत्रः, संवृद्धररत्नाकरः × × × × × एव विध हरिकुलतिलकभूतनेमिनाथस्वामिनं शास्त्रकार. स्वयं निर्भरभक्त्या नमन् यूयमपि नमस्कृत्य कृतार्था भवतेति भव्यजनान् प्रेरितवानित्यर्थः । शास्त्र-कारस्य गुरु नेमिचन्द्रसिद्धांतचक्रवर्तिवदनारूपेणाथवा मगलसूत्रं व्या-ख्यानं कर्तव्य । तद्यथा—यः श्रीसद्धर्मसमुद्रनदनवरः स्याद्वादलक्षणलक्ष्मी-जन्मावासभूतः विशिष्टसागाराऽनागार-धर्म्म-समुद्र-वर्द्धनमुख्य., संवृद्धरत्ना-करः पंचविंशतिमलरहितविशिष्टसम्यक्तनिरतिचारचारुचारित्रसकलशास्त्रार्थ-परिच्छेदनपटियदुष्ट(?)विमलज्ञानरूप-रत्नानामुदयस्याकरभूतः, सत्सेव्यः विद्वज्जनपूज्यः, विमलः अनवरतपरमागमभावनासुधासागरावगाहप्रक्षा-लितात्मीय-कलिकलुषमलपंकसदोह', अतुलः कवि-गमकि-वादि-वाग्मिता-गुणैरद्वितीयः, सुखकरः मिथ्यात्वाद्यपाय-निराकरणेन सम्यक्त्वाद्युपाय-प्रदर्शनेन समस्तजनस्य हितकरः, लोकप्रकाशप्रद. श्रुतज्ञानप्रबल-प्रभाकर-प्रभूत-प्रभा-प्रभावेन जनस्य सर्वपदार्थाना करतलामलकवद्दर्शकः, उद्यद्वीबलभद्रमाधवेनः सूइखंडात्मकसिद्धातार्थ-धारण-प्रतिपादन-समर्थ-मतिबलविशिष्टगुणैरुत्कृष्टमाधवचन्द्रमुनिना पचागमबृहस्पतिसमानबुद्धि-युत-भोजराजप्राज्यसाम्राज्यसमुद्धरणसमर्थ-बाहुबलयुक्त-दानादिगुणोत्कृष्ट-महामात्य-पदवी-लक्ष्मी-वल्लभ-बाहुबलिमहाप्रधानेन वा, नुत श्रीपाद-

षद्मद्रव: वंदितश्रीपादपद्मयुगल: तं नेमिचंद्रं एवं विधं नेमिचन्द्राचार्यं कृतधिय: एतच्छास्त्रश्रवणे दत्तचित्ता: श्रोतृजना: यूयमादरात् निर्भरभक्त्या सदा सर्वकालं नमत वंदना कुरुत। चंद्रेण सह श्लेषो तत्पक्षेऽपि अयं सूत्रार्थ: संबंधनीय: × × × × ×।

अन्तभाग :—

य: कृष्टिं स्पर्द्धकाना व्यतनुत विधिवल्लक्षणं तद्विकल्पं
साकल्येन प्रमाणं नशनविधिमतो मोक्षसंप्राप्त्युपाय।
भक्त्या भव्या भजध्वं कृतियतिवृषभं तं सदालोकदृष्टिं
षट्खंड श्रीधवाद्यद्विजविभुवलबद्वाहुबल्यर्च्यपादं ॥१०॥

ये कृत्वा धवलां जयादिधवलां सिद्धांतटीका सतीं
चंद्रार्कद्युतवत्समस्तभुवनं प्राकाशयन् सततं।
उत्कृष्टं च महापुराणमनिशं तान्संघनिस्तारकान्
बद्ध्व वर वीरसेन-जिनसेनाचार्यवर्यान् बुधा: ॥११॥

कीर्तिश्छत्त्रयुतस्तपोबलवृतश्चारित्रसिंहासन:
शीलास्त्र: शमचामर: पृथुदयादुर्ग: सुदृक्कोशवान्।
प्रज्ञाचक्रधर: सुयोगसचिव: सिद्धांतषट्खडकं
यो रक्षन् मुनिचन्द्रसूरि-सुपतिं त नौमि मूर्ध्नादरात् ॥१२॥

दु:खौर्वे जननादिवीचिनिचयं मिथ्यात्वनक्राकुल
मोहाबुनरकादिगर्तममितं घोरं भवांभोनिधि।
य: सत्पालयतत्त्वदेशनमहा नावाहमुत्तीर्णवान
सैद्धाताधिपनेमिचन्द्रगणिन तं ननमीमि त्रिधा ॥१३॥

विनेयसुखकारकं सकलसंघनिस्तारकं
स्मरेभमददारकं नियमसंयमाराधकं।
त्रिगौरवनिवारकं श्रुतसमुद्रसपूरकं
नमामि गणधारकं सकलचन्द्रभट्टारक ॥१४॥

तपोनिधिमहायशः सकलचन्द्रभट्टारकः
प्रसाधिततपोबलादिविपुलबोधसच्चक्रतः ।
श्रुताम्बुनिधिनेमिचन्द्रमुनिपप्रसादा-
गतात्प्रसाधितमविघ्नतः सपदि येन षट्खंडकं ॥१५॥
अमुना माधवचन्द्रदिव्यगणिना त्रैविद्यचक्रेशिना
क्षपणासारमकारि बाहुबलिसन्मंत्रीशसंज्ञप्तये ।
शककाले शरसूर्यचंद्रगणिते(११२५) जाते पुरे दुल्लके
शुभदे दुंदुभिवत्सरे विजयतामाचद्रतारं भुवि ॥१६॥

इति क्षपणासारः समाप्तः । संवत् १८१६ मिति वैशाखवदि ११ दिने ।
[जयपुर तेरहपंथी मन्दिर प्रति

११२. षड्दर्शनप्रमाणप्रमेयसंग्रह (शुभचन्द्र)

आदिभाग :—

साद्यनंतं समाख्यातं व्यक्तानंतचतुष्टयं ।
त्रैलोक्ये यस्य साम्राज्यं तस्मै तीर्थकृते नमः ॥

सकलतीर्थकृदाभिमतप्रमाणप्रमेयानुप्रवेशार्थमिदं । तत्र तावदर्हतोऽप्रतिहतशासनस्य—तत्त्वज्ञान प्रमाणं । तद्द्विविध प्रत्यक्षं परोक्ष च । स्पष्टमाद्यमस्पष्टमन्यत् । त्रिधा च सकलेतरप्रत्यक्ष-परोक्षभेदात् । करण-क्रमव्यवधानापोढं सकलप्रत्यक्षं । क्रमान्वित करणव्यवधानापोढं विकल-प्रत्यक्षं । इंद्रियमनोव्यापाराभिमुखेतरार्थापेक्ष परोक्ष । अथवा मतिश्रुता-वधिमनःपर्ययकेवलभेदात्पंचतयं ॥

अन्तभाग :—

इति नैय्यायिकमतानुप्रवेशः ॥

मतसमासः । अमीभिः पुनर्वत्स विवेकमहापर्वतारूढैरप्रमत्तशिखर स्थितैर्जिनपुरनिवासिभिः जैनलोकैरयं दृष्टो निर्वृतिनगरीगमनमार्गः । यदुत—

जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्तत्त्व । तत्र सुखदुःखज्ञानादिपरिणामलक्षणो जीवः । तद्विपरीतस्त्वजीवः । मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतवः । कायवाङ्मनः कर्म योगः । स आस्रवः । आस्रवकार्यं वन्धः । आस्रवनिरोधः संवरः । संवरफल निर्जरा । निर्जराफलं मोक्षः । इत्येते सप्तपदार्थाः । तथा विधिप्रतिषेधानुष्ठानपदार्थाविरोधश्चात्र जैनेन्द्रदर्शने । स्वर्ग-केवलार्थिना तपोध्यानादि कर्तव्यं । सर्वजीवा न हंतव्याः । इति वचनात् । 'समितिगुप्तिश्रद्धाक्रियासपत्नो(?)योग' इति वचनात् । उत्पादविगमद्र(ध्रौ)व्ययुक्तं सत् । एकं द्रव्यमनंतपर्यामर्थ इति । प्रत्यक्षपरोक्षे द्वे एव प्रमाणे । इति जैनमतस्य निर्दर्शनमात्रं ॥

जयति शुभचन्द्रदेवः कण्डूर्गणपुंडरीकवर(न)मार्तंडः ।
चंडत्रिदंडदूरो राद्धान्तपयोधिपारगो बुधविनुतः ॥

११३. तत्वार्थवृत्तिपद (प्रभाचन्द्राचार्य)

आदिभाग :—

सिद्ध जिनेन्द्रमलमप्रतिमबोध त्रैलोक्यवंद्यमभिवद्य गतप्रबंध ।
दुर्वारदुर्जयतमः प्रविभेदनार्क तत्त्वार्थवृत्तिपदमप्रकटं प्रवक्ष्ये ॥

कश्चिद्भव्यः प्रसिध्येक(?)नामा प्रत्यासन्ननिष्ठ निष्ठाशब्देन निर्वाण चारित्रं चोच्यते प्रत्यासन्ना निष्ठा यस्यासौ प्रत्यासन्ननिष्ठः । अथाग्विसर्ग······ ।

अन्तभाग :—

इति दशमोध्यायः समाप्तः

ज्ञानस्वच्छजलस्सुरत्ननिचरा(चय)श्चारित्रवीचीचयः
सिद्धान्तादिसमस्तशास्त्रजलधिः श्रीपद्मनन्दिप्रभुः ।
तच्छिष्यान्निखिलप्रबोधजननं तत्त्वार्थवृत्तेः पदं
सुव्यक्तं परमागमार्थविषयं जातं प्रभाचन्द्रतः ॥
श्रीपद्मनन्दिसैद्धान्तशिष्योऽनेकगुणालय ।
प्रभाचन्द्रश्चिरं जीयात् पादपूज्यपदे रतः ॥

मुनीन्दुर्नंदतादिदन्निजमानदमंदरं ।
सुधाधारोद्गिरन्मूर्तिः काममामोदयज्जनं ॥
इतितत्त्वार्थवृत्तिपदं समासम् ।

११४. करकण्डु-चरित्र (भ० शुभचन्द्र)

आदिभाग :—

श्रीमते श्रुतिसिद्धाय प्रबुद्धाय परात्मने ।
नमो वृषभनाथाय नरनाथनताह्वये ॥१॥

अन्तभाग :—

('श्रीमूलसंघेऽजनि पद्मनन्दी' इत्यादि पद्य नं० ३४ से लेकर ४७ तक १४ पद्य प्रायः वे ही हैं जो पाण्डवपुराणकी प्रशस्तिमें पृष्ठ ४६-५० पर नं० १६७ से १८० तक मुद्रित हो चुके हैं ।)

करकण्डुनरेन्द्रस्य चरितं तेन निर्म्मितं ।
जिनेशपूजनप्रीत्येदं समुद्धृत्य शास्त्रतः ॥४८॥
शिष्यस्तस्य समृद्धिबुद्धिविशदो यस्तर्क्कवेदी वरो
वैराग्यादिविशुद्धिवृद्धिजनकः सर्व्वार्थसुज्ञो महान् ।
संप्रीत्या सकलादिभूषणमुनिः संशोध्य चेदं शुभं
तेनालेखि सुपुस्तक नरपतेराद्य सुचपेशिनः ॥४६॥
सकलभूषणआद्यसुभूषणो मुनिरभूदिह शास्त्रसुसंग्रहे ।
अकृतयोभिकृतः सुसहायता पठन-पाठन-लेखन-सद्विधो ॥५०॥

× × × ×

श्रीमूलसंघे कृत(ति)नदिसंघे गच्छे(गणे?)बलात्कार इदं चरित्र ।
पूजाफलेद्ध करकण्डुराज्ञो भट्टारकश्रीशुभचन्द्रसूरिः ॥५४॥
द्वाष्टे विक्रमतः शते समहते चैकादशाब्दाधिके (१६११)
भाद्रे मासि समुज्वले युगतिथौ खड्गजवाछे पुरे ।

श्रीमच्छ्रीवृषभेश्वरस्य सदने चक्रे चरित्रं त्विदं
राज्ञः श्रीशुभचन्द्रसूरियतिपश्चंपाधिपस्याद्भुतं ॥५५॥
श्रीमत्सकलभूषेण पुराणे पांडवे कृतं ।
साहाय्यं येन तेनाऽत्र तदकारि सुसिद्धये ॥५६॥

इति भट्टारक-श्रीशुभचन्द्रविरचिते मुनिश्रीसकलभूषणसाहाय्यसापेक्षे भव्यजन-जे(स)गीयमान-यशोराशिश्रीकरकंडुमहाराजचरिते करकंडुदीक्षा-ग्रहण-सर्व्वार्थसिद्धिगमनवर्णनो नाम पंचदशः सर्गः ॥१५॥

[देहली सेठ कूँचा मन्दिर प्रति

११५. शांतिकविधि (प० धर्मदेव)

आदिभाग :—

प्रणिपत्य जिनान् सिद्धानाचार्यान्पाठकान् यतीन् ।
सर्वशांत्यर्थमाम्नायपूर्वकं शांतिकं ब्रुवे ॥ १ ॥

अन्तभाग :

पोरपाटान्वये श्रीमान् वाग्भटः श्रावकोत्तमः ।
तत्पुत्रो वरदेवोऽभूत्प्रतिष्ठाचारकोविद ॥१॥
श्रीदत्ताख्यस्तदनुजः सर्व्वशास्त्रविशारदः ।
तत्पत्नी मानिनी ख्याता पातिव्रत्यविराजिता ॥२॥
तयोस्तु धर्म्मदेवाख्यः पुत्रोऽभवदनूद्भवः ।(…?)
श्रीगोगाख्यस्य विशास्य(?) दूरीकृतकलागुणः ।(…?) ॥३॥
तेनाकारि शुभायेदं शांतिकस्नानमुत्तमं ।
पठन्तु श्रावकाः सर्व्वे शोधनीय महात्मभिः ॥४॥
यावन्मेरुर्मही यावद्यावच्चन्द्रार्कतारकाः ।
तावद्भद्राणि पश्यन्तु शांतिकस्नानपाठकाः ॥५॥

इति श्रीपंडितधर्म्मदेवविरचितं श्रीशांतिकपूजाविधानं समाप्तम् ।

[जौहरी मनोहरलाल देहली प्रति

११६. अम्बिका-कल्प (भ० शुभचन्द्र)

आदिभाग :—

वन्देऽहं वीरसन्नाथं शुभचन्द्रो जगत्पतिं ।
येनाप्येत महामुक्ति-वधूस्त्री-हस्तपालनम् ॥१॥
ज्ञानभूषं तपोभूषं धर्मभूषं सुभूपणम् ।
प्रणम्य वक्ष्येऽहं कल्पं तीव्रज्ञानप्रवर्द्धकम् ॥२॥
ऊर्जयंत-निवासिन्याः यत्तिमुख्यायाश्चाम्बिकायाः(?) ।
तत्पादौ प्रणम्य च त्रिजगतीक्षेमकरौ(?) ॥३॥ युग्मं
जीवकोद्भव-सच्चन्द्र-पांडवोद्भव-दत्तक-
प्रमुखाना चरित्राण्यवदत् सोऽहं वदाम्यहम्(?) ॥४॥
कुन्दपट्टे यथाग्रंथं जिनसेनोऽपि नामतः ।
सोर्थो ह्यरीरच्चन्मंगलं श्रीमत्रप्रसगहं(?) ॥५॥
गुणभद्रस्तदन्तेयः सोपि सार्थो हि टिप्पणं ।
ग्रंथं चक्रे महाकोचसुकोत्त्रफलपूरितं ॥६॥
तदन्वये मन्दबुद्धिर्जातोऽहं ब्रीडपूरितः ।
तथाप्याम्नायं मुमोच न हि जैनपरम्परा ॥७॥
अर्हत्सिद्धाचार्योपाध्यायसुसर्वसाधूना ।
प्रथमाक्षरेण मिलितः प्रणवः सिद्धिमागमत् ॥८॥

अन्तभाग :—

शुभचन्द्रो मुनिरहं जिनदत्तस्य चाग्रहात् ।
ब्रह्मशीलस्य तस्यैवं पठनार्थं दिने कृतं ॥१२॥
गुरुणा मन्त्रदेशो(?) न कथितो मारदूषणात् ।
तथापि नाहं चक्रेशौ(?) वादात् श्रीधर्मणः कृतात् ॥१३॥
सौबौद्धस्त्वं जातासि त्वन्मते शक्तिरर्हतः ।
पाखडिमतविख्यातस्तवेति कथितस्तदा ॥१४॥

श्रीमच्छ्रीवृषभेश्वरस्य सदने चक्रे चरित्रं त्विदं
राज्ञः श्रीशुभचन्द्रसूरियतिपश्चापाधिपस्याद्भुत ॥५५॥
श्रीमत्सकलभूषेण पुराणे पांडवे कृत ।
साहाय्यं येन तेनाऽत्र तदकारि सुसिद्धये ॥५६॥

इति भट्टारक-श्रीशुभचन्द्रविरचिते मुनिश्रीसकलभूषणसाहाय्यसापेक्षे भव्यजन-जे(स)गीयमान-यशोराशिश्रीकरकंडुमहाराजचरिते करकंडुदीक्षा-ग्रहण-सर्व्वार्थसिद्धिगमनवर्णनो नाम पचदशः सर्गः ॥१५॥

[देहली सेठ कूँचा मन्दिर प्रति

११५. शांतिकविधि (प० धर्मदेव)

आदिभाग :—

प्रणिपत्य जिनान् सिद्धानाचार्यान्पाठकान् यतीन् ।
सर्वशात्यर्थमाम्नायपूर्वकं शांतिकं ब्रुवे ॥ १ ॥

अन्तभाग :

पोरपाटान्वये श्रीमान् वाग्भटः श्रावकोत्तम· ।
तत्पुत्रो वरदेवोऽभूत्प्रतिष्ठाचारकोविद· ॥१॥
श्रीदत्ताख्यस्तदनुजः सर्व्वशास्त्रविशारदः ।
तत्पत्नी मानिनी ख्याता पातिव्रत्यविराजिता ॥२॥
तयोस्तु धर्म्मदेवाख्यः पुत्रोऽभवदनूद्भवः ।(···?)
श्रीगोगाख्यस्य विशस्य(?) दूरीकृतकलागुणः ।(···?) ॥३॥
तेनाकारि शुभायेदं शांतिकस्नानमुत्तमं ।
पठन्तु श्रावकाः सर्व्वे शोधनीय महात्मभिः ॥४॥
यावन्मेरुर्मही यावद्यावच्चन्द्रार्कतारकाः ।
तावद्भद्राणि पश्यन्तु शातिकस्नानपाटकाः ॥५॥

इति श्रीपंडितधर्म्मदेवविरचितं श्रीशांतिकपूजाविधान समाप्तम् ।

[जौहरी मनोहरलाल देहली प्रति

११६. अम्बिका-कल्प (भ० शुभचन्द्र)

आदिभाग :—

वन्देऽहं वीरसन्नाथं शुभचन्द्रो जगत्पतिं ।
येनाप्येत महानुक्ति-वधूस्त्री-हस्तपालनम् ॥१॥
ज्ञानभूषं तपोभूषं धर्मभूषं सुभूषणम् ।
प्रणम्य वक्ष्येऽहं कल्पं तीव्रज्ञानप्रवर्द्धकम् ॥२॥
ऊर्जयंत-निवासिन्याः यक्षिमुख्यायाश्चाम्बिकायाः(?) ।
तत्पादौ प्रणम्य च त्रिजगतीक्षेमकरौ(?) ॥३॥ युग्मं
जीवकोद्भव-सच्चन्द्र-पांडवोद्भव-दत्तक-
प्रमुखाना चरित्राण्यवदत् सोऽहं वदाम्यहम्(?) ॥४॥
कुन्दपट्टे यथाग्रंथं जिनसेनोऽपि नामतः ।
सोर्थो ह्यरीरच्चन्मगलं श्रीमत्रप्रसगह(?) ॥५॥
गुणभद्रस्तदन्तेयः सोपि सार्थो हि टिप्पणं ।
ग्रंथं चक्रे महाकोच्चसुकोच्चफलपूरितं ॥६॥
तदन्वये मन्दबुद्धिर्जातोऽहं व्रीडपूरितः ।
तथाप्याम्नायं मुमोच न हि जैनपरम्परा ॥७॥
अर्हत्सिद्धाचार्योपाध्यायसुसर्वसाधूना ।
प्रथमाक्षरेण मिलितः प्रणवः सिद्धिमागमत् ॥८॥

अन्तभाग :—

शुभचन्द्रो मुनिरहं जिनदत्तस्य चाग्रहात् ।
ब्रह्मशीलस्य तस्यैवं पठनार्थं दिने कृतं ॥१२॥
गुरुणा मत्रदेशो(?) न कथितो मारदूषणात् ।
तथापि नाहं चक्रेशौ(?) वादात् श्रीधर्मणः कृतात् ॥१३॥
सौबौद्धस्त्वं ज्ञातासि त्वन्मते शक्तिरर्हतः ।
पाखडिमतविख्यातस्तवेति कथितस्तदा ॥१४॥

जिनदत्तस्य ज्ञानार्थं दिने चैके कृत मया।
ज्ञानिना वाचितोसौ च मा भू. सिद्धोस्यदूषण(?) ॥१४॥

× × × ×

इत्यंबिकाकल्पे चार्षे शुभचन्द्रप्रणीते सप्तमोऽधिकारः समाप्तः ॥७॥

नाम्नाधिकारः प्रथितोयं यंत्रसाधनकर्मणः।
समाप्त एषमंत्रोऽयं पूर्णं कुर्यात् शुभंवनः(?) ॥१॥

इत्यम्बिकाकल्पः। [जौहरी मनोहरलाल देहली प्रति

११७. तत्त्वार्थ-टिप्पण (भ० प्रभाचन्द्र)

आदिभाग :—

सो णवमि वीरणाहं वीरो धरवीरमाइसजुत्तो।
णामाइ पंच सहिओ कम्मचुओ मोक्खसंपत्तो ॥१॥
इहैव भारते क्षेत्रे आर्यवे(?)सुरसत्प्रिये।
हिरण्याख्ये (हरनाख्ये) जनपदे जिनतीर्थंममन्विते ॥२॥
सुनामाख्यं पुर तत्र विबुधैर्म्मंडितं वर।
जिनवेश्मनि संसीनो नयसेनार्य-सततौ ॥३॥
लतातसरयूथेन्द्र(?) हरिः क्रोधानलाष्टकः।
श्रीमद्भट्टारको हेमकीर्तिस्तत् शिष्यकः सुधी ॥४॥
धर्मचन्द्रो यतिपतिः जैना(काष्ठा)म्नायाभ्रभास्कर।
तत्पट्टे श्रीप्रभाचद्रः सर्वसघसमन्वितः ॥५॥
धर्म्माख्यानं च कुर्वन् सन् यावदास्ते दिगवर।
तावदुवाच काल्हूतुक(सुत ?) ह्यवासाधु प्रणम्य च ॥६॥
अध्यात्मरससंसिक्त मानस यस्य निर्मलं।
भो मुने सद्गुणावास तत्त्वार्थं कथय प्रभो ॥७॥
एतद्वचः समाकर्ण्य प्रोवाचेति कथं मया।
धीविंना कथ्यतत्त्वार्थ बहुभेदेन संयुत ॥८॥

तथापि कथ्यते साधो शृणुदत्तावधानतः ।
बुद्धया विनापि पूर्वार्थैः भाषित यज्जिनागमे ॥९॥
धर्माख्यन स कुरुते तावत्कतिपयैदिनैः ।
चलच्चित्तो मुनिर्यातो देशान्तरगमोद्यतः ॥१०॥
प्राप्तः पुरे सकीटाख्ये समानीतो जिनालये ।
लंबकन्चुकआम्नाये सकरू(तू) साधुनंदनः ॥११॥
पडितो सोनिको विद्वान् जिनपादाब्जषट्पदः ।
सम्यग्दृष्टी गुणावासो बुध-शीर्षशिरोमणिः ॥१२॥
प्रणम्य वचनं प्रोक्तं भो यते कामकेसरे ।
सरलं सप्ततत्त्वार्थं ममाग्रे कथय प्रभो ॥१३॥
तद्वचनाद्यतिपतिः प्रोवाच शृणु पंडित ।
कथयामि तवाग्रेऽहं तत्वार्थं यज्जिनोदितं ॥१४॥
पंचगुरुनमस्कारं कृत्वा तत्त्वार्थसूत्रसुगमार्थं ।
टि(सट्टि ?)प्पणं करोमि भव्यजन-प्रवोधनार्थाय ॥१५॥

(आगे 'मोक्षमार्गस्य नेतार' इत्यादि मंगलपद्यसे टिप्पणका आरम्भ है।)

अन्तभाग :—

द्वीपेऽथ जबूपपदे जबूवींरुहलक्षिते ।
भारत तत्र विख्यातं क्षेत्र षट्खंड[रा]जितं ॥४॥
तत्रार्यखंडविदितो जिनतीर्थैरलंकृत ।
पंचालस्तत्र विषयो जनसौख्यप्रदायकः ॥५॥
श्रीमत्काष्ठान्वये ख्यातः कामकुञ्जरकेशरी ।
भट्टारकः सुरेन्द्राद्यो हेमकीर्तिर्मुनीश्वरः ॥६॥
तत्पट्टे निर्मदः शान्त' मायावल्ली-धनंजयः ।
सर्वग्रन्थार्थविदुषो(?)धर्म्मचन्द्रो गुणाग्रणीः ॥७॥
तच्छिष्योऽखिलसद्गुणौघजलधिर्मिथ्यातमार्को मुनि-
स्त्यक्ताशेषपरिग्रहो हरिशते· पूज्याङ्घ्रि··· ···लालजः ।

तर्कव्याकरणादिशास्त्रसकलाम्भोराशिपारं गतो
भव्याभोरुहपूर्णतिग्मकिरणः श्रीमान् प्रभाचन्द्रकः ॥८॥
सर्वसंघसमोपेतः विहरन्नेकदा स वै ।
समायात' सकीटाख्ये नगरे वैरिदुर्जये ॥९॥
यस्मिन्नुपासका बहवः जिनधर्मपरायणाः ।
सत्पात्रदानवन्तश्च गुरुपादाब्जषट्पदाः ॥१०॥
· ·······गृहे तत्र ध्वजापट्टादिशोभित ।
नाभेयप्रतिबिम्ब यत्राभात्सुरनरार्हितं ॥११॥
तस्मिन् का ··· यन् ··· भिः प्रभाचन्द्रमुनीश्वरैः ।
स्वहृदि चिंतितं किंचित् क्रियते काव्यमुत्तमं ॥१२॥
एतत्सुगममस्माभिस्तत्त्वार्थसारटिप्पणं ।
शोधयतु बुधाः किंचिद्यदि शासन-दूषितं ॥१३॥
अस्मिन्संवत्सरे विक्रमादित्यनृपतेः गते ।
चतुर्दशशतेऽतीते नवासीत्यद(शीत्यब्द)संयुते(१४८९) ॥१४॥
भाद्रपदे शुक्लपक्षे पचमीवासरे शुभे ।
वारेऽर्के वैधृतियोगे विशाखाऋक्षके वरे ॥१५॥
तत्त्वार्थटिप्पणं भद्र प्रभाचन्द्रतपस्विना ।
कृतमिद प्रबोधाय जैताख्यब्रह्मचारिणे ॥१६॥
यावद्धरिहरी व्योम्नि यावद्धरि' सुरालये ।
तावद्धर्म्मरतः श्रीमज्जैनसंघोऽभिनंदतात् ॥१७॥

इति श्रीमद्भट्टारकधर्मचंद्रशिष्यगणिप्रभाचन्द्रविरचिते तत्वार्थ-टिप्पणिके ब्रह्मचारिजैता-साधुहावादेवनामाङ्किते दशमोऽध्यायः समाप्तः ।

यस्तुर्यदानपरिपोषित ·····························।
श्रीमत्प्रभाशशियतीश्वर-पादलीनः पुत्रान्वितो भुवि स नंदतु हावसाधुः ॥

इति [तत्त्वार्थ-] सूत्रटिप्पण समाप्तं ।

११८. गणितसार-संग्रह (महावीराचार्य)

आदिभाग :—

अलघ्य त्रिजगत्सार यस्याऽनतचतुष्टयं ।
नमस्तस्मै जिनेन्द्राय महावीराय तायिने ॥१॥
संख्याज्ञानप्रदीपेन जैनेन्द्रेण महत्विषा ।
प्रकाशितं जगत्सर्व्वं येन त प्रणमाम्यह ॥२॥
प्रीणितः प्राणिसस्यौघो निरीतिर्निरवग्रहः ।
श्रीमताऽमोघवर्षेण येन स्वेष्टहितैषिणा ॥३॥
पापरूपाः परा यस्य चित्तवृत्तिहविर्भुजि ।
भस्मसाद्भावमीयुस्तेऽवंध्यकोपो भवेत्ततः ॥४॥
वशीकुर्वन् जगत्सर्व्वं योऽयं नानुवशः परैः ।
नाऽभिभूतः प्रभुस्तस्मादपूर्व्वमकरध्वजः ॥५॥
यो विक्रमक्रमाक्रातचक्रिचक्रकृतक्रियः ।
चक्रिकाभजनो नाम्ना चक्रिकाभंजनोऽञ्जसा ॥६॥
यो विद्यानद्यधिष्ठानो मर्यादावज्रवेदिकः ।
रत्नगर्भो यथाख्यातचारित्रजलधिर्महान् ॥७॥
विध्वस्तैकातपक्षस्य स्याद्वादन्यायवादिनः ।
देवस्य नृपतुंगस्य वर्द्धता तस्य शासनं ॥८॥
लौकिके वैदिके चऽपि तथा मामायिके च यः ।
व्यापारस्तत्रसर्वत्र सख्यानमुपयुज्यते ॥९॥
कामतंत्रेऽर्थशास्त्रे च गाधर्वे नाटकेऽपि वा ।
सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ॥१०॥
छदोऽलकारकाव्येषु तर्कव्याकरणादिषु ।
कलागुणेषु सर्व्वेषु प्रस्तुतं गणित पुरा ॥११॥
सूर्यादिग्रहचारेषु ग्रहणे ग्रहसयुतौ ।

, त्रिप्रश्ने चन्द्रवृत्तौ च सर्व्वत्राऽङ्गीकृतं हि तत ॥१२॥
द्वीपसागरशैलाना संख्या-व्यासपरिक्षिपः ।
भवनव्यतरज्योतिर्लोककल्पाऽधिवासिना ॥१३॥
नारकाणा च सर्व्वेषा श्रेणीबद्धेन्द्रकोत्करा ।
प्रकीर्णकप्रमाणाद्या बुध्यते गणितेन ते ॥१४॥
प्राणिना तत्र सस्थानमायुरष्टगुणादयः ।
यात्राद्यास्संहिताद्याश्च सर्वे ते गणिताश्रयाः ॥१५॥
बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरं ।
यत्किंचिद्वस्तु तत्सर्वं गणितेन विना न हि ॥१६॥
तीर्थंकृद्भ्यः कृतार्थेभ्यः पूज्येभ्यो जगदीश्वरैः ।
तेषा शिष्यप्रशिष्येभ्यः प्रसिद्धाद्गुरुपर्वत' ॥१७॥
जलधेरिव रत्नानि पाषाणादिव काचन ।
शुक्तेर्मुक्ताफलानीव सख्याज्ञानमहोदधेः ॥१८॥
किंचिदुद्धृत्य तत्सारं वक्ष्येऽहं मतिशक्तितः ।
अल्पग्रंथमनल्पार्थं गणितं सारसंग्रहं ॥१९॥

इति सारसंग्रहे गणितशास्त्रे महावीराचार्यकृतौ संज्ञाधिकारः समाप्तः ॥

अन्तभाग :—

कथमितिचेत् एको(एका)द्येकोतरत्यगच्छेनागतधनमुत्तरेण गुणयित्वा गत' लब्धं त्रिभिर्भक्त्वा तस्मिनगच्छे एकमपनीय गुणयित्वा तस्मिन् लब्धे मेलयित्वागतलब्धे एकाद्येकोत्तर गच्छधन ॥छ॥ [बम्बई ऐ० प० स० भ० प्रति

[नोट—बम्बई सरस्वती भवनकी यह प्रति स० १५७५ वैशाख सुदि नवमी शुक्रवारकी लिखी हुई है और इसे मूलसघी बलात्कारगणके आचार्य ज्ञानकीर्तिके प्रशिष्य तथा रत्नकीर्तिके शिष्य यशःकीर्तिने स्वय अपने हाथसे लिखा है। प्रति प्रायः शुद्ध और सुन्दर है परन्तु जीर्ण है और अधूरी जान पड़ती है। अन्तमे समाप्तिसूचक संधि तथा मूलग्रन्थ-प्रशस्तिका कोई भाग नहीं है। ऊपरके अन्तिम भागके अनन्तर ही लेखकप्रशस्ति लगी हुई है।]

११६. पुराणसार (श्रीचन्द्र मुनि)

आदिभाग :—

नत्वादितः सकल[तीर्थ]कृतः कृतार्थान् सर्वोपकारनिरतास्त्रिविधेन नित्यम् ।
वक्ष्ये तदीयगुणगर्भमहापुराणं संक्षेपतोऽर्थनिकरं शृणुत प्रयत्नात् ॥१॥

अन्तभाग :—

धारायां पुरि भोजदेवनृपते राज्ये जयात्युच्चकैः(?)
श्रीमत्सागरसेनतो यतिपतेर्ज्ञात्वा पुराणं महत् ।
मुक्त्यर्थं भवभीतिभीतजगतां श्रीनन्दिशिष्यो बुधः
कुर्वे चारुपुराणसारममलं श्रीचन्द्रनामा मुनिः ॥१॥

श्रीविक्रमादित्यसंवत्सरे यशपृत्य(पंचाशीत्य ?)धिकवर्षसहस्रे (१०८५ ?)
पुराणसाराभिधानं समाप्त ।

१२०. शान्तिनाथ-पुराण (भ० श्रीभूषण)

आदिभाग :—

सिद्धं सिद्धार्थसंसिद्धिदायकं भुवनेश्वरं ।
वन्दे सर्वगुणोपेतं प्रारब्धार्थप्रसिद्धये ॥१॥

× × × ×

रामसेनादयो नम्याः स्तुयेऽहं ज्ञानकोविदाः ।
पंचमे ज्ञानना(निनो)ऽतुल्याः दुर्मतध्वान्तनाशकाः ॥२४॥
नेमिसेनमुनीन्द्राय नमो नित्यं गुणात्मने ।
धर्माधर्मप्रदेशाय वादिने निष्कलात्मने ॥२५॥
अकलंककलांकस्य न्यायमार्गविशारदं ।
वन्देऽहं दुर्मतध्वान्तनाशनं सूर्यसन्निभं ॥२६॥
वाक्यं समन्तभद्रस्य वंदेऽहं नित्यमंगदे ।
येन गुर्वीकृतं नित्यं हृदयाम्बुजवंदके ॥२७॥

स्तुवे माधवभट्टस्य वाक्यं सन्देहमर्दकं ।
येन जैनेन्द्रसिद्धान्तं दर्शितं भवतावनौ ॥२८॥
जीयाच्छ्रीजिनसेनश्च कविकोटिशिरामणिः ।
अरीरचन्महाशास्त्रं पुराणं हरिवंशकं ॥२९॥
जिनसेनो गुरुर्जीयात पुराणरचनं क्षमः ।
येन महापुराणाख्यमकरोद्विबुधामणीः ॥३०॥
येन श्रीधर्मसेनेनाजीजयन्मकरध्वजः ।
विमलादिसेनको तावद्बभूव क्षितिविश्रुतः ॥३१॥
मायंकोऽभूद्विशालश्चकीर्तिरुत्त[म]धारकः ।
तथा श्रीविश्वसेनश्च विश्वसेनो यथार्थवाक् ॥३२॥
विश्वसेनपदाम्भोजप्रोधनैकदिवाकरः ।
विद्याभूषणसूरीन्द्र(न्द्रो) जीयताज्जगतीतले ॥३३॥
श्रीवीरवदनोत्पन्ना नमामि शारदा वरा ।
अंगपूर्वादिसंभूता गणेन्द्रशतधारिताम् ॥३४॥
चरित्रं शांतिनाथस्य वक्ष्येऽहं भक्तितो वरं ।
चक्रिणः स्वात्मरूपस्य रम्य स्वल्पाऽमहानये ॥३५॥

अन्तभाग :—

काष्ठासंघावगच्छे विमलतरगुणे सारनदीतटांके ।
ख्याते विद्यागणे वै सकलबुधजनैः सेवनीये वरेण्ये ।
श्रीमच्छ्रीरामसेनान्वयतिलकसमा नेमिसेनाः सुरेन्द्राः ।
भूयासुस्ते मुनीन्द्रा व्रतनिकरयुता भूमिपैः पूज्यपादाः ॥४५६॥
श्रीधर्मसेनो यतिवृन्दसेव्यः विराजते भूवलये नितान्त ।
वैमल्यसेनोऽपि यथार्थनामा चारित्ररत्नाकर एव नित्यं ॥४५७॥
विशालकीर्तिश्च विशालकीर्तिर्जम्बूद्रुमाङ्के विमले सदैव ।
विभाति विद्यार्णव एव नित्यं वैराग्यपाथोनिधिशुद्धचेताः ॥४५८॥

श्रीविश्वसेनो यतिवृन्दमुख्यः विराजते वीतभयः सलीलः ।
स्वतर्कनिर्नाशितसर्वडिम्भो विख्यातकीर्तिर्जितमारमूर्तिः ॥४५६॥
तत्पट्टविद्यार्णवपारगता जीयात्सुशिष्या पृथुवृत्तवृत्तः ।
विद्याविभूषोऽपि यथार्थनामा विद्याविनोदेन च लब्धकीर्तिः ॥४६०
विद्याभूषणपट्टकंजतरणिः श्रीभूषणो भूषणो
जीयाज्जीवदयापरो गुणनिधिः संसेवितो सज्जनैः ।
काष्ठासघसरित्पतिशशधरो वादी विशालोपमः
सद्वृत्तोऽकंधरो(?)ऽतिसुन्दरतरो श्रीजैनमार्गानुगः ॥४६१॥
संवत्सरे षोडशनामधेये एकोनसत्षष्ठियुते (१६५६) वरेण्ये ।
श्रीमार्गशीर्षे रचितं मया हि शास्त्रं च रम्यं विमल विशुद्धं ॥४६२॥
त्रयोदशी सद्दिवसे विशुद्ध वारे गुरौ शान्तिजिनस्य रम्यं ।
पुराणमेतद्विमल विशाल जीयाच्चिरं पुण्यकरं नराणाम् ॥४६३॥युग्मं ।
श्रीगूर्जरेऽप्यस्ति पुरं प्रसिद्ध सौजीत्रनामाभिधमेव सारं ।
श्रीनेमिनाथस्य समीपमाशु चकार शास्त्रं जिनभूतिराम्य(?)॥४६६॥
अस्य शास्त्रस्य विज्ञेयाः श्लोकाः चतुःसहस्रकाः ।
पञ्चविंशतिसंयुक्ता(४०२५) विज्ञेया लेखकैः सदा ॥४६७॥
इति श्रीशान्तिनाथ-पुराणे भट्टारकश्रीश्रीभूषणविरचिते शान्तिनाथ-समवसरणधर्मोपदेशमोक्षगमनवर्णनो नाम षोडशः सर्गः समाप्तः ॥१६॥

[बम्बई ऐ० प० स० भ० प्रति

१२१. वृषभदेवपुराण (भ० चन्द्रकीर्ति)

आदिभाग :—

.... ।
.... ॥

अन्तभाग :—

श्रीकाष्ठसंघेऽजनि रामसेनो नांदीतटांके नरदेवपूज्यः ।
तदन्वये सयमभारधारि-श्रीविश्वसेनो मुनिपो बभूव ॥६०॥

वंदामि उसहसेण तिहुवण-जिय-बंधव सिवं संतं।
णाण-किरणावहासिय-सयल-इयर-तम-पणासिय दिट्ठं ॥२॥

अरहंतपदो (अरहंतो) भगवंतो सिद्धा सिद्धा पसिद्ध आइरिया।
साहू साहू य महं पसियंतु भडारया सव्वे ॥३॥

अज्जज्जणंदिसिस्सेणुज्जुव-कम्मस्स चंदसेणस्स।
तह णत्तुवेण पंचत्थूहण्णायभाणुणा मुणिणा ॥४॥

सिद्धंत-छंद-जोइस-वायरण-पमाण-सत्थ-णिवुणेण।
भट्टारएण टीका लिहिएसा वीरसेणेण ॥५॥

अट्ठ(ठ)तीसम्हि सासिय(सतसए) विक्कमरायंकिए सु-सगणामे।
वासेसु तेरसीए भाव(णु)विलग्गे धवल-पक्खे ॥६॥

जगतुंगदेव-रज्जे रियम्हि कुंभम्हि राहुणा कोणे।
सूरे तुलाए संते गुरुम्हि कुलविल्लए होंते ॥७॥

चावम्हि व(त)रणि-वुत्ते सिंघे सुक्कम्मि मीणे चंदम्मि*।
कत्तिय-मासे एसा टीका हु समाणिआ धवला ॥८॥

वोद्दणरायणरिंदे णरिंदचूडामणिम्हि भुंजंते।
सिद्धंतगंथमत्थिय गुरुप्पसाएण विगता सा ॥९॥

शब्दब्रह्मेति शाब्दैर्गणधरमुनिरित्येव राद्धान्तविद्भिः।
साक्षात्सर्वज्ञ एवेत्यवहितमतिभिस्सूक्ष्मवस्तुप्रणीतैः(वीणैः)
यो दृष्टो विश्वविद्यानिधिरिति जगति प्राप्तभट्टारकाख्यः।
स श्रीमान्वीरसेनो जयति परमतध्वान्तभित्तन्त्रकारः ॥१०॥

(इसके आगे ग्रन्थमें कनडी प्रशस्ति है।)

इति श्रीधवलप्रशस्तिः।

---

* आगे पृष्ठ १८७ के नोटमें उल्लेखित आराकी उस प्रशस्ति-प्रतिमें 'मीणे चंदम्मि' ही पाठ है 'नेमिचंदम्मि' जैसा अशुद्ध पाठ नहीं।

१२४. कषायप्राभृत-टीका = जयधवला
(आचार्य वीरसेन, जिनसेन)

आदिभाग :—

जयइ धवलंगतेएणाऊरिय-सयलभुवणभवणगणो ।
केवलणाणसरीरो अणंजणो णामओ चंदो ॥१॥
तित्थयरा चउवीस वि केवलणाणेण दिट्ठसव्वट्ठा ।
पसियंतु सिवसरूवा तिहुवणसिरसेहरा मज्झं ॥२॥
सो जयइ जस्स केवलणाणुज्जलदप्पणम्मि लोयालोयं ।
पुढ पदिबिंबं दीसइ वियसिय-सयवत्त-गब्भगउरो वीरो ॥३॥
अंगंगबज्झणिम्मी अणाइमज्झंतणिम्मलंगाए ।
सुयदेवय-अंबाए णमो सया चक्खुमइयाए ॥४॥
णमह गुणरयणभरियं सुअणाणामिय-जलोह-गहिरमपारं ।
गणहरदेवमहोवहिमणेय-णय-भंग-भंगि-तुंग-तरंगं ॥५॥
जेणिह कसायपाहुडमणेयणयमुज्जलं अणंतत्थं ।
गाहाहि विवरियं तं गुणहरभट्टारयं वंदे ॥६॥
गुणहर-वयण-विणिग्गय-गाहाणत्थोवहारिओ सव्वो ।
जेणज्जमंखुणा सो सणागहत्थी वरं देउ ॥७॥
जो अज्जमंखुसीसो अंतेवासी वि णागहत्थिस्स ।
सो वित्तिसुत्तकत्ता जइवसहो मे वरं देउ ॥८॥

अन्तभाग :—

एत्थ समप्पइ धवलिय तिहुवणभवणुप्पसिद्धमाहप्पा ।
पाहुडसुत्ताणमिमा जयधवला-सण्णिया टीका ॥१॥
सुअदेवयाए भत्ती सुदोवजोगो य भाविओ सम्मं ।
आहवइ णाणसिद्धिं णाण-फलं चावि णिव्वाणं ॥२॥

णाणेण झाणसिद्धी झाणादो सव्व-कम्म णिज्जरणं ।
णिज्जर-फलं च मोक्खो णाणब्भासं तदो कुज्जा ॥३॥
इय जाणिऊण सम्मं सुदणाणब्भासणम्मि मणो एगा ।
णिच्चोचिदा भवत्ती पणियड सा सव्वमणिरिगा ॥४॥
उज्जोइदा य सम्म उवसमिदा सोहिदा य णिद्धि गदत्था ।
णिव्वुदा य भवत्ती पणियड सुअदेवया सम्मं ॥५॥
इति श्रीवीरसेनीया टीका सूत्रार्थ-दर्शिनी ।
वाटग्रामपुरे श्रीमद्गूर्जरार्यानुपालिते ॥१॥
फाल्गुने मासि पूर्वाह्णे दशम्यां शुक्लपक्षके ।
प्रवर्धमान-पूजोरु-नन्दीश्वर-महोत्सवे ॥२॥
अमोघवर्षराजेन्द्र-प्राज्यराज्यगुणोदया ।
निष्ठिता प्रचयं यायादाकल्पान्तमनल्पिका ॥३॥
षष्टिरेव सहस्राणि(६००००)ग्रन्थानां परिमाणतः ।
श्लोकानुष्टुभेनात्र निर्दिष्टान्यनुपूर्वशः ॥४॥
विभक्तिः प्रथमस्कन्धो द्वितीयः संक्रमोदयौ ।
उपयोगश्च शेषास्तु तृतीयस्कन्ध इष्यते ॥५॥
एकान्नषष्टिसमधिक-सप्तशताब्देषु(७५९) शकनरेन्द्रस्य ।
समतीतेषु समाप्ता जयधवला प्राभृत-व्याख्या ॥६॥
गुर्जरनरेन्द्रकीर्तेरन्तःपतिता शशांकशुभ्रायाः ।
गुप्तैव गुप्तनृपतेः शकस्य मशकायते कीर्तिः ॥७॥
गुर्जरयशः पयोऽब्धौ निमज्जतीन्दौ विलक्षण लक्ष्म ।
कृतमलि-मलिनं मन्ये धात्रा हरिणापदेशेन ॥८॥
भरत-सगरादि-नरपति-यशांसि तारानिभेन संहृत्य ।
गुर्जरयशसो महतः कृतोऽवकाशो जगत्सृजा नून ॥९॥
इत्यादिसकलनृपतीनतिशय्यपयःपयोधि-फेनेत्था ।
गुर्जरनरेन्द्रकीर्तिः स्थेयादाचन्द्रतारमिह भुवने ॥१०॥

जयत्यजय्यमाहात्म्यं विशासित-कुशासनं ।
शासनं जैनमुद्भासि मुक्तिलक्ष्म्यैक-शासनं ॥११॥
भूयादावीरसेनस्य वीरसेनस्य शासनं ।
शासनं वीरसेनस्य वीरसेनकुशेशयं ॥१२॥
आसीदासीददासन्न-भव्यसत्त्व-कुमुद्वतीम् ।
मुद्वतीं कर्तुमीशो यः शशाङ्क इव पुष्कलः ॥१३॥
श्रीवीरसेन इत्यात्त-भट्टारक-पृथुप्रथः ।
पारदृश्वाधिविश्वाना साक्षादिव स केवली ॥१४॥
प्रीणित-प्राणि-संपत्तिराक्रान्ताऽशेषगोचरा ।
भारती भारतीवाज्ञा षट्खण्डे यस्य नाऽस्खलत् ॥१५॥
यस्य नैसर्गिकीं प्रज्ञा दृष्ट्वा सर्वार्थगामिनीम् ।
जाताः सर्वज्ञसद्भावे निरारेका मनीषिणः ॥१६॥
य प्राहुः प्रस्फुरद्बोध-दीधिति-प्रसरोदयम् ।
श्रुतकेवलिनं प्राज्ञाः प्रज्ञाश्रमणसत्तमम् ॥१७॥
प्रसिद्ध-सिद्ध-सिद्धान्त-वार्धिवार्धौत-शुद्धधीः ।
सार्द्धं प्रत्येकबुद्धैर्यः स्पर्धते धीद्धबुद्धिभिः ॥१८॥
पुस्तकाना चिरन्ताना गुरुत्वमिह कुर्वता ।
येनातिशयिताः पूर्वे सर्वे पुस्तक-शिष्यकाः ॥१९॥
यस्तपोदीप्तकिरणैर्भव्याम्भोजानि बोधयन् ।
व्यद्योतिष्ट मुनीनेनः पञ्चस्तूपान्वयाम्बरे ॥२०॥
प्रशिष्यश्चन्द्रसेनस्य यः शिष्योऽप्यार्यनन्दिनाम् ।
कुलं गणं च सन्तानं स्वगुणैरुदजिज्वलत् ॥२१॥
तस्य शिष्योऽभवच्छ्रीमान् जिनसेनः समिद्धधीः ।
अविद्धावपि यत्कर्णौ विद्धौ ज्ञान-शलाकया ॥२२॥
यस्मिन्नासन्नभव्यत्वान्मुक्तिलक्ष्मीः समुत्सुका ।
स्वयंवरीतुकामेव श्रौतिं मालामयूयुजत् ॥२३॥

येनानुशिष्टा(त) भाग्याद् ग्रन्थागमप्रतिष्ठितम् ।
स्वसमयपरविधानेन निगृहीता सरस्वती ॥२४॥
यो नातिसुन्दराकारो न चातिचतुरो मुनिः ।
तथाप्यनन्यशरणा यं सरस्वत्युपाचरत् ॥२५॥
धीः शमो विनयश्चेति यस्य नैसर्गिकाः गुणाः ।
सूरीनाराधयन्ति स्म गुणैराराध्यते न कः ॥२६॥
यः कृशोऽपि शरीरेण न कृशोऽभूत्तपोगुणैः ।
न कृशत्वं हि शारीरं गुणैरेव कृशः कृशः ॥२७॥
ये (यो) नाग्रहीत्कापिलिकां नाप्यचिन्तयदञ्जसा ।
तथाऽप्यध्यात्मविद्याब्धेः परं पारमशिश्रियत ॥२८॥
ज्ञानाराधनया यस्य गतः कालो निरन्तरम् ।
ततो ज्ञानमयं पिण्डं यमाहुस्तत्त्वदर्शिनः ॥२९॥
तेनेदमनतिप्रौढ-मतिना गुरुशासनात् ।
लिखितं विशदैरेभिरक्षरैः पुण्यशासनम् ॥३०॥
गुरुणार्धेऽग्रिमे भूरिवक्तव्ये सम्प्रकाशिते ।
तन्निरीक्ष्याल्प-वक्तव्यः पश्चार्धस्तेन पूरितः ॥३१॥
प्रायः प्राकृतभारत्या क्वचित्संस्कृतमिश्रया ।
मणि-प्रवाल-न्यायेन प्रोक्तोऽयं ग्रन्थविस्तरः ॥३२॥
ग्रन्थच्छायेति यत्किञ्चिदत्युक्तमिह पद्धतौ ।
तत्तु मत्वैव तत्कृत्या दोषं सुधीर्न पश्यति ॥३३॥
गाथासूत्राणि सूत्राणि चूर्णिसूत्रं तु वार्तिकम् ।
टीका श्रीवीरसेनीया शेषाः पद्धतिपंजिकाः ॥३४॥
ते सूत्रसूत्र-तद्वृत्ति-विवृती वृत्ति-पद्धती ।
कृत्स्नाकृत्स्नश्रुतव्याख्ये ते टीकापंजिके स्मृते ॥३५॥
अत्युक्तं किमिहास्त्यनुक्तमथवा किं वा दुरुक्तादिकं
सर्वज्ञोदित सूनृत-प्रवचने प्रस्पष्टमृष्टाक्षरे ।

तत्सूत्रार्थ-विवेचने कतिपयैरेवाक्षरैर्मादृशा-
मुक्तानुक्तदुरुक्तचिन्तनपरा टीकेति कः सभवः ॥३६॥
तत्पूर्वापरशोधनेन शनकैर्यन्मादृशा टीकन
सा टीकेत्यनुगृह्यता बुधजनैरेषा हि नः पद्धतिः ।
यत्किञ्चिच्च दुरुक्तमत्ररचितं छाद्मस्थ्य-दोषोदयात्
तत्सर्वं परिशोध्यमागमधनैर्ग्राह्यं च यन्निस्तुषं ॥३७॥
श्रीवीरप्रभु-भाषितार्थघटना निर्लोडितान्यगम-
न्यायाच्छ्रीजिनसेन-सन्मुनिवरैरादर्शितार्थस्थितिः ।
टीका श्रीजयचिह्नतोरुधवला सूत्रार्थसद्योतिनी
स्थेयादारविचन्द्रमुज्ज्वलतप'श्रीपालसंपादिता ॥३८॥
सर्वज्ञप्रतिपादितार्थगणभृत्सूत्रानुटीकामिमा
येऽभ्यस्यंति बहुश्रुताः श्रुतगुरु संपूज्य वीरप्रभुं ।
ते नित्योज्वलपद्मसेनपरमा. श्रीदेवसेनार्चिताः
भासन्ते रविचन्द्रभासिसुतपाः श्रीपालसत्कीर्तय. ॥३९॥

इति श्रीजयधवलप्रशस्तिः

[नोट—धवला और जयधवला टीकाओंकी ये दोनों प्रशस्तिया तात्या-नेमिनाथजी पागल वार्सीने मूडबिद्रीमे गुरुवस्ति-स्थित श्रीसिद्धान्तशास्त्रों-परसे ता० ३० अगस्त सन् १९१२ को दिनके १०॥ बजेसे १२॥ बजे तकके समयके भीतर उतारकर जैनसिद्धान्तभवन आराको भेजी थीं। उसी प्रशस्ति-प्रतिपरसे अक्तूबर सन् १९२० में, इन्हें उद्धृत किया गया था। बादको सिद्धान्त शास्त्रोके इधर आजानेपर सहारनपुर तथा आराकी ग्रन्थ-प्रतियों और मुद्रित प्रतिकी प्रस्तावना परसे इनका सशोधन किया गया है।]

१२५. आराधना-पताका (वीरभद्राचार्य)

आदिभाग :—

नियं-सुचरियगुण-माहप्पदिप्प-सुरराय-रिद्धि-वित्थारो ।
जयइ सुरराय-पूइय-गुण-माहप्पो महावीरो ॥१॥

अन्तभाग :—

इय सुदराइं वीरभद्दभणियाइं पवयणाहितो।
चिरमुच्चिणि सुए एसा रइया आराहणापडिया ॥८५॥
वण्णाणमाणुपुव्वी गाहद्धपयाण पाययाण च।
कत्थइ कहिंचि रइया पुव्वपसिद्धाण समईए ॥८६॥
आराहणापसत्थमि एत्थ सत्थमि गंध(थ)परिमाण।
नउयाइ नवसयाइं (९९०)अत्था गाहमि गाहाणं ॥८७॥
विक्कमनिवकालाओ अट्ठुत्तरिमे समासहस्समि (१००८)।
एसा सव्व गिहिआ गहिया गाहाहिं सरलाहिं ॥८८॥
मोहेण मदमइणा इममि जमणागमं मए लिहिय।
त महरिणो मरिसिंतु अहवा सोहिंतु करणाए ॥८९॥
भवगहणभमणरीणा लहति निव्वुइसुह जमल्लीणा।
त कप्पद्दुमसुहयं नदउ जिणसासणं सुइरं ॥९०॥
[इति] आराधनापताका कृतिरियं श्रीवीरभद्राचार्यस्य ॥छ॥

१२६. रिष्ट-समुच्चय-शास्त्र (दुर्गदेव)

आदिभाग :—

पणमत-सुराऽसुर-मउलि-रयण-वर-किरण-कति-वित्थुरिअं।
वीर-जिण-पाय-जुअल णमिऊण भणेमि रिट्ठाइं ॥१॥

अन्तभाग :—

जयउ जियमाणो सजमदेवो मुणीसरो इत्थ।
तह विहु सजमसेणो माहवचदो गुरू तह य ॥२५४॥
रइयं वहु सत्थत्थ उवजीवित्ता हु दुग्गदेवेण।
रिट्ठसमुच्चयसत्थ वयणेण [सजमाइ]देवस्स ॥२५५॥
जं इह किपि वि रि(टि)ट्ठं अयाणमाणेण अहव गव्वेण।
त रिट्ठ-सत्थ-णिउणा सोहेवि महीइ पयडतु ॥२५६॥

जो छद्दंसण-तक्क-तक्किय इमं पंचंग-सद्दागमे
जोगी सेसमहीसनीतिकुसलो वाइब्भकंठीरवो।
जो सिद्धंतमपारती(णी)रसुणिही तीरे वि पारंगओ
सो देवो सिरिसजमाइमुणिवो आसी इह भूतले ॥२५७॥
संजाओ इह तस्स चारुचरिओ णाणंबुधोयं मई
सीसो देसजई सव्वोहणपरो णीसेस-बुद्धागमो।
णामेणं सिरिदुग्गदेव-विइओ वागीसरा यन्नओ
तेणेदं रइयं विसुद्धमइणा सत्थ महत्थ फुडं ॥२५८॥
जा धम्मो जिणदिट्ठणिच्चयपवे(हे) वट्टति जावज्जई
जा मेरू सुरपायवेहिं सरिसो जाव महीसा मही।
जा णायं च सुरा णभोत्ति पहुगा चदक्कतारागणं
तावेत्थो महीफलमि विदिट्ठं (?)दुग्गस्स सत्थं जसो ॥२५९॥

संवच्छरइगसहसे बोलीणे णवयसीइ-सजुत्ते (१०८९)।
सावण-सुक्के यारसि दियहम्मि मूलरिक्खम्मि ॥२६०॥
सिरिकुंभणयरणए(?) लच्छिणिवास-णिवइ-रज्जम्मि।
सिरिसंतिणाहभवणे मुणिभवियस्स उभे रम्मे(?) ॥२६१॥

इति रिट्ठसमुच्चयसत्थं सम्मत्तं।

१२७. अर्घकाण्ड (दुर्गदेव)

आदिभाग :—

णमिऊण वड्ढमाणं संजमदेवं णरिंद-थुय-चलणं।
वोच्छामि अग्घकंडं भवियाण हिय पयत्तेणं ॥१॥
वर-गुरु-परंपराए कमागय एत्थ सयल-सत्थत्थ।
दट्ठूण मणुयलोए णिदिट्ठं दुग्गदेवेण ॥२॥

अन्तभाग :—

आसी एत्थ महीयले सुविदिदो सत्थत्थ-पार-गओ।
णामेणं सिरि-संजमाइ-विबुहो वाइब्भगवीयरो ॥१४३॥

(इसके बाद 'अणुवदगुरुबालेंदू' से लेकर 'णय-णिक्खेव-पमाण' तक ५ गाथाएं वे ही हैं जो परमागमसारकी प्रशस्तिमें पृ० १६१ पर दर्ज हैं।)

णाद-णिखिलत्थ-सत्थो सयल-णरिंदेहिं पूजिओ विमलो।
जिण-मग्ग-गमण-सूरो जयउ चिर चारुकित्तिमुणी ॥१२२॥
वर-सारत्तय-णिउणो सुद्धं परओ विरहिय-परभाओ(वो)।
भवियाण पडिबोहणपरो पहाचंदणाममुणी ॥१२३॥

[नोट—आराके जैनसिद्धान्त-भवनकी ताड़पत्रीय प्रतिमें ११६ वीं गाथाके बाद 'इतिभावसंग्रहः समाप्तः' लिखकर अन्तकी ये ७ गाथाएं प्रशस्तिरूपसे दी हैं, जब कि मा० ग्र० मा० के 'भावसंग्रहादि' ग्रन्थमें 'भावत्रिभंगी'के नामसे संग्रहीत इस ग्रन्थमें वे नहीं पाई जातीं।]

१३०. आयज्ञानतिलकसटीक (भट्ट वोसरि)

आदिभाग :—

नमिऊण नमियनमियं दुत्तरसंसारसायरुत्तिन्नं।
सव्वन्न वीरजिण पुलिंदिणिं सिद्धसघं च ॥१॥
जं दामनन्दिगुरुणो मणयं आयाण जाणि [यं] गुज्झं।
त आयनाणतिलए वोसरिणा भन्नए पयडं ॥२॥ (मूल)

सिद्धान्ध्वजादिचिरसूत्रितनामधेयान् सर्वाङ्गसौहृदशुभस्थितिसौम्यपातान्।
स्वस्वामिसद्ग्रहयुतेक्षित-फुल्लपूर्णानायान्प्रणम्य वलिनः शुभकार्यसिद्ध्यै ॥१
शर्वाय शास्त्रसारेण यत्कृतं जनमङ्गम्।
तदायज्ञानतिलकं स्वयं विव्रियते मया ॥२॥ (स्वो० टीका)

अन्तभाग :—

विमलविहूसियदेहो जो नग्गाइ(?)माणुसो थुइ पढइ।
स पुलिंदिणि घाणइ सया आयाण तस्स तन्नाणं ॥५॥ × × ×

इति श्रीदिगम्बराचार्य-पंडितश्रीदामनंदि-शिष्य-भट्टवोसरि-विरचिते सायश्रीटीकायज्ञानतिलके चक्रपूजाप्रकरण समाप्तं ॥२५॥

---

१३१. अध्यात्मतरङ्गिणी-टीका (गणधरकीर्ति)

आदिभागः—

शुद्धध्यानकृशानुधूमनिवहः स्वासैर्भृशं कुंचितो
मौलौ नीलविलोलमूर्ध्वजजटाव्याजेन येषां बभौ ।
ज्ञानानन्ददृगात्मकामरकतस्त्रर्णेदुसद्भिद्रुमा—
नीलांभोदनिभा भवन्तु सुजिनास्ते स्वात्मलम्भाय नः ॥१॥

विचित्रोरुदेहद्युतिद्योतिताशा नरेन्द्रोद्धकोटीररत्नप्रभाभा—
रभूयिष्ट पाथः प्रधौतांङ्घ्रियुग्मा जिना. संददन्तां फलं वांछित नः ॥२॥

अरूपारसासीमविज्ञानदेहाऽशरीराः परानन्तवीर्यावगाहा—
तिसूक्ष्मामलानन्तसौख्या विबाधा. प्रसिद्धाः सुसिद्धा प्रयच्छन्तु शं न. ॥३॥

मनोज्ञार्थचिन्तामणिश्रीनिवासं पवित्रं चरित्रं समं ये दृगाद्यम् ।
स्वयं सञ्चरन्तेऽन्यमाचारयन्ते भवन्त्विष्टिदाः सूरयः सर्वदा नः ॥४॥

अनेकान्ततत्त्वांबुजोद्भाससूर्याः सदैकान्तमिथ्यातमोध्वंसवर्या. ।
पराध्यापकाः पाठकान् पाठयन्तः प्रबोधं दधन्तां शुभं शाश्वतं नः ॥५॥

त्रिदण्डप्रमुक्ता. सुयोगोपयुक्ताः प्रमादोज्झिताः सिद्धशुद्धोपयोगाः ।
सुश्रृङ्गारयोनीनस्वर्भानुभावाः सदा साधवः संतु ते सिद्धिदा नः ॥६॥

अघौघ-संघट्टितविघ्न-संघ-विघातका मारमहेभसिंहा. ।
भवन्तु पञ्चापि जिनेश्वराद्या. सुशाश्वतं वैबुधसम्प्रधार्ये ॥७॥

सल्लक्षणोज्ज्वलतनुर्वरतर्कबाहु. स्याद्वादपीवरपयोधरभारभुग्ना ।
मुक्तात्मवृत्तसदलंकृतिहारभूषा वाग्देवता मम तनोतु मनीषितानि ॥८॥

गुणिगणधरकीर्ति सोमसेनोपरोधा—
दकृत निकृतिदोषांध्वान्तविध्वंसकर्त्रीम् ।
दिनमणिरुचिभावां भासितार्था सुटीका,
श्रुतममृततरङ्गिण्याख्ययाध्यात्मपूर्वाम् ॥९॥

कुन्देन्दुकांतिहरहासविलासशुभ्रं, कांतं यश. प्रतिविधातुमनल्पकल्पम् ।
कर्म्मै. स्वैररवितथार्थविचारसारा, माघान्मया विरचिता शिवसौख्यदेयम् ॥१०॥

मात्सर्यमुत्सृज्य विचार्य चार्य्या सत्तत्वसंदेशनजं गुणौघम् ।
आख्यागुणज्ञैर्गुणकसदर्घ सन्मोक्षमार्गाधिगमाय टीका ॥११

जिनं प्रणम्य प्रणतं सुरेशैः कृते कृतार्थै मुनिसोमदेवैः ।
मया स्वभक्त्या क्रियते विचित्रं निबंधनं ध्यानविधौ सुबोधम् ॥१२॥

निखिलसुरासुरसेवावसरमायातसुरम्यबोधनावधारितधर्मावसरण (णां) अमरोरगनरेन्द्रश्रीकल्पानोकहारामोल्लासामृताम्भोधरायमाण (णां) महापरमपञ्चकल्याणकोकनदकाननोत्पत्तिसार (रं) भवाम्भोधिसमुत्तरणैकसेतुबन्ध सम्यक्त्वरत्नं गीर्व्वाणगणा [न] नुग्राहयता, अष्टादशसागरोपमकोटीकोटीं वा यावन्नष्टत्वाद्दयादमत्यागादिस्वभावस्य धर्मस्य भरते धर्मकर्माणि प्रवर्तयन् [तु]भगवानिति जाताकूतपरिपाकेन समाधि(वि) र्भविष्यदासन्नमृत्युं वैराग्ययोग्या(गा)य नीलंयसा प्रहितां गीर्व्वाणेश्वरेण, तां च शृङ्गारादिरसाभिनयदक्षा हाव-भाव-विभ्रमविलासवतीं शान्तरसानन्तरमेव नश्वरस्वभावा विभाव्यात्यनोऽनश्वरस्वभावतां चिकीर्षुरादिदेव इत्थं योगमुद्रा मुन्मुद्रितवानित्याह—

अन्तभाग :—

श्रीसोमदेवमुनिनोदितयोगमार्गो व्याख्यात एव हि मया स्वमतेर्बलेन ।
संशोध्य शुद्धधिषणैर्हृदये निधेयो योगीश्वरोत्वमचिराय समाप्तुकामैः ॥१॥

[श्री] सोमसेनप्रतिबोधनार्थं धर्माभिधानोच्चयश.स्थिरार्था. ।
गूढार्थसंदेहहरा प्रशस्ता टीका कृताऽध्यात्मतरङ्गिणीयम् ॥२॥

जिनेशसिद्धा. शिवभावभावा सुसूरयो देशकसाधुनाथाः ।
अनाथनाथा मथितोरुदोषा भवंतु ते शाश्वतशर्म्मदा नः ॥३॥

चंचत्चंद्रमरीचिवीचिरुचिरे यच्चारुरोचिश्चये,
नम्राङ्गैः सुरनायकै सुररुचे देवाब्धिमध्यैरिव ।
शुक्लध्यानसितासिशासितमहाकर्मारिकक्षोदयो—
देयात्तेऽभव संभवां शुभतमां चंद्रप्रभः संपदम् ॥४॥

त्रिदशवसतितुल्यो गुर्जरात्राभिधानो धनकनकसमृद्धो देशनाथोऽस्ति देशः।
असुरनरसुरामाशोभिभोगाभिरामो परदिगवनिनारीवक्त्रभाले ललामः ॥५॥

शश्वच्छ्रीशुभतुङ्गदेववसतिः संपूर्णपण्यापणा—
शौण्डीयोद्भटवीरधीरचितता श्रीमान्यखेटोपमा।
चंचत्कांचनकुम्भकर्णविसरैर्जैनालयैर्भ्राजिता,
लंका वास्ति विलासशालनिलयामंदोदरीशोभिता ॥६॥

वरवटवटपल्ली तत्र विख्यातनामा वरविबुधसुधामा देववासोरुधामा।
शुभसुरभिसुरम्भादेवरम्भाभिरामा सुरवसतिरिवोच्चैरप्सरोभासमाना ॥७॥

स्फूर्जद्बोधगणेभवद्यतिपतिर्वाचंयमः संयमी,
जज्ञे जन्मवतां सुपोतममलं यो जन्मयादोविभोः।
जन्यो यो विजयी मनोजनृपते र्जिष्णोर्जगज्जन्मिनाम्,
श्रीमत्सागरनंदिनामविदितः सिद्धांतवार्धेर्विधुः ॥८॥

स्याद्वादसात्मकतपोवनिताललामो भव्यातिसस्यपरिवर्द्धननीरदाभः।
कामोरुभूरुहविकर्तनसंकुठारस्तस्माद्धिलोभहननोऽजनि स्वर्णनन्दी ॥९॥

तस्माद् गौतममार्गगो गुणगुणैर्गम्यो गुणिग्रामणी—
र्गीतार्थो गुरुसंगनागगरुडो गीर्वाणगीर्गोचरः।
गुप्तिग्रामसमग्रतापरिगतः प्रोग्रग्रहोद्गारको,
ग्रन्थग्रंथिविभेदको गुरुग्रामः श्रीपद्मनन्दी मुनिः ॥१०॥

आचार्योचितचातुरीचयचितश्चारित्र चञ्चुः शुचि—
श्चार्वीसंचयचित्रचित्ररचनासंचेतनेनोच्चकैः।
चित्तानन्दचमत्कृतिप्रविचरन्प्राज्ञप्रचेतोमतां,
प्राभूच्चारुविचारणैकनिपुणः श्रीपुष्पदन्तस्ततः ॥११॥

समभवदिहचातश्चन्द्रवत्कायकान्तिस्तदनुविहितबोधो भव्यसत्कैरवाणाम्।
मुनिकुवलयचन्द्रः कौशिकानन्दकारी,निहिततिमिरराशिश्चारुचारित्ररोचिः॥१२

तस्मात्तीव्रमहातपस्तपनकृत्तेजः प्रतप्तान्तरम्।
कर्म्मोत्तुङ्गताडगतारलहरीतोयं तरां शोषितम्।

रत्यामाचरणे शुचौ रतिपतिर्येनोत्पतंगी कृतः ।
कीर्त्या शारदनीरदेन्दुसितया श्वेतीकृताशामुख. ॥१३॥
भवभयपरिभावी भव्यराजीववन्धु—
र्मतमितहितवादी बुद्धिवादावनन्दी ।
गुणिगणधरकीर्ति· कोविदानन्दहेतु. ।
समजनि जनपूज्यो वन्दिवृन्दाभिवंद्य. ॥१४॥
आसन्नभव्यशुभसस्यविभूतिकर्त्रीं सारार्थदेशनपरां चिरमेघमालाम् ।
सार्द्रान्तरः ससमयो निखिलाशपूरस्तस्तार यद्वदिह तद्वदिमां सुटीकाम् ॥१५॥
तथ्यात्माद्यर्थसम्वादाध्यात्मामृततरङ्गिणीम् ।
सोमदेवध्यानविधौ गणधरकीर्तिर्व्यधात् ॥१६॥
एकादशशताकीर्णे नवासीत्युत्तरे परे ।
सम्वत्सरे शुभे योगे पुष्यनक्षत्रसंज्ञके ॥१७॥
चैत्रमासे सिते पक्षेऽथ पञ्चम्यां रवौ दिने ।
सिद्धा सिद्धिप्रदा टीका गणभृत्कीर्तिविपश्चित. ॥१८॥
निस्त्रिंशतर्जितारातिविजयश्रीविराजनि ।
जयसिंहदेवसौराज्ये सज्जनानन्ददायिनि ॥१९॥
यावज्जैनं शासनं शासनानां, जीवादीनां स्यादनेकात्मकानाम् ।
यावद्द्यौर्गोगोपतिर्यावदाशा· स्थेयाट्टीका तावदेषा जगत्याम् ॥२०॥

१३२. चन्द्रप्रभपुराण (पं० शिवाभिराम)

आदिभाग .—

श्रीमते परमज्ञान-साम्राज्य-पदभागिने ।
नमोऽर्हते महाभर्त्रेऽनंतसंसृतिभीमुषे ॥१॥
अनादिनिधनानन्तज्ञानानंदैकमूर्तये ।
जगता स्वामिने कर्त्रे नमो तं कुलकृत्तुजे ॥२॥
तमीशं स्वामिनं वन्दे सुरतारागणावृतं ।
स्ववाक्किरणसन्दोह-सुनन्दित-जगत्त्रयम् ॥३॥

अनेकान्तमतिः कुर्यादनन्यगुणगौरवः (वं)।
सिद्ध्यर्थदायिनी शांतिरसावतुलविक्रमी ॥४॥
सोऽस्तु श्रीमन्महावीरः सतां सिद्धौ जगत्त्रये।
यन्नामश्रुतिमात्रेण भजन्ति भविनः सुखम् ॥५॥
त्रिश्रीसमन्वितान् शेषान् पुराणार्थ-प्रकाशकान्।
जिनाधिपानहं नौमि तत्सुखाप्त्यै सुखाकरान् ॥६॥
जिनेन्द्रवक्त्रजां वन्दे सप्तभंगांगवादिनीम्।
केवलज्ञान-जननीं तु स्तुत्यां सम्यक्सरस्वतीम् ॥७॥
योग्यतां यांति यास्यन्ति सत्पदं पुरुषोत्तमा.।
यामाराध्य समाराध्यामाराध्यैस्तां स्तुवेऽनघाम् ॥८॥
रत्नत्रयधरान्वन्दे वाह्याभ्यन्तरभेदतः।
सर्वसंगविनिर्मुक्तान् गुरून्सद्गुणगौरवान् ॥९॥
विष्ण्वादिभद्रवाह्वन्तानां पादस्मरणं सदा।
करोमि सिद्धये कृत्स्नश्रुतकेवलिनामहं ॥१०॥
श्रीमत्समन्तभद्रस्य जयन्ति वचनान्यलं।
यत्समुद्योतिते मार्गे न स्खलन्ति महाधियः ॥११॥
अकलंकगुरुः केन भुवने न प्रणम्यते।
यद्वाक्शरैश्च बौद्धानां बुद्धिर्वैधव्यतां गता ॥१२॥
पुराणसंततिर्यस्य स्वगते प्रस्फुटं गता।
स्मरामि जिनसेनस्यांघ्री यौ भक्तिः प्रवंदितौ ॥१३॥
पद्मनन्द्यादयः सर्वे पूज्ये ज्याः सत्सूरयः सुरैः।
संस्तुतास्ते दिशंत्वत्र मतिंसर्वार्थभासिनीम् ॥१४॥
स्वसिद्ध्यर्थं नमस्कृत्य देव-श्रुत-मुनीश्वरान्।
वच्मि चन्द्रप्रभस्येदं पुराणं च पुलाकत ॥१५॥
गुणभद्रादिभिर्पूज्यैर्भदन्तैर्यन्निरूपितम्।
तत्करोमि विशङ्कोऽहं तत्पादाम्बुजसेवनात् ॥१६॥

अन्तभाग :—

श्रीमत्कुम्भमहाविशुद्धनगरे जैनास्पदैर्चामितं,
शुद्धश्रीद्धमहाजनप्रभृतिभिर्न्नित्य च मद्भावत. ।
तारासिंह इतिप्रभून्नृपशिरोरत्नप्रभाचुम्बित–
पादाम्भोज-मनोहर-द्यु तिवर. शत्रूत्तमागैर्न्नत. ॥५१॥

श्रीमद्बृहद्गौर्जरवंशभूपणः प्रतापसंतापित-शत्रुशासन ।
ताराहरिः चत्रियवृत्तिचन्द्रमा विशुद्धमार्गाधिपतिर्ज्जयत्यसौ ॥५२॥
तत्सत्पदाम्बुजविभूपणमित्रमूर्तिविऽद्वेपमेकपरिशोपणमित्रमूर्ति ।
अन्यायमार्गकुमुद्यु ति-मित्रमूर्ति. पुत्रो बभूव बलवान् रणमल्ल एप ॥५०॥
दिल्ली-नृपेशाधिपति-प्रमान्य. शौर्य्यादिभिः ख्यातगुणैर्गरीयान् ।
पट्टे तदीये जिनशुद्धमार्गी सामन्तसिंहो नृपराजराज. ॥५४॥
दिगम्बराचार्यगुरोः प्रसादान्मलचयाप्ताप्तजिनेन्द्रधर्म. ।
अपारभट्टावलि-वंदित. सत्सामन्तसिंहः नृपति. सुजीयात् ॥५५॥
तत्पट्ट-पौरुप-महोदय-पद्मसिंहो विद्वेषपद्मनिकरोदयपद्मसिंह. ।
तत्सूनुरद्भु त महोदयपद्मसिंहो जातः समुन्नतमतिद्यु तिपद्मसिंह. ॥५६॥
शिवानतानन्दमनोहरांग. शिवाभिरामैरनुशासितात्मा ।
शिखाभिरामद्यु तिवारिवाह. शिवाभिरामो द्वितियाभिधान. ॥५७॥

अभुक्तभोगद्यु तिराजराजो गृहस्थितब्रह्मपदाधिराज. ।
विद्याविनो [दो] घमराजिराज. कालं स निन्ये जिनराजभक्त्या ॥५८॥

वीणेति शीलादिगुणोज्वलागा निर्वाणवंशोदधि-पद्मजाभूत् ।
अर्हत्पदद्वन्दगताशया या सा वामला पद्महरे पतीद्धा ॥५६॥

तस्योपदेशाग्रहतो मयेदं चरित्रमुक्तं जिनचन्द्रराज्ञ. ।
शिवाभिरामेण विशुद्धसिद्धयै नवाभिमानेन कवित्वयुक्तैः ॥६०॥

यावच्च[सच्च,]न्द्र -दिवाकरौ द्वौ यावत्सुराद्रिश्च जिनवृष(व्रत)श्च,
भ(या)वत्सता वृत्तिरतिप्रशस्ता तावत्समानन्दतु एष ग्रन्थ. ॥६१॥

क्षुत्तृड्रोगमलादिदोषविमुखाः श्रीमज्जिनेन्द्राधिपाः,
सम्यक्त्वादि-गुणाष्टकैरनुपमाः सिद्धा विशुद्धाः सदा।
पंचाचार-परायणादि-सुगुणख्याताश्च सत्साधवो,
हिंसाभाव-विकार-वर्जित-नृपाः कुर्वन्तु वो मंगलम् ॥६२॥
श्रीवर्मा नृपराजपूजितपदोदेवस्ततः श्रीधरः,
षट्खंडाधिपतिर्महासुरपतिः श्रीपद्मनाभो नृपः।
सत्सामर्थ्यमहोदयाद्भुतसुखी सर्वार्थसिद्धीश्वर—
श्चन्द्रेशः कुरुताच्छिवं शिववधूयुक्तः सदा वश्चनः ॥६३॥
भूपा भवन्तु बलिन प्रबलेन यौधे शांता. प्रजाश्चकलिकालकला-विनष्टाः।
विद्या-विनोद-विशदात्मगुणा स्वयं वा व्याख्यानवर्तिनि तमीशपते. पुराणे ॥६४

पठक. पाठकश्चास्य वक्ता श्रोता च भाविकः।
विस्तारकः शिवं लेभे भुक्त्वेंद्रादि-सुखं महत् ॥६५

इत्यष्टमजिन-पुराण-संग्रहे श्रीमत्पद्महरि-शिवाभिराम (मा) वनिपसूनुकृतौ भगवन्निर्वाणगमनांतमंगलाचरण-कविसमुत्पत्ति-निरूपणाख्याभिधानः-सप्तविंशतिम. सर्ग. ॥२७॥

१३३—शब्दार्णवचन्द्रिका-वृत्ति (सोमदेव)

आदिभागः—

श्रीपूज्यपादममलं गुणनन्दिदेवं, सोमामरव्रतिप-पूजित-पादयुग्मम्।
सिद्धं समुन्नतपदं वृषभं जिनेन्द्रं, सच्छब्दलक्षणमहं विनमामि वीरम् ॥१॥
श्री मूलसंघजलजप्रतिबोधभानो, र्मेघेन्दुदीक्षित-भुजगसुधाकरस्य।
राद्धान्ततोयनिधिवृद्धिकरस्य वृत्तिं, रेभे हरींदु-यतये वरदीक्षिताय ॥२॥

अन्तभागः—

श्रीसोमदेवयति-निर्मितमादधाति, यानौ.प्रतील-गुणनन्दित-शब्दवार्धौ।
सेयं सताममलचेतसि विस्फुरन्ती, वृत्तिः सदा नुतपदा परिवर्तिषीष्ट ॥१॥

स्वस्ति श्रीकोल्लापुरदेशान्तर्वर्त्याजुरिकामहास्थान युधिष्ठिरावतार-महामण्डलेश्वर गंडरादित्यदेवनिर्मापितत्रिभुवनतिलकजिनालये

श्रीमत्परमपरमेष्ठिश्रीनेमिनाथश्रीपादपद्माराधनबलेन वादीभवज्रांकुश-श्रीविशालकीर्तिपंडितदेव वैयावृत्यतः श्रीमच्छिलाहारकुलकमलमार्तण्डतेज पुञ्जराजाधिराजपरमेश्वरपरमभट्टारकपश्चिमचक्रवर्ति श्रीवीरभोजदेव विजय-राज्ये शकवर्षैकसहस्रैकशतसप्तविंशति ११२७ तमक्रोधनसम्वत्सरे स्वस्ति-समस्तानवद्यविद्याचक्रवर्ति श्रीपूज्यपादानुरक्तचेतसा श्रीमत्सोमदेवमुनीश्वरेण विरचितेयं शब्दार्णवचन्द्रिकानाम वृत्तिरिति । इतिश्रीपूज्यपादकृत जैनेन्द्रमहाव्याकरणं सम्पूर्णम् ॥

(श्रीजैनमन्दिर पंसारीटोला, इटावा प्रति)

१३४. द्रव्यसंग्रहवृत्ति (पं० प्रभाचन्द्र)

आदिभागः—

नत्वा जिनार्कमपहस्तितसर्वदोषं, लोकत्रयाधिपतिसंस्तुतपादपद्मम् ।
ज्ञान-प्रभा-प्रकटिताखिलवस्तुसार्थं, षड्द्रव्यनिर्णयमहं प्रकटं प्रवक्ष्ये ॥१॥

अहं प्रवक्ष्ये कथयिष्ये कं ? षड्द्रव्यनिर्णयं षण्णां द्रव्याणां जीवादीनां निर्णयं निश्चयं कथं प्रवक्ष्ये प्रकट यथा भवति किं कृत्वा ? पूर्वं नत्वा नमस्कृत्य कं ? जिनार्कं जिनादित्य कथंभूत ? अपहस्तितसर्वदोष अपहस्तिता निराकृताः सर्वदोषा.क्षुधादयो येन स अपहस्तितसर्वदोषस्तं आदित्येत्यादि अपहस्तिता निराकृता सर्वदोषा रात्रि । पुन. कथंभूतं ? लोकत्रयाधिपतिसंस्तुत-पादपद्मं लोकत्रयस्याधिपतय· स्वामिनो धरणेन्द्रनरेन्द्रसुरेन्द्रास्तैर्वंदितौ पादावेव पद्मौ यस्य स लोकत्रयाधिपतिभिः ब्रह्माविष्णुमहेश्वरैरेभिः संस्तुत पादपद्म इति परसमयवचनं । पुन कथंभूतं ? ज्ञानप्रभाप्रकटिताखिलवस्तु-सार्थं ज्ञानं केवलज्ञानं तदेव प्रभा तया प्रकटिताः प्रकाशिताखिलवस्तूना निखिलपदार्थाना सार्थः समूहो येन स ज्ञानप्रभाप्रकटिताखिलवस्तुसार्थस्तं आदित्येनापि प्रभालोचनगोचरा. सर्वेपदार्थाः प्रकटिता इति क्रियाकारक-सम्बन्ध. । अथेष्टदेवताविशेषं नमस्कृत्य महामुनिसैद्धान्तिक—श्रीनेमिचन्द्र प्रतिपादितानां षड्द्रव्याणां स्वल्पबोधप्रबोधार्थं संक्षेपार्थतया विवरणं करिष्ये ।

अन्तभाग.—

इति श्रीपरमागमिकभट्टारक-श्रीनेमिचन्द्रविरचित-षड्द्रव्यसंग्रहे श्रीप्रभाचन्द्रदेवकृतसंक्षेपटिप्पणकं समाप्तम् ॥

१३५. पंचास्तिकाय-प्रदीप (प्रभाचन्द्राचार्य)

आदिभाग.—

प्रणम्य पादाम्बुरुहाणि भक्त्या, मनोवच.कायकृदार्हदीशां ।

प्रवक्ष्यथास्त्यांगविचारसूत्री, स्फुटीकृते टिप्पणकं विशिष्टम् ॥१॥

अथ श्रीकुमारनन्दिशिष्य. श्रीशिवकुमारमहाराजाद्यन्तेवासिनां सम्बोधनपराः विलोकितपूर्वविदेहश्रीसीमंधरस्वामितीर्थंकरपरमदेवा, पञ्चास्तिकाय-षट्द्रव्य-सप्ततत्त्व-नवपदार्थप्रतिपादनपराः नास्तिकत्वनिराशाय शिष्टाचार-प्रतिपालनाय पुण्यप्राप्ति-निर्विघ्न [ग्रन्थसमाप्त्यर्थं] चाभिमतदेवतानमस्कार-सूत्र श्रीमत्कुन्दकुन्दाचार्या प्राहु —

अन्तभाग:—

इति पण्डित श्रीप्रभाचन्द्रविरचिते पंचास्तिकायप्रदीपे मोक्षमार्ग-नवपदार्थ चूलिकाधिकारः समाप्तः ।

सन्मार्गतत्त्वविविधार्थमणिप्रकाशः ।
श्रीमत्प्रभेन्दुरचितोनविदन्तरर्थ्यः (?) ॥१॥
ज्योतिप्रभाप्रहतमोहमहान्धकार,
पंचास्तिकाय-भुवने ज्वलति प्रदीपः ॥२॥

१३६. आत्मानुशासनतिलक (प्रभाचन्द्राचार्य)

आदिभाग :—

वीरं प्रणम्य भव-वारिनिधिप्रपोतमुद्योतिताऽखिलपदार्थमनल्पपुण्यम् ।
निर्वाणमार्गमनवद्यगुणप्रबन्धमात्मानुशासनमहं प्रवरं प्रवक्ष्ये ॥१॥

बृहद्धर्मभ्रातुल्लोकसेनस्य विषयव्यामुग्धबुद्धेः संबोधनव्याजेन सर्वोपकारकं सन्मार्गमुपदर्शयितुकामो गुणभद्रदेवो निर्विघ्नत· शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्टदेवताविशेषं नमस्कुर्वाणो लक्ष्मीत्याद्याह—

अन्तभाग :—

मोक्षोपायमनन्यपुण्यममलज्ञानोदयं निर्मलम्,
भव्यार्थं परमं प्रभेन्दुकृतिना व्यक्तैः प्रसन्नैः पदैः ।
व्याख्यानं वरमात्मशासनमिदं व्यामोहविच्छेदतः,
सूक्तार्थेषु कृतादरैरहरहश्चेतस्यलं चिंत्यताम् ॥१॥

इति श्रीआत्मानुशासनतिलकं प्रभाचन्द्राचार्यविरचितं सम्पूर्णम् ।

१३७. आराधनाकथाप्रबन्धः (प्रभाचन्द्राचार्य)

आदिभाग.—

प्रणम्य मोक्षप्रदमस्तदोषं, प्रकृष्टपुण्यप्रभवं जिनेन्द्रम् ।
वक्ष्येऽत्रभव्यप्रतिबोधनार्थमाराधनासत्सुकथाप्रबन्धम् ॥१॥

अन्तभाग:—

यैराराध्य चतुर्विधामनुपमामाराधनां निर्मलाम् ।
प्राप्तं सर्वसुखास्पदं निरुपमं स्वर्गापवर्गप्रदा ।
तेषां धर्मकथा-प्रपञ्चरचना स्वाराधना संस्थिता ।
स्थेयात् कर्मविशुद्धिहेतुरमला चन्द्रार्कताराववधि ॥१॥

सुकोमलैः सर्वसुखावबोधैः पदैः प्रभाचन्द्रकृतः प्रबन्धः ।
कल्याणकालेऽथ जिनेश्वराणां, सुरेन्द्रदन्तीव विराजतेऽसौ ॥२॥

श्रीजयसिंहदेवराज्ये श्रीमद्धारानिवासिना परापरपञ्चपरमेष्ठिप्रणामोपार्जिताऽमलपुण्यनिराकृतनिखिलमलकलंकेनश्रीमत्प्रभाचंद्रपण्डितेन आराधनासत्कथाप्रबन्धः कृतः ।

१३८. प्रवचनसरोजभास्कर (प्रभाचन्द्राचार्य)

आदिभाग:—

वीरं प्रवचनसारं निखिलार्थं निर्मलजनानन्दम् ।
वक्ष्ये सुखावबोधं निर्वाणपदं प्रणम्याप्तम् ॥१॥

श्रीकुन्दकुन्दाचार्यः सकललोकोपकारक मोक्षमार्गमध्ययनरुचिविनेया-

शयवशेनोपदर्शयितुकामो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्ट-
देवताविशेषं शास्त्रस्यादौ नमस्कुर्वन्नाह—

अन्तभाग —

इति श्रीप्रभाचन्द्रदेवविरचिते प्रवचनसारसरोजभास्करे शुभोपयोगाधि-
कार. समाप्तः ॥

१२६. त्रैलोक्यदीपक (वामदेव)

आदिभागः—

वन्दे देवेन्द्रवृन्दार्च्यं नाभेयं जिनभास्करं ।
येन ज्ञानांशुभिर्नित्यं लोकालोकौ प्रकाशितौ ॥१॥
संस्तवीमि क्रमद्वन्द्वं शेषानां तु जिनेशिनाम् ।
यद् ज्ञानाम्भोधिमध्यस्थं त्रैलोक्यं पद्मसंन्निभम् ॥२॥
विदधातु मम प्रज्ञां जैनशास्त्रावबोधिनीम् ।
श्रीमज्जिनमुखाम्भोज-निर्गता श्रुतदेवता ॥३॥
सिद्धान्तवारिधेश्चन्द्रं नेमिचन्द्रं नमाम्यहं ।
यस्य प्रसादतो विश्वं हस्तस्थामलकोपमम् ॥४॥
विभाति विशदाकीर्तिर्यस्य त्रैलोक्यवर्तिनी ।
नमस्तस्मै मुनीन्द्राय श्रीमत्त्रैलोक्यकीर्तये ॥५॥
आकरः सर्वविद्यानां धर्म्ममार्ग-दिवाकरः ।
धर्म्माकर इति ख्यातः स मुनिः श्रूयते मया ॥६॥
वीर-दृष्ट्यादिसेनस्य मिथ्यात्वाद्यरि संहृ (ह ?) तौ ।
अतोऽसौ वीरसेनाख्यो जीयादागम-पारग. ॥७॥
पुरपाटवंश-भूषण-जोमन तनयस्य नेमिसेनस्य ।
अभ्यर्थनयाऽऽरब्धो ग्रंथोऽयं भव्यबोधाय ॥८॥
अथ पञ्चगुरून्नत्वा वक्ष्ये संस्कृतभाषया ।
त्रैलोक्यसारमालोक्य ग्रन्थं त्रैलोक्यदीपकम् ॥९॥

× × × ×

इतीन्द्रवामदेवविरचिते पुरवाटवंशविशेपकश्रीनेमिदेवस्य यश.प्रकाशके त्रलोक्यदीपिके अधोलोकव्यावर्णनो नाम प्रथमोधिकार. ॥१॥

अन्तभाग:—

जयति जित-मकरकेतुः केतुर्दुष्कर्मराशिदलनाय ।
श्रीमत्त्रिभुवनकीर्तिः कीर्तिलताक्रांतभुवनान्त. ॥६१॥
किं चन्द्र, किमु भास्कर. किमथवा मेरु. किमंभोनिधि. ।
किं धात्री सुर वर्म्म किं किमथवा कल्पद्रुम. विश्रुतः ।
एकैकेन गुणेन विश्रुतपृथुप्रस्थायिनस्ते स्वयं ।
नैते शेषगुणाकरास्त्रिभुवने त्रैलोक्यकीर्तिः स्वयं ॥६२॥
अस्त्यत्र वंशः पुरवाड संज्ञः समस्तपृथ्वीपतिमाननीय. ।
त्यक्त्वा स्वकीयां सुरलोकलक्ष्मीं देवा अपीच्छन्ति हि यत्र जन्म ।६३
तत्र प्रसिद्धोऽजनि कामदेव. पत्नी च तस्याजनि नामदेवी ।
पुत्रौ तयोर्जोमनलक्ष्मणाख्यौ बभूवतु. राघवलक्ष्मणाविव ॥६४॥
रत्नं रत्नखने.शशी जलनिधे रात्मोद्भव. श्रीपते—
स्तद्वज्जोमनतो बभूव तनुजः श्री नेमिदेवाह्वयः ।
यो बाल्येऽपि महानुभावचरित. सज्जैनमार्गेरत ,
शांत. श्रीगुणभूषणक्रमनुत सम्यक्त्वचूलांकितः ॥६५॥
यस्त्यागेन जिगाय कर्णनृपतिं न्यायेन वाचस्पतिं ,
नैर्मल्येन निशापतिं नगपतिं सत्स्थैर्यभावेन च ।
गाम्भीर्येण सरित्पतिं मलततिं सद्धर्मसद्भावनात् ;
स श्रीसद् गुणभूषणोन्नतिनतो नेमिश्चिरं नन्दतु ॥६६॥
तत्सत्कार पुरस्कृतेन सततं तज्जैनतादर्शनात् ,
सन्तुष्टेन तदार्यवादिसुगुणै हृष्टेन पुष्टेन च ।
तस्य प्रार्थनया सुसंस्कृतवचो बन्धेन सन्निर्मितो,
ग्रन्थोऽयं त्रिजगत्स्वरूपकथन. सत्पुण्यनिर्मायणः ॥६७॥

वंशे नैगमसंज्ञके जनसुधी जैने प्रतिष्ठा विधा—
वाचार्यो जिनभक्तितत्परमना यो वामदेवाह्वय. ।
तेनालोक्य समस्तमागमविधिं त्रैलोक्यदीपाभिधौ,
ग्रंथः साधुकृतो विशोध्य सुधियस्तन्वन्तु पृथ्वीतले ॥६८॥

वक्तृश्रोत्रनुमतॄणां विशदं जैनशासनम् ।
भव्यानामर्हतां भूयात् प्रशस्तं सर्वमंगलम् ॥६९॥
यावन्मेरु सुधासिन्धु र्यावच्चन्द्रार्कमण्डलम् ।
तावन्नित्यमहोद्योतैर्वर्धतां जैनशासनम् ॥७०॥

इतीन्द्र श्रीवामदेवविरचिते पुरवाडवंशविशेषकश्रीनेमिदेवस्य यशः प्रकाशके त्रैलोक्यदीपके ऊर्ध्वलोक व्यावर्णनोनाम तृतीयोधिकार. समाप्तः ॥

१४०. आदिपुराणटीका (ललितकीर्ति)

आदिभागः—

जिनाधीशं नत्वा तदनु जिनवाणी च सुगुरुं,
करोमीत्थं टीकामहमिह पुराणस्य महतः ।
द्वितीयार्द्धस्योच्चैः शरमितसुपर्व्वप्रमितिकाम्,
यथाशक्ति स्तोकांतनुमतिविशदां भक्तिवशतः ॥१॥

अन्तभागः—

शरदि शरभुजंगाहीलिका (१८८५) सप्रमायां,
जगति विदितमासे भाद्रके कृष्णपक्षे ।
अकृत ललितकीर्तिदेवराट् (स) दशम्यां,
पुरुजिनवरराज. सत्पुराणस्य टीकाम् ॥१॥

१४१. वाग्भट्टालंकारावचूरि=कविचंद्रिका (वादिराज)

आदिभागः—

अनंतानंतसंसारपारगं पार्श्वमीश्वरं ।
प्रमाण-नय-भंगाब्धिं भुक्तिभूयोप्सितं स्तुवे ॥१॥

वाग्भट्टकवींद्रं रचितालंकारस्यावचूरि[रि]यममला ।
जिन-वचन-गुरु-कृपातो विरच्यते वादिराजेन ॥२॥
धनंजयाऽऽशाधरवाग्भटानां धत्ते पदं संप्रति वादिराजः
खांडिल्यवंशोद्भवपोमसूनु जिनोक्तपीयूषसुतृप्तचित्त ॥३॥

अन्तभाग:—

सवत्सरेनिधिदृगश्वशशांकयुक्ते (१७२६) ।
दीपोत्सवाख्यदिवसे सगुरौ सचित्रे ।
लग्नेऽलिनामनि शुभे च गिर.प्रसादात ,
सद्वादिराजरचिता कविचन्द्रिकेयं ॥१॥

श्रीराजसिंह नृपतिर्जयसिंह एव श्री तक्षकाख्यनगरी अणहिल्लतुल्या ।
श्रीवादिराज विबुधोऽपरवाग्भटोयं, श्रीसूत्रवृत्तिरिह नंदतु चार्कचन्द्र ॥२॥

श्रीमद्भीमन्टपात्मजस्य बलिन. श्रीराजसिंहस्य मे,
सेवायामवकाशमाप्य विहिता टीका शिशूनां हित ।
हीनाधिक्य वचोयदत्र लिखितं तद्वै बुधै. क्षम्यताम्
गार्हस्थ्यावनिनाथ सेवनधिया कः स्वस्थतामाप्नुयात् ॥३॥

इति श्रीवाग्भट्टालंकारटीकायां पोमराजश्रेष्ठिसुतवादिराजविरचिताया कविचन्द्रिकायां पंचमः परिच्छेदः समाप्तः ॥

१४२. रामचरित्र (ब्रह्म जिनदास)

आदिभाग:—

सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेशरम् ।
प्रणमामि महावीरं लोकत्रितयमंगलम् ॥१॥
सिद्धं सम्पूर्णभव्यार्थसिद्धे कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञान-चारित्र प्रतिपादनम् ॥२॥
मुनिसुव्रततीर्थेशं सुव्रतं वरचेष्टितम् ।
प्रणमामि सदा भक्त्या भव्यमंगलदायकम् ॥३॥

अन्तभागः—

श्रीमद्रामचरित्रमुत्तममिदं नानाकथापूरितं,
पापध्वान्तविनाशनैकतरणिं कोरुण्यवल्लीवनं ।
भव्यश्रेणिमनःप्रमोदसदनं भक्त्यानघं कीर्तितं,
नानासत्पुरुषालिवेष्टनयुतं पुण्यं शुभं पावनम् ॥१८०

श्रीवर्द्धमानेन जिनेश्वरेण त्रैलोक्यवंदेन यदुक्तमादौ ।
तत-परं गौतमसंज्ञकेन गणेश्वरेण प्रथितं जनानाम् ॥१८१
ततः क्रमाच्छ्री रविषेण नाम्नाऽऽचार्येण जैनागमकोविदेन ।
सत्काव्यकेलीसदनेन पृथ्व्यां नीतं प्रसिद्धिं चरितं रघोश्च ॥१८२
श्री कुन्दकुन्दान्वयभूषणोऽथ बभूव विद्वान् किल पद्मनन्दी ।
मुनीश्वरो वादिगजेन्द्रसिंह. प्रतापवान् भूवलये प्रसिद्धः ॥१८३
तत्पट्टपंकेजविकासभास्वान् बभूव निर्ग्रन्थवर' प्रतापी ।
महाकवित्वादिकलाप्रवीणस्तपोनिधि' श्रीसकलादिकीर्तिः ॥१८४
पट्टे तदीये गुणवान् मनीषी क्षमानिधानं भुवनादिकीर्तिः ।
जीयाच्चिरं भव्यसमूहवन्द्यो नानायतीव्रात निषेवणीयः ॥१८५
जगतिभुवनकीर्तिर्भूतलख्यातकीर्तिःश्रुतजलनिधिवेत्ताऽनंगमानप्रभेत्ता ।
विमलगुणनिवासःछिन्नसंसारपाश.स जयतियतिराज.साधुराजीसमाज.॥१८६
स ब्रह्मचारी गुरुपूर्वकोऽस्य भ्राता गुणज्ञोऽस्ति विशुद्धचित्तः ।
जिनस्य दासो जिनदासनामा कामारिजेता विदितो धरित्र्यां ॥१८७
तेन प्रशस्तं चरितं पवित्रं रामस्य नीत्वा रविषेण सूरे. ।
समुद्धृतं स्वान्यसुखप्रबोधहेतोश्चिरं नन्दतु भूमिपीठे ॥१८८
श्रीमज्जिनेश्वर-पदांबुजचंचरीकस्तच्छात्र सदगुरुषु भक्तिविधानदक्षः ।
सार्थाभिधोऽसौ जिनदास नामा दयानिवासो भुवि राजते च ॥१८९
न ख्याति-पूजाद्यभिमानलोभाद् ग्रन्थ. कृतोऽयं प्रतिबोधहेतोः ।
निजान्ययोः किन्तु हिताय चापि परोपकाराय जिनागमोऽक्तः ॥१९०
जिनप्रसादादिदमेव याचे दु.खक्षयं शाश्वतसौख्यहेतोः ।
कर्मक्षयं बोधचरित्रलाभं शुभांगतिं चेह न चान्यदेव ॥१९१

यत्किंचिदत्रस्वरसन्धिजातं पद्यादिक [वा] चलितं प्रमादात् ।
क्षमस्व तद्भारति ! तुच्छबुद्धे मंमाशु नो मुह्यति क. श्रुताब्धौ ॥१९२
तथा च धीमद्भिरिदं विशोध्यं मुनीश्वरैर्निर्मलचित्तयुक्तैः ।
कृत्वानुकपा मयि जैनशास्त्र (स्त्रे) विशारदै. सर्वकपायमुक्तै, ॥१९३
यावन्महीमेरुनग पृथिव्यां शशी च सूर्य. परमाणवश्च ।
श्रीमज्जिनेन्द्रस्य गिरश्च तावन्नन्दत्विदं रामचरित्रमार्यम् ॥१९४

रक्षां सघस्य कुर्वन्तु जिनशासनदेवता. ।
पालयंतोऽखिलं लोकं भव्यसज्जनवत्सल ॥१९५

इति श्रीरामचरित्रे भट्टारक-सकलकीर्तिशिष्यब्रह्मजिनदासविरचिते बलदेव निर्वाणकथनो नाम त्र्यशीतितम सर्ग. ॥८३

१४३. ज्येष्टजिनव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग—

ज्येष्टं जिनं प्रणम्यादावकलंककलध्वनिं ।
श्रीविद्यादिनंदिनं ज्येष्टजिनव्रतमथोच्यते ॥१॥

अन्तभाग:—

आसीदसीममहिमा मुनि पद्मनन्दी देवेन्द्रकीर्ति गुरुरस्य पदेशदेक· (?) ।
तत्पट्टविष्णुपदपूर्णशशाकमूर्तिर्विद्यादिनंदिगुरुरत्रपवित्रचित्त. ॥७६॥

गुणरत्नभृतो वचोऽमृताढ्यः स्याद्वादोर्मिसहस्रशोभितात्मा ।
श्रुतसागर इत्यमुख्यशिष्य स्वाख्यानं रचयाचकार सूरि ॥७७॥

अग्रोत्कान्वयशिरोमुकटायमान. संघाधिनाथ विमलूरिति पुण्यमूर्ति. ।
भार्यास्य धर्ममहती वृहतीति नाम्ना सासूत सूनुमनवद्य महेन्द्रदत्तं ॥७८॥
वैराग्यभावितमनाः जिनूल्ह (?) दिष्ट. श्रीमूलसंघगुणरत्नविभूषणोऽभूत. ।
देशव्रतिप्रततिरां व्रतशोभितात्मा संसारसौख्यविमुख. सुतपोनिधिर्वा ॥७९॥
पुत्रोस्य लक्ष्मणइति प्रणतीगुरूणा कुर्वंश्चकास्ति विदुपाधुरि वर्णनीय ।
अभ्यर्थकारितमिदं श्रुतसागराख्यमाख्यानकं चिरतर शुभद समस्तु ॥८०॥

इतिप्रचंडपंडिताग्रणीसूरिश्रीश्रुतसागरविरचितं ज्येष्ठजिनवरव्रतोपाख्यानं समाप्तम् ॥१॥

१४४. रविव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

प्रणम्य शिरसार्हन्तं सिद्धांस्त्रैलोक्यमंगलान् ।
मुनींस्तद्धर्मवाग्देव्यौ रविव्रतमहं ब्रुवे ॥१॥

अन्तभाग —

सरस्वतीगच्छ-सुरद्रुमावलीवलीढभूसेचनधीघनाघनः ।
चिरं च देवेन्द्रयशा मुनिर्मम प्रकामकामाग्निशमं प्रयच्छतु ॥६१॥
भट्टारकघटामध्ये यत्प्रतापो विराजते ।
तारास्विव रवे. श्रीदो विद्यानंदीश्वरोऽस्तु मे ॥६२॥
प्रमाण-लक्षणच्छंदोऽलंकारमणिमंडितः ।
पंडितस्तस्य शिष्योऽयं श्रुतरत्नाकराभिध. ॥६३॥
गुरोरनुज्ञामधिगम्य धीधनश्चकार संसारसमुद्रतारकः (कम्) ।
स पार्श्वनाथव्रतसत्कथानकं सतां नितांतं श्रुतसागर: श्रिये ॥६४॥

इति रविव्रतकथा समाप्ता ।

१४५. सप्तपरमस्थानव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

विद्यानंद्यकलंकार्यं पूज्यपादं जिनेश्वरम् ।
नत्वा ब्रवीम्यहं सप्तपरमस्थानसद्व्रतम् ॥१॥

अन्तभाग.—

व्रतरतिरकलंक: पूज्यपादो मुनीना, गुणनिधिरबुधानां बोधिकृत्पद्मनन्दी ।
जयति महितकाति. क्षेमकृद्दिव्यमूर्तिर्मदनमदविदारी देवदेवेंद्रकीर्ति ॥६२॥
सद्भट्टारक'' (?) वर्णनीयश्चेतो यतीनामभिवंदनीय. ।
विद्यादिनंदी गणभृत्तदीय. सम्यग्जयत्येष गुरुर्मदीयः ॥६३॥
मया तदादेशवशेन धीमता प्रकाशितेयं महता बृहत्कथा ।

पिबन्तु तां कर्णसुधां बुधोत्तमा महानुभावाः श्रुतसागराश्रिताः ॥६४॥
विरुद्धमागमात्किंचिद्वचो यदि च भाषितम् ।
तन्मे सरस्वती क्षंतु मनते (मानिते) मातरर्हसि ॥६५॥

इति सप्तपरमस्थानकथा सम्पूर्णा ।

१४६. मुकुटसप्तमीकथा (ब्रह्मश्रुतसागर)

आदिभाग—

श्रीशारदास्पदीभूत-पादद्वितयपंकजम् ।
नत्वाऽर्हन्तं प्रवक्ष्यामि व्रतं मुकुटसप्तमी ॥१॥

अन्तभागः—

श्रीमल्लिभूषणगुरो प्रकटोपदेशाच्चक्रे कथानकमिदं श्रुतसागरेण ।
देशव्रतेन कृतिना सुकृतैकहेतु शं वस्तनोत्विह परत्र भवे च नित्यम् ॥६६॥

इति मुकुटसप्तमीकथा समाप्ता ।

१४७. अक्षयनिधिव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

पूज्यपादाऽकलंकार्यविद्यानंदीन्द्रवंदितम् ।
प्रणम्य तीर्थकृद्देवं वक्ष्येऽक्षयनिधिव्रतम् ॥१॥

अन्तभाग—

गच्छे श्रीमन्मूलसंघतिलके सारस्वते विश्रुते,
विद्वन्मान्यतम-प्रसह्य-सुगणे स्वर्गापवर्गप्रदे ।
विद्यानंदिगुरुर्बभूव भविकानंदी सतां सम्मत-
स्तत्पट्टे मुनिमल्लिभूषणगुरुर्भट्टारको नंदतु ॥८७॥
तर्कव्याकरणप्रवीणमतिना तस्योपदेशाहित-
स्वातेन श्रुतसागरेण यतिना तेनाऽमुना निर्मितम् ।
श्रेयोधामनिकाममक्षयनिधिं स्वेष्टव्रत धीमता,
कल्याणप्रदमस्तु शास्त्रमितिनस्तत्तद्विदां संमुदे ॥८८॥

इत्यक्षयनिधिविधानकथानकं समाप्तम् ।

१४८. षोडशकारणकथा (ब्रह्मश्रुतसागर)

आदिभागः—

अथप्रणम्यतीर्थेशं तीर्थेशपदलब्धये ।
श्रीविद्यानंदिनं साधुं ब्रुवे षोडशकारणम् ॥१॥

अन्तभागः—

श्रीमूलसंघे विबुधप्रपूज्ये श्रीकुंदकुंदान्वय उत्तमेऽस्मिन् ।
विद्यादिनंदी भगवान् बभूव स्ववृत्तसारश्रुतपारमाप्तः ॥६७॥
तत्पादभक्तः श्रुतसागराख्यो देशव्रती संयमिनां वरेण्य. ।
कल्याणकीर्त्तेर्मुहुराग्रहेण कथामिमां चारु चकार सिद्ध्यै ॥६८॥

इति षोडशकारणोपाख्यानं समाप्तम् ।

१४९. मेघमालाव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग —

समंताद्भद्रमर्हंतं नत्वा विद्यादिनंदिनम् ।
मेघमालाव्रतं मेघमालाशांत्यर्थमुच्यते ॥१॥

अन्तभागः—

सत्यं वाचि,,हृदि स्मरत्त्यमतिर्मोक्षाभिलाषोऽन्तरे,
श्रोत्रं साधुजनोक्तिपु प्रतिदिनं सर्वोपकारः करे ।
यस्यानंदनिधेर्बभूव स विभुर्विद्यादिनन्दी मुनि',
संसेव्यः श्रुतसागरेण विदुषा भूयात्सतां संपदे ॥५१॥

इति मेघमालाव्रतोपाख्यानं समाप्तम् ।

१५०. चन्दनषष्ठीकथा (ब्रह्मश्रुतसागर)

आदिभागः—

प्रभाचन्द्रं पूज्यपादं श्रीविद्यानन्दिनं जिनम् ।
समन्तभद्रं संस्मृत्य वक्ष्ये चन्दनषष्ठिकाम् ॥१॥

अन्तभाग:—

स्वस्ति श्रीमूलसंघेऽभवदमरनुत. पद्मनंदी मुनीन्द्रः
शिष्यो देवेन्द्रकीर्तिर्लसदमलतया भूरिभट्टारकेज्य. ।
श्रीविद्यानंदिदेवस्तदनुमनुजराजार्च्यंयत्पद्मयुग्म-
स्तच्छिष्येणारचीदं श्रुतजलनिधिना शास्त्रमानन्दहेतु ॥१६॥
स्वल्पमपि शास्त्रमेतच्छब्दार्थविचित्रभावरचिततया ।
उद्धं लद्रवमहाब्धेर्मलमंतज्जातमपनयति ॥१७॥

इति श्रीब्रह्मश्रुतसागरविरचिता चन्दनषष्ठीकथा समाप्ता ।

१५१. लब्धिविधानकथा (ब्रह्मश्रुतसागर)

आदिभाग.—

श्रीविद्यानंदिनं पूज्यपाद नत्वा जिनेश्वरम् ।
कथां लब्धिविधानस्य वक्ष्यहं सिद्धिलब्धये ॥१॥

अन्तभाग:—

जयति गुणसमुद्रो वीरनाथो जिनेन्द्रस्तदनु जयति धीमान् गौतम. सूरिवर्य. ।
जयति जगति विद्यानंदिदेवो मुनीन्द्रः श्रुतपदसमुपेत सागरस्तस्य शिष्य.॥२५

तेनेदं चरितं विचित्ररचनं चेतश्चमत्कारकं,
सर्वव्याधिविनाशिनं गुणकरं श्रीगौतमस्योत्तमम् ।
चक्रे शक्रपुरस्सरैर्म्मान्यं (रतिमहामान्यै.) सदा सम्पदां
वेश्मश्री श्रुतसागराश्रितवता देयात्सता मंगलम् ॥२६॥

इतिब्रह्मश्रीश्रुतसागरविरचितं लब्धिविधानोपाख्यानं समाप्तम् ।

१५२. पुरंदरविधानकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

उमास्वामिनमर्हन्तं शिवकोटिं महामुनिम् ।
विद्यानंदिगुरु नत्वा पुरंदरविधिं ब्रुवे ॥१॥

अन्तभाग:—

आनन्दादकलंकदेवचरणाम्भोजालिना दीक्षितो
विद्यानंदिमहात्मनां श्रुततपोमूर्तिः परार्थे रतः।
साधूनां श्रुतसागरः प्रियतम. कल्याणकीर्त्याग्रहा-
च्चक्रे चारुपुरंदरव्रतविधिं सिद्ध्यंगना-लालसः ॥६३॥
इति पुरंदरविधानोपाख्यानं समाप्तम्।

१५३. दशलाक्षिणीव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग.—

अर्हतं भारतीं विद्यानंदिसद्गुरुपंकजम्।
प्रणम्य विनयाद्वक्ष्ये दशलाक्षणिकं व्रतम् ॥१॥

अन्तभाग:—

जातः श्रीमति मूलसंघतिलके श्रीकुंदकुंदान्वये,
विद्यानंदिगुरुर्गरिष्ठमहिमा भव्यात्मसंबुद्धये।
तच्छिष्यश्रुतसागरेण रचितं कल्याणकीर्त्याग्रहे
शं देयाद्दशलक्षणव्रतमिदं भूयाच्च सत्संपदे ॥६६॥
इति श्रीदशलाक्षणिकव्रतकथा समाप्ता।

१५४. पुष्पांजलिव्रतकथा (ब्रह्मश्रुतसागर)

आदिभागः—

कवीन्द्रमकलंकाख्यं विद्यानन्दं जिनेश्वरम्।
पूज्यपादं प्रणम्यादौ वक्ष्ये पुष्पांजलिव्रतम् ॥१॥

अन्तभाग. —

स्वस्ति श्रीमति मूलसंघतिलके गच्छे गिमूर्च्छं (मुमुक्षु) च्छिवे,
भारत्या. परमार्थपंडितनुतो विद्यादिनन्दी गुरु.।
तत्पादाम्बुजयुग्ममत्तमधुलिट् चक्रे नवक्राशय.,
सद्बोध. श्रुतसागरः शुभमुपाख्यानं स्तुतस्तार्किकैः ॥१०१॥
इति पुष्पांजलिव्रतकथा समाप्ता।

औदार्यादिगुणौघरत्नवसतिर्विद्याविनोदस्थिति—
स्तच्छिष्य. श्रुतसागरो विजयतां मुक्तावलीकृद्यति. ॥७८॥
जातो हूंबडवंशमण्डनमणि. श्रीगोपियाख्य. कृती,
कांता शीरिति तस्य सद्गुरुमुखोद्भूतेश्च कल्याणकृत्।
पुत्रोऽस्यां मतिसागरो मुनिरभूद्भव्यौघसम्बोधकः,
सोऽयं कारयति स्म निर्मलतपा शास्त्रं चिरं नन्दतु ॥७८॥

इति श्रीमुक्तावलीविधानकथानकं समाप्तम्

१५७. निर्दुःखसप्तमीकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

विद्यानंदं प्रभाचंद्र पूज्यपादं जिनेश्वरम्।
नत्वाऽकलंकं गांवच्मि कथां निर्दुःखसप्तमीम ॥

अन्तभाग :—

सकलभुवनभास्वद्भूषणं भव्यसेव्य.
समजनि कृतिविद्यानंदिनामा मुनीन्द्र.।
श्रुतसमुपपदाद्य. सागरस्तस्य सिद्धयै,
शुचिविधिमिममेष द्योतयामास शिष्य. ॥४३॥

इति निर्दुःखसप्तमीविधानोपाख्यानं समाप्तम्।

१५८. सुगन्धदशमीकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

पादाम्भोजानहं नत्वा श्रीमतां परमेष्ठिनाम्।
शृण्वन्तु साधवो वक्ष्ये सुगन्धदशमीकथाम् ॥१॥

अन्तभाग :—

कृतिरितियतिविद्यानंदिदेवोपदेशाज्जिनविधुवरभक्तेर्वर्णिनस्तु श्रुताब्धे।
विबुधहृदयमुक्तामालिकेव प्रणीता सुकृतधनसमर्थ्या गृह्णतां तां विनीता. ॥६१॥
इति श्रीवर्णिना श्रुतसागरेण विरचिता सुगंधदशमीकथा समाप्ता।

१५६. श्रवणद्वादशीकथा (ब्रह्मश्रुतसागर)

आदिभाग —

पूज्यपाद-प्रभाचन्द्राऽकलंकमुनिमानितम् ।
नत्वाऽर्हन्तं प्रवक्ष्यामि श्रवणद्वादशीविधिम् ॥१॥

अन्तभाग :—

विद्यानन्दिमुनीन्द्रचन्द्रचरणांभोजातपुष्पंधयः
शब्दज्ञः श्रुतसागरो यतिवरोऽसौ चारु चक्रे कथाम् ।
श्रुत्वा पापकलंकपंकविलसन्मन्दाकिनीमुत्तमां
संत. सारसुखाय धर्मतृषिताः कुर्वन्तु पुण्यात्मनाम् ॥४०॥

इतिश्रवणद्वादशी-उपाख्यानं समाप्तम् ।

१६०. रत्नत्रयकथा (ब्रह्मश्रुतसागर)

आदिभाग :—

विद्यानन्दप्रदं पूज्यपादं नत्वा जिनेश्वरम्
कथां रत्नत्रयस्याहं वक्ष्ये श्रेयोनिधे. सताम् ॥१॥

सर्वज्ञसारगुणरत्नविभूषणोऽसौ विद्यादिनंदिगुरुरुच्चतरप्रसिद्ध. ।
शिष्येण तस्य विदुषा श्रुतसागरेण रत्नत्रयस्य सुकथा कथितात्मसिद्ध्यै ॥८२॥

इति श्रीरत्नत्रयविधानकथानकं समाप्तम् ।

१६१. अनन्तव्रतकथा (ब्रह्मश्रुतसागर)

आदिभाग:—

प्रणम्य परमात्मानमनंतं परमेष्ठिनम् ।
विद्यानंदं प्रवक्ष्येऽहमनंतव्रतसत्कथाम् ॥१॥

अन्तभाग:—

सूरिर्देवेन्द्रकीर्तिर्विबुधजननुतस्तस्य पट्टाब्धिचन्द्रो
रुंद्रो विद्यादिनंदी गुरुरमलतपा भूरिभव्याब्जभानु. ।
तत्पादांभोजभृंग कमलदललसल्लोचनश्चंद्रवक्त्रः

कर्तामुष्यनन्तव्रतस्य श्रुतसमुपपदः सागरः शं क्रियाद्वः ॥४७॥

इत्यनंतव्रतकथा ब्रह्मश्रीश्रुतसागरविरचिता सम्पूर्णा ।

१६२. अशोकरोहिणीकथा (ब्रह्मश्रुतसागर)

आदिभागः—

नत्वा पंचगुरून् विद्यानंदस्वात्मसपदम् ।
अशोकरोहिणीवृत्तं सिद्धये कथयाम्यहम् ॥१॥

अन्तभागः—

गच्छे श्रीमति मूलसंघतिलके सारस्वते निर्मले
तत्त्वज्ञाननिधिर्बभूव सुकृती विद्यादिनन्दी गुरुः ।
तच्छिष्यश्रुतसागरेण रचिता संक्षेपत. सत्कथा
रोहिण्याः श्रवणामृतं भवतु वस्तापच्छिदे संततम् ॥६६॥

इतिश्रीश्रुतसागरविरचिता अशोकरोहिणीकथा समाप्ता ।

१६३. तपोलक्षणपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभागः—

विद्यानन्दं प्रभाचन्द्रमकलंकं जिनाधिपम् ।
प्रणम्य शिरसा वक्ष्ये तपोलक्षणपंक्तिकम् ॥१॥

अन्तभागः—

देवेन्द्रकीर्त्तिगुरुपट्टसमुद्रचंद्रो विद्यादिनंदिसुदिगम्बर उत्तमश्रीः ।
तत्पादपद्ममधुपः श्रुतसागरोऽयं ब्रह्मव्रती तप इदं प्रकटीचकार ॥४२॥

इतिब्रह्मश्रीश्रुतसागरविरचिता लक्षणपंक्तितपःकथा समाप्ता ।

१६४. मेरुपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभागः—

चिंतयित्वा चिरं वीरं धीरं गम्भीरशासनम् ।
विद्यानंदप्रदं मेरुपंक्तिमुद्योतयाम्यहम् ॥१॥

अन्तभाग:—

सोनाम्युदयसखी कदाग्रहविमुखी शुश्राशुशु भन्मुखी
पूजादानमुनीन्द्रमानविनयस्वाध्यायसाधुद्यु ति. ।
विद्यानंद्यकलकदेवकलिते मार्गे रतिं बिभ्रती
श्रीमान् कांकसुतात्रकीर्तितभुजा ढोसी चिरं जीवतु ॥४६॥
इतिश्रीश्रुतसागरविरचितं मेरुपंक्त्युपाख्यानं समाप्तम् ।

१६५. विमानपंक्तिकथा (ब्रह्मश्रुतसागर)

आदिभाग —

पूज्यपादाऽकलंऽऽकार्य-विद्यानंदिस्तुतक्रमम् ।
विमानपंक्तिमावच्मि तपो नत्वा जिनेश्वरम् ॥१॥

अन्तभाग.—

सद्‌वाक्यमलंघ्यमित्यपि मनस्यारोप्य विद्वद्वरो
वर्णि-श्रीश्रुतसागरो जिनपतेर्धर्मानुरागादर ।
गोमत्याहतवाक्यबोधनपरश्चक्रे नवक्राशय
सम्यग्दृष्टिचकोरचद्रवदनः शास्त्रं चिरं नदतु ॥८८॥

इति भट्टारकश्रीविद्यानदिप्रियशिष्य सूरि(वर्णि)श्रीश्रुतसागरविरचिता विमानपंक्त्युपाख्यानकथा समाप्ता ।

१६६. पल्यविधानकथा (ब्रह्मश्रतसागर)

आदिभाग —

श्रीविद्यानंदिपादाब्जं हृदि ध्यात्वोन्नतिप्रदम् ।
सूत्रानुसारत· पल्यविधानं रचयाम्यहम् ॥१॥

अन्तभाग —

श्रीमूलसंघपरमार्हतभव्यपद्मसंबोधवाक्यकिरणं प्रगुणप्रतापः ।
देवेन्द्रकीर्तिरभवद्भुवनैकभानुर्गच्छे गिर सुरनरोरगपूजितेऽस्मिन् ॥४०॥
तत्पट्टवारिधिसमुल्लसनैकचद्र सांद्रद्यु ति परमखडसमुद्यवृत्त. ।
निर्लांछनो बुधजनैरभिपूज्यपादो विद्यादिनंदिगुरुरत्र चिरं विरेजे ॥४१॥

तत्पादपंकजरजोरचितोत्तमांगः श्रीमल्लिभूषणगुरुर्विदुषां वरेण्य. ।
भट्टारको भुवनभव्यसरोजसूर्यो मिथ्यातमोविघटने पटुरेष भाति ॥४२॥

सर्वज्ञशासनमहामणिमंडितेन तस्योपदेशवशिना श्रुतसागरेण ।
देशव्रतिप्रभुतरेण कथेयमुक्ता सिद्धिं ददातु गुरुभक्तिविभाविनेभ्य· ॥४३॥

श्रीभानुभूपतिभुजाऽसिजलप्रवाहनिर्मग्नशत्रुकुलजाततत: प्रभाव. ।
सद्वृद्धहुंबडकुले वृहतीलदुर्गे श्रीभोजराज इति मंत्रिवरो बभूव ॥४४॥

भार्यास्य सा विनयदेव्यभिधा सुधोपसोद्गारवाक् कमलकांतमुखी सखीव ।
लक्ष्म्या· प्रभोर्जिनवरस्य पदाब्जभृंगी साध्वी पतिव्रतगुणा मणिवन्महार्घ्या ॥४५

साऽसूत भूरिगुणरत्नविभूषितांगं श्रीकर्म्मसिंहमितिपुत्रमनूकरत्नम् ।
कालं च शत्रु-कुल-कालमनूनपुण्यं श्रीघोषरंवनतरावगिरींद्रवज्रम् ॥४६॥

गंगाजलप्रविमलोच्चमनोनिकेतं तुर्यं च वर्यंतरमंगजमत्र गंगम् ।
जाता पुरस्तदनु पुत्तलिका स्वसैषां वक्तृषु सज्जिनवरस्य सरस्वतीव ॥४७॥

सम्यक्त्वदार्ढ्यकलिता किंल रेवतीव सीतेव शीलसलिलोचितभूरिभूमिः ।
राजीमतीव सुभगागुणरत्नराशिर्वेलासरस्वतिइवांचति पुत्तलीह ॥४८॥

यात्रां चकार गजपंथगिरौ ससंघा ह्यो तत्तपोविदधती सुदृढव्रता सा ।
सच्छांतिकं गणसमर्चनमर्हदीशं नित्यार्चनं सकलसंवसदत्तदानम् ॥४९॥

तुंगीगिरौ च बलभद्रमुने: पदाब्जभृंगी तथैव सुकृतं यतिभिश्चकार ।
श्रीमल्लिभूषणगुरुप्रवरोपदेशाच्छास्त्रं व्यधाय यदिदं कृतिनां हृदिष्टम् ॥५०॥

मातेव व्रतिनां गुणान् विदधती संश्रृण्वती चागमं
पूजादानपरा परोपकृतिकृद्दत्तैव चनन्यचतः (?) ।
स्त्री चैषांगवशेन मानसदृढा निर्व्यूढचारुव्रता
दीर्घायुर्बलभद्रदेवहृदया भूयात्पदं संपदः ॥२५१॥

इतिभट्टारकश्रीमल्लिभूषणगुरूपदेशात्सूरिश्रुतसागरविरचिता पल्यविधानव्रतोपाख्यानकथा समाप्ता ।

१६७. छन्दोनुशासनवृत्तिः (कवि वाग्भट)

आदिभाग —

प्रणिपत्य प्रभुं नाभिसंभव भक्तिनिर्भरः।
विवृणोमि स्वयमहं निज छंदोनुशासनम् ॥१॥

अथारंभे शिष्टसमयप्रतिपालनाय अभिधेय-सम्बन्ध-प्रयोजनप्रतिपादनाय च ग्रंथकार इष्टाधिकृतदेवतानमस्कारपूर्वकमुपक्रमते। तद्यथा—

विभुं नाभेयमानम्य छंदसामनुशासनम्।
श्रीमन्नेमिकुमारस्यात्मजोहं वच्मि वाग्भट. ॥२॥

(१) संज्ञाध्याय (२) समवृत्ताख्य

पुरुषोत्तमराहडप्रभो! कस्य नहि प्रमद ददाति सद्य.।
वितता तव चैत्यपद्धतिर्वातचलध्वजमालधारिणी ॥१३॥

(३) अर्धसमवृत्ताख्य (४) मात्रासमक × × × (५) मात्राच्छंद।

अन्तभाग —

इति महाकविश्रीवाग्भटविरचिताया वाग्भटाभिधानछंदोवृत्तौ मात्राच्छंदोऽध्याय. पंचम.।

नव्यानेकमहाप्रबन्धरचनाचातुर्यविस्फूर्जित-
स्फारोदारयश. प्रचारसततव्याकीर्णविश्वत्रयः।
श्रीमन्नेमिकुमारसूनुरखिलप्रज्ञालुचूडामणि-
श्छंद. शास्त्रमिदं चकार सुधियामानंदकृद् वाग्भट. ॥
सपूर्णचेदं श्रीवाग्भटकृतं छदोनुशासनमिति ॥

—(पाटन भंडारप्रति)

१६८. षण्णवतिक्षेत्रपालपूजा (विश्वसेनमुनि)

आदिभाग.—

वंदेऽहं सन्मति देवं, सन्मति मतिदायकम्।
क्षेत्रपालविधि वक्ष्ये भव्याना विघ्नहानये ॥१॥

अन्तभागः—

श्रीमच्छ्रीकाष्ठसंघे यतिपतितिलके रामसेनस्य वंशे
गच्छे नंदीतटाख्ये यगदितिह (यमततिसुमुखे)ऽतुच्छकर्मा मुनीन्द्रः ।
ख्यातोऽसौ विश्वसेनो विमलतरमतिर्येन यत्नं चकार्षीत्
सोप्पेसुग्रामवासे भविजनकलिते क्षेत्रपानां शिवाय ॥२७॥

इति श्रीविश्वसेनकृता षण्णवतिक्षेत्रपालपूजा संपूर्णां ।

१६६. वैद्यकशास्त्र (हरिपाल)

आदिभागः—

णमिऊण जिणो विज्जो भवभमणेवाहिफेदणसमत्थो ।
पुण विज्जयं पयासमि जं भणियं पुव्वसूरीहिं ॥१॥

गाहाबंधे विरयमि देहिणं रोय-णासणं परमं ।
हरिवालो जं वुल्लइ तं सिज्झइ गुरुपसाएण ॥२॥

(इसके बाद 'वाडव-गरू-जाचित्ती' इत्यादि रूपसे शिरोवर्तिदोष नाशन-की चिकित्सा-दवाई लिखी है आगे शिरोरोगकी दवाइयां हैं । इस तरह प्रयोग दिये हैं ।)

अन्तभागः—

हरडइ वातिं समंजलि तेण सुणीरेण पक्खालिज्जा ।
लिंगे वाहि पसामइ भासिज्जइ जोयसारेहिं ॥२५५॥

हरिवालेण य रइयं पुव्वविज्जेहिं जं जि णिद्दिट्ठं ।
बुहयण तं महु खमियहु हीणहियं जं जि कव्वो य ॥२५६॥

विक्कम-णरवइ-काले तेरसयागयाइं एयाले (१३४१) ।
सिय-पोसट्ठमि मंदे विज्जयसत्थो य पुण्णो य ॥

इति परा(प्रा)कृतवैद्यक [शास्त्र] समाप्तम् ॥

शुद्धज्ञानमया जरादिरहिताः सिद्धा भवन्तु श्रियै
भव्यानां सुखकारिणो जिनवरा. सन्तुक्षितौ भूभुजाम् ॥
आचार्या वितरन्तु मंगलविधिं सर्वप्रदानां सदा
सम्यक्साधुपदाधिरूढपतयः प्रीणंतु सङ्घं चिरम् ॥११॥

इतिबुधवीरुविरचित-पद्मावतिपुरवालपण्डितश्रीजिनदासनामाङ्कितबृहत्सिद्धचक्रपूजा समाप्ता ।

१७१. यशोधरचरित्र (भ० ज्ञानकीर्ति)

आदिभाग'—

श्रीमन्नाभिसुतो जीयाज्जिनो विजितदुर्नय. ।
मङ्गलार्थं नतो वस्तुं (वोऽस्तु) सर्वदा मंगलप्रदः ॥१॥

नमामि देवं मुनिसुव्रताख्यं, मुनिव्रतैर्भूषितभव्यदेहम् ।
सुरेन्द्रराजेन्द्रकिरीटकोटि रत्नप्रभालीढपदारविन्दम् ॥२॥

श्रीवर्द्धमानं प्रणमामि नित्यं, श्रीवर्द्धमानं मुनिवृन्दवन्द्यम् ।
धर्माम्बुवर्षैः परिपुष्टनीतिं भव्यासुभृत्शस्यसमूहमीशम् ॥३॥

शेषान् जिनान् धर्मसुतीर्थनाथान् वंदे सदा मंगलदानदक्षान् ।
कैवल्यदीपेन विलोकितार्थान् विभून् विमुक्ते. पथसार्थवाहान् ॥४॥

सर्वज्ञवक्त्राब्जविनिर्गतां ता जैनेश्वरीं वाचमहं स्तवीमि ।
सदंगपूर्वादिस्वरूपगात्रीमज्ञानदुर्भ्रान्तरविप्रकाशाम् ॥५॥

श्रीगौतमादेर्गणपस्य पादान् स्तुवे सदाऽहं दृढभक्तिचित्त ।
नमन्मुनिवृन्दनिवन्ध्यमानानपारजन्माम्बुधिपोततुल्यान् ॥६॥

उमादिकस्वातिमशेषतत्त्वं सूत्रार्थकारं कविसृष्टिकारं ।
प्रत्येकबुद्धाख्यगणेशकीर्तिं स्वान्तां प्रकुर्वन्तमुपैमि भक्त्या ॥७॥

समंतभद्रं कविराजमेकं वादीभसिंहं वरपूज्यपादम् ।
भट्टाकलंकं जित-बौद्धवादं प्रभादिचन्द्रं सुकवि प्रवन्दे ॥८॥

श्रीपद्मनन्दी क्रमतस्ततोऽभूत् सद्भव्यपद्मप्रविकाससूरः ।
तत्पट्टके श्रीसकलादिकीर्ति. कीर्तिप्रजव्याप्तदिगंतराल. ॥८॥

पट्टे तदीये भुवनादिकीर्ति: तपोविधानाप्तसुकीर्तिमूर्तिम् ।
श्रीज्ञानभूपं मुनिप तदीये पट्टे प्रपदे विदितार्थतत्त्वम् ॥१०॥

पट्टे तदीये विजयादिकीर्तिं कामारिनिर्नाशनलब्धकीर्तिं ।
तदीयपट्टे शुभचन्द्रदेवः कवित्ववादित्वविधानदेव ॥११॥

सुमतिकीर्तिरभूद्वरतत्पदे सुमतिसद्व्रपदेशनतत्पर. ।
सुगुणकीर्तिरिहास्य पदे वरे जयति सूरिरनेकगुणोत्कर· ॥१२॥

तत्पट्टे वादिभूपाख्या विद्यते वदतांवर. ।
कर्णाटे यन्नृपै. पूज्यो जैनैर्जयतु मद्गुरु· ॥१३॥

तच्छिष्यो ज्ञानकीर्त्याख्योऽहं सूरिपदसंस्थित· ।
करिष्ये चरितसारं यशोधरमहीपते ॥१४॥

दोर्दण्डचण्डबलत्रासितशत्रुलोको रत्नादिदानपरिपोषितपात्रसंघ ।
दीनानुवृत्तिशरणागतदीर्घशोक. पृथ्व्या बभूव नृपतिर्वरमानसिंह ॥१५॥

दोर्दण्डचण्डबल त्रासितशत्रुलोको रत्नादिदानपरिपोषितपात्रओघ. ।
दीनानुवृत्तिशरणागतदीर्घशोक पृथ्व्या बभूव नृपतिर्नरमानसिंह ।१६।

तस्य चितीश्वरपतेरधिकारि [वर्ग] श्रीजैनवेश्मकृत[दुर्लभ] पुण्यधारी ।
यात्राविधर्मशुभकर्मपथानुचारी, जैनो बभूव वनिजा वर इभ्यमुख्य. ।१७।

खण्डेलवालान्वय एव गोत्रे गोधाभिधे रूपसुचन्द्रपुत्र· ।
दाता गुणज्ञो जिनपूजनेन्द्रो सिचारिधौतारिकदबपंक ॥१८॥

रायात्कुबेरं मदनं स्वरूपेणार्कं प्रतापेन विधुं सुसौम्यात् ।
ऐश्वर्यता वासवमर्चयापि तिरस्करोतीह जिनेन्द्रभक्त. ॥१९॥

नानूसुनामा जगतीप्रसिद्धो यो मौलिबद्धावनिनाथतुल्य. ।
स्ववंशवाताध्वविकासूरोऽस्यप्रार्थनातो क्रियते मयैतत् ॥२०॥

इत्थं जिनेन्द्रागमसद्गुरून् वै प्रणम्य भक्त्या चरितं पवित्रं ।
वक्ष्ये समासेन यशोधरस्य राज्ञो जनन्या सहितस्य चित्रं ॥२१॥
श्रीसोमदेवैर्हरिषेणसंज्ञैः श्रीवादिराजैश्च प्रभंजनैश्च ।
धनंजयैश्चैत्कविपुष्पदन्तैः श्रीवासवाद्यैरिह सेनसंज्ञैः ॥२२॥
प्रकाशितं गद्य-सुपद्यबंधैः संक्षेपविस्तारसुगूढभावैः ।
न्यायागमाध्यात्मविशिष्ट-शब्द-शास्त्राब्धिपारं प्रगतैर्महद्भिः ॥२३॥
कवीश्वरैर्वादिभिरप्यजेयैर्वागीश्वरैर्जीवगुरुप्रतुल्यैः ।
मया कथं तद्गदितुं प्रशक्यं स्वल्पेन बोधेन विशिष्टभावं ॥२४॥
तथापि तद् गुण-ग्रामस्मरणार्जितपुण्यत. ।
स्तोकं सारं प्रवक्ष्यामि स्वस्य शक्त्यनुसारतः ॥२५॥

× × × ×

अन्तभाग :—

चंपादिपुर्याः सविधे सुदेशे वंगाभिधासुन्दरता दधाने ।
ख्याते पुरेऽकच्छ(ब)रनामके च चैत्यालये श्रीपुरुतीर्थपस्य ॥५७॥
श्रीमूलसंघे च सरस्वतीति गच्छे बलात्कारगणे प्रसिद्धे ।
श्रीकुन्दकुन्दान्वयके यतीशः श्रीवादिभूपो जयतीह लोके ॥५८॥
तद्गुरुबन्धुर्भुवनसमर्च्यः पंकजकीर्त्तिः परमपवित्रः ।
सूरिपदासो मदनविमुक्तः सद्गुणराशिर्जयतु चिर स ॥५९॥
शिष्यस्तयोर्ज्ञानसुकीर्तिनामा श्रीसूरिरत्राल्पसुशास्त्रवेत्ता ।
चरित्रमेतद्रचित च तेनाऽऽचन्द्रार्कतारं जयताद्धरिम्यां ॥६० ॥
शते षोडशएकोनषष्ठिवत्सरके शुभे ।
माघे शुक्लेऽपि पंचम्यां रचितं भृगुवासरे ॥६१॥
राजाधिराजोऽत्र तदा विभाति श्रीमानसिंहो जित-वैरिवर्गः ।
अनेकराजेन्द्रविनम्यपादः स्वदानसंतर्पितविश्वलोक. ॥६२॥
प्रतापसूर्यस्तपतीह यस्य द्विषां शिरस्सुप्रविधाय पादं ।
अन्याय-दुर्ध्वान्तमपास्य दूरं पद्माकर श्र प्रविकाशयेच्च ॥६३॥

तस्यैव राज्ञोऽस्ति महानमात्यो नानू सुनामा विदितो धरित्र्या ।
सम्मेदशृंगे च जिनेन्द्रगेहमष्टापदे वादिमचक्रधारी ॥६४॥
यो कारयद्यत्र च तीर्थनाथा सिद्धिंगता विंशतिमानयुक्ताः ।

तत्प्रार्थनां च संप्राप्य जयवंतबुधस्य च ।
आग्रहाद्रचितं चैतच्चरित्रं जयताच्चिरं ॥६६॥

श्रीवीरदेवोऽस्तु शिवाय ते हि श्रीपद्मकीर्तीष्टविधायको य. ।
श्रीज्ञानकीर्तिप्रविवंद्यपादो नानू स्ववर्गेण युतस्य नित्यम् ॥६७॥

इति श्रीयशोधरमहाराजचरिते भट्टारकश्रीवादिभूषणशिष्याचार्यश्रीज्ञान-कीर्तिविरचिते राजाधिराज-महाराज-मानसिंह-प्रधान-साह-श्रीनानूनामांकिते भट्टारकश्रीअभयरुच्यादि-दीक्षाग्रहणस्वर्गादि-प्राप्तिवर्णनो नाम नवम. सर्ग. ॥

परिशिष्ट

१

जैनग्रन्थप्रशस्ति संग्रहके ग्रन्थ और ग्रन्थकार

२

प्रशस्ति संग्रहमें उल्लिखित संघ, गण और गच्छ

प्रशस्ति संग्रहमें उल्लिखित ग्रन्थ

४

उल्लिखित् वंश, अन्वय, गोत्र और जाति

५

उल्लिखित देश, नगर, ग्राम, राजा और पर्वत

६

प्रशस्तिसंग्रहमें उल्लिखित जिनालय तथा पर्व आदि

७

प्रशस्तिसंग्रहमें उल्लिखित देवी देवता

प्रशस्तिसंग्रहमें उल्लिखित आचार्य, भट्टारक और विद्वान्

६

प्रशस्तिसंग्रहमें उल्लिखित राजा और राजमंत्री

१०

प्रशस्तिसंग्रहमें उल्लिखित श्रावक और श्राविका